यहाँ आचार्य ने संवृति विषयक एवं परमार्थ विषयक दो सम्यक् दृष्टियों का वर्णन करते हुए कहा है कि प्रथम दृष्टि कर्म एवं फल के सम्बन्ध में विश्वास करना है तथा वह स्वर्ग प्राप्ति का हेतु है। द्वितीय दृष्टि सर्वधर्मशून्यता तत्त्व की अवबोधिका है तथा यह मोक्ष का हेतु है। अतएव यदि आवस्थिक रूप से स्वर्ग एवं वास्तविक रूप से मोक्ष सुख की अभिलाषा हो, तो उपर्युक्त दोनों दृष्टियों की सदैव भावना करें।

स्वर्गं मोक्षं चेच्छेत् सम्यग्दृष्टिस्तावद् भावनीयैव ।
कृतानि मिथ्यादृष्ट्या पुरुषैः सुचरितान्यपि विषमविपाकानि।।[१]

इसका विस्तार से वर्णन करते हुए आचार्य चार स्मृत्युपस्थानों की भावना, उसमें भी विशेष रूप से धर्मस्मृत्युपस्थान की भावना, उनके विरोधी प्रत्यय तीन संयोजनों-शीलव्रतपरामर्श, सत्कायदृष्टि तथा विचिकित्सा का प्रहाण तथा इनके अनुकूल तीन शिक्षाओं का अभ्यास करने की शिक्षा देते हुए कहते हैं कि चित्त को क्लेशरूपी बन्धनों से मुक्त करने के अतिरिक्त अन्य कोई मोक्ष नहीं है। वह मोक्ष तो स्वयं के अभ्यास पर निर्भर है। इसमें अन्य पुद्गल कुछ भी सहायता नहीं कर सकते हैं, अतः स्वयं को ही प्रयत्न करना पडता है।

आत्मोपेक्षो मोक्षः परस्मान्न लभ्यते किमपि साहाय्यम् ।
चत्वार्यार्यसत्यानि वृत्तस्थः श्रुतचिन्ताभिरभ्येच्च ।।[२]

निर्वाण की अवस्था की प्राप्ति हेतु सात अकुशलों से विरति अधिशील है। आर्यमार्ग की उत्पत्ति के अनुरूप चारों ध्यान अवस्थाएं अधिचित्त है और नैरात्म्यद्वय का अवबोध अधिप्रज्ञा शिक्षा है। इनका सदैव अभ्यास करना चाहिए। ये तीनों शिक्षाएं मोक्ष प्राप्ति के पूर्ण, अविपरीत अथवा सम्यक् उपाय हैं। इस प्रकार शील अपरिपक्व सन्तति को परिपक्व करता है। समाधि क्लेशों का दमन करती है। प्रज्ञा क्लेशों को समूल नष्टकर परिपक्व सत्त्व को मुक्त करती है।

अधिशीलचित्तप्रज्ञास्तिस्रोऽपि शिक्षाः सदैव शिक्षणीयाः ।
एतास्वन्तर्भूतानि शतमेकपञ्चाशच्च शिक्षापदानि ।।[३]

---

[१] वही, ४७ कारिका ।
[२] वही, ५२ कारिका ।
[३] वही, ५३ कारिका ।

मनुष्य का जीवन तो अनेक प्रकार की बाधाओं से युक्त होता है। इसलिए इसे हवा से उठे पानी के बुलबुले से भी अधिक अनित्य कहा गया है। शरीर का अन्त तो खाक हो जाना, शुष्क हो जाना एवं सड जाना है।[1] नश्वर, जीर्ण-शीर्ण एवं पूति होने के कारण शरीर में आसक्त होने लायक कोई सार तत्त्व नहीं है। जब कोई दृढ एवं कठोर पदार्थ जैसे पृथ्वी, सुमेरु एवं समुद्र भी सात सूर्यों के उदय होने पर भस्म होकर धूलिमात्र भी अवशिष्ट नहीं रह जाते हैं तो फिर इस दुर्बल मनुष्य शरीर के बारे में तो कहना ही क्या है। आचार्य मनुष्य जीवन को अत्यन्त दुर्लभ बताते हुए अपने सुहृद् सातवाहन राजा गौतमीपुत्र को विशिष्ट आधार मनुष्य जीवन की प्राप्ति का एहसास दिलाते हुए मार्ग की साधना में प्रयत्न करने की शिक्षा देते हैं। आठ अक्षणों में से किसी भी एक अवस्था में जन्म ग्रहण करने पर व्यक्ति को मोक्ष सिद्ध करने का अवसर प्राप्त नहीं होता है। चूँकि सम्प्रति आपने आठ अक्षणों से रहित मोक्ष प्राप्ति के विशिष्ट आधार मनुष्य जीवन को प्राप्त किया है। अतएव इसे सार्थक बनाने हेतु पुर्नजन्म के निवारण के लिए मार्ग की प्रतिपत्ति में प्रयत्न करें।

महार्णवयुगच्छिद्रे हि कूर्मग्रीवार्पणाच्च मानुषं जन्म ।
तिर्यगादिसुदुर्लभं सफलीकुरु सद्धर्माभ्यासान्नरेन्द्र ।।[2]

चतुर्थ अध्याय में आचार्य सांसारिक दोषों से खिन्नता के उत्पाद हेतु संसार के दोषों का वर्णन करते हुए संसार में चित्त न लगाने की शिक्षा देते हुए कहते हैं कि यह संसार मृत्यु, व्याधि, जरा एवं इच्छित वस्तुओं के न मिलने आदि अनेक दुःखों का आकर है। इसमें अनियत दोष, अतृप्तिदोष, शरीर के बारम्बार परित्याग का दोष, पुनः पुनः प्रतिसन्धिदोष, असंगतिदोष, नारकीयदुःख, तिर्यग् योनि के दुःख, प्रेतदुःख, देवों का दुःख तथा असुरों का दुःख अर्थात् पाँचों गतियों के नियत दुःखों

---

[1] भगवान् ने कहा है- हे भिक्षुओं ! शरीर समयातीत हो चुका है अर्थात् जो मर चुका है, वह बान्धवों द्वारा आग में जलाया जाता है । पानी में फेंका जाता है । जमीन के नीचे गाढ़ा जाता है । अथवा वायु एवं सूर्य द्वारा सुखाया जाता है । अथवा तिर्यग् योनि के अन्तर्गत आने वाले नाना प्रकार के जीव-जन्तुओं द्वारा खाया जाता है। -(उद्धृत), सुहल्लेख-स्फुटार्थाटीका (हिन्दी), आचार्य रेनदावा, पृ. २२३, ति.सं.सं. १९९६ ।

[2] वही, ५९ कारिका ।

के अनुभव का दोष होता है। चूँकि संसार उक्त प्रकार के अनेक दोषों से समन्वित होता है, इसलिए देव, मनुष्य आदि गतियों में जन्म लेना भी उचित नहीं है।

इष्टविघातव्याधिमृत्युजरादिदुःखावहः संसारः ।
विरज्य ततः शृणु तावद् दोषानेतस्यावगच्छन् नरदेव ।।[१]

दुष्टाचरणे लग्नाः सत्त्वाः संजीवकालसूत्रतपनेषु ।
रौरवावीच्यादौ हि संघाते चापि नरके सदा दुःखम् ।।[२]

अनिष्टफलबीजानि तु कायवाक्चित्तानां हि दुराचरणानि ।
भवतैवं यतनीयं शक्त्या येन तदणुमत्रं न शिष्येत।।[३]

यच्च लभन्ते प्रेता नानादुःखास्वादमेकविधमित्थम् ।
प्रीतिरत्र कार्पण्ये मात्सर्यमनार्यमुक्तमतो बुद्धेन ।।[४]

दुःखं स्यान्मानसिकं देवैश्वर्यं प्रतीर्ष्ययाऽसुरेष्वपि ।
न कुर्वन्ति धीमन्तो जन्मावरणाच्च ते सत्यदर्शनानि ।।[५]

संसारेऽस्मिन्नेवं देवनरकप्रेततिर्यग्योनिषु ।
जन्मग्रहणमयुक्तं बहुबाधं जन्म तत्रेति विज्ञेयम् ।।[६]

पाँचवें अध्याय में निर्वाण की अनुशंसा का विचार कर मार्ग की प्रतिपत्ति हेतु सप्त बोध्यंग, शमथ एवं विपश्यना की युगनद्धता, प्रतीत्यसमुत्पाद का अवबोध, आर्य अष्टाङ्गिक मार्गों की भावना, आर्यसत्यों की भावना आदि विषयों की शिक्षा देते हुए आचार्य कहते हैं कि इनके अभ्यास से निर्वाण की प्राप्ति होती है, क्योंकि ये निर्वाण प्राप्ति के लिए कुशल सम्भार हैं। ध्यान के अभाव में प्रज्ञा स्थिर नहीं होती है, जिसके कारण वह क्लेशों का उन्मूलन नहीं कर सकती। उसी प्रकार प्रज्ञा के अभाव

---

[१] वही, ६५ कारिका ।
[२] वही, ७७ कारिका ।
[३] वही, ८८ कारिका ।
[४] वही, ९७ कारिका ।
[५] वही, १०२ कारिका ।
[६] वही, १०३ कारिका ।

में ध्यान मात्र पर्युत्थित क्लेशों को दबा सकता है, किन्तु क्लेशों का बीजसहित उन्मूलन नहीं कर पाता है। इसलिए शमथ एवं विपश्यना युगनद्ध मार्ग के द्वारा निर्वाण प्राप्त होता है।

प्रज्ञाभावे ध्यानं ध्यानाभावेऽपि न जायते सा प्रज्ञा ।
यत्रोभे विद्येते ज्ञेयस्तस्य भवसागरो गोष्पदवत् ।।[१]

प्रतीत्यसमुत्पाद तो बुद्ध के वचनों में प्रधान है अर्थात् सबसे प्रिय वचन है, क्योंकि यह सभी वचनों का सार है। जो इसे सम्यक् रूप से देखता है वह तत्त्व के द्रष्टा श्रेष्ठ बुद्ध को देखता है।

गम्भीरोऽनर्घकोशः प्रियः प्रतीत्योत्पादो जिनवचनानाम् ।
सम्यगिमं यः पश्यति स च पश्यति तत्त्वदर्शिनं बुद्धमेव ।।[२]

अन्त में बुद्ध के उपदेश के सार को बताते हुए आचार्य कहते हैं कि अकुशल कर्मों से विरत हो कुशल कर्मों में प्रवृत्त हो अपने चित्त का दमन करें। भगवान् ने चित्त को धर्म का मूल कहा है। चित्त से लोक की उत्पत्ति होती है। चित्त सभी को ले जाता है। एक चित्त-धर्म के प्रभाव से सभी धर्म उसका अनुगमन करते हैं।[३]

चित्तं हि धर्ममूलं भगवतोक्तमतस्तदपि साधु दमयेच्च ।
भो निर्भय, किं बहुना कथनेन यतोऽयमेव हितोपदेशः ।।[४]

अन्त में आचार्य पुनः कहते हैं कि इस प्रकार के उपदेश का पूर्णतया पालन एक प्रयत्नशील, कुशलपरायण पूर्ण भिक्षु के द्वारा भी दुर्लभ है तो अनेक कार्यों में व्यस्त गृहस्थों के द्वारा तो कहना ही क्या है? फिर भी इनमें से किसी एक शिक्षापद का आचरण करेंगे तो इस प्रकार की प्रतिपत्ति से दोषों का प्रहाण कर गुणों का प्रतिलाभ कर भावना द्वारा जीवन को सार्थक बना सकेंगे। इस प्रकार बुद्ध शासन में स्थित होंगे तथा क्रमशः और भी गुण प्राप्त होंगे।

---

[१] वही, १०७ कारिका ।

[२] वही, ११२ कारिका ।

[३] चित्तेन नीयते लोकः चित्तेन परिकृष्यते ।
एकधर्मस्य चित्तस्य सर्वधर्मा वशानुगाः ।। - सं.नि. १.२.७; अभि.को. (उद्धृत) पृ. १३८, बौ.भा.प्र. १९८७; चित्तस्स दमथो साधु चित्तं दान्तं सुखावहम् ।। -धम्मपद, ३/३

[४] वही, ११७ कारिका ।

यन्मयोपदिष्टं तत्सप्रयासैरपि भिक्षुभिर्दुःसाध्यम् ।
चर्यागुणान् सेवस्व शिक्षामाचर जीवनं च कुरु सार्थम् ।।[१]

इस प्रकार की धर्मदेशना से संतुष्ट चित्त वाले व्यक्ति को महायान मार्ग में प्रवेश कराने के आशय से आचार्य कहते हैं कि जिस प्रकार बुद्ध एवं बोधिसत्त्व समस्त पृथग्जन तथा आर्यों के सास्रव एवं अनास्रव सभी कुशलों का अनुमोदन करते हैं, उसी प्रकार अपने द्वारा किए गए सभी कुशल कर्मों का सभी के लिए अनुमोदन करना चाहिए तथा स्वयं के द्वारा अच्छी तरह से की गई काय, वाणी एवं चित्त की चर्याओं की भी बुद्धत्व प्राप्ति हेतु परिणामना करनी चाहिए।[२]

सर्वेषां कुशलानि तु सर्वार्थमनुमोद्य स्वचर्यात्रयीं च ।
बुद्धत्वाय परिणाम्य ततस्तदनेन पुण्यराशिना भवता।।[३]

अपरिमित जन्मों में समस्त देव एवं मनुष्य लोक के योगियों को वश में करके तथा अवलोकितेश्वर के समान चर्या करके अनेक असहाय दुःखी जनों को अनुगृहीत करना चाहिए। तथा अन्तिम जन्म लेकर व्याधि, जरा, राग और द्वेष का निराकरण कर बुद्ध क्षेत्र में भगवान् अमिताभ के सदृश अपरिमित आयु वाले जगन्नाथ होवें।

चरमं भवं गृहीत्वा व्याधिजरारागद्वेषांश्च प्रहाय ।
बुद्धक्षेत्रे भगवानमिताभ इव लोकेशोऽमितायुर्भव ।।[४]

ग्रन्थ के अन्तिम भाग में आचार्य कहते हैं कि इस प्रकार बुद्धत्व प्राप्त करके उचित सत्त्वार्थ करते हुए शान्तिमय, क्लेशहीन, लोकोत्तर एवं अनुपधिशेषनिर्वाण पद को प्राप्त करना चाहिए।

।। भवतु सर्वमङ्गलम्।।

---

[१] वही, ११८ कारिका ।

[२] दशदिग्व्योमपर्यन्तसर्वसत्त्वार्थसाधने ।
यथा चरति मञ्जुश्रीः सैव चर्या भवेन्मम ।। -बो.च. १०/५४;
पारंपर्येण साक्षाद्वा सत्त्वार्थं नान्यदाचरेत् ।
सत्त्वानामेव चार्थाय सर्वं बोधाय नामयेत् ।। -बो.च. ५/१०१

[३] वही, ११९ कारिका ।

[४] वही, १२१ कारिका ।

आचार्यनागार्जुनविरचितः

सुहृल्लेखः

आचार्यमहामतिविरचित-

व्यक्तपदाटीका-समलङ्कृतः

सर्वदृष्टिप्रहाणाय यः सद्धर्ममदेशयत् ।
अनुकम्पामुपादाय तं नमस्यामि गौतमम् ।।

--मूलमध्यमककारिका, २७/३०

आचार्यनागार्जुनविरचितः

सुहृल्लेखः

प्रकृतिसुकृतार्हगुणाढ्य सुगतवचोभ्यः समुदानीताश्च मया ।
शुभमालक्ष्य कृता वै काश्चिदार्यागीतयस्त्वया च श्रव्याः ।।१।।

आचार्यमहामतिविरचित-

व्यक्तपदाटीका-समलङ्कृतः

आचार्यनागार्जुनेन[1] राज्ञे सातवाहनगौतमीपुत्राय[2] गुणगणान्वितोऽयं लेखः प्रेषितस्तस्मादयं 'सुहृल्लेखः' इत्युच्यते। **प्रकृतिगुणाढ्येति** सम्बोधनम्।

---

[1] निवृते सुगते पश्चात्कालोऽतीतो भविष्यति।
महामते, निबोध त्वं यो नेत्रीं धारयिष्यति।।
दक्षिणापथवेदल्यां भिक्षुः श्रीमान् महायशाः।
नागाह्वयः स नाम्ना तु सदसत्पक्षदारकः।।
प्रकाश्य लोके मद्यानं महायानमनुत्तरम्।
आसाद्य भूमिं मुदितां यास्यतेऽसौ सुखावतीम्।। -लं.अ.सू., १०/१६४-६६, पृ. ११८, मि.प्र.।

पुनश्च मञ्जुश्रीमूलकल्पतंत्रेऽपि भगवता उक्तम्-
नागाह्वयो नाम सौ भिक्षुः शासनेऽस्मिं हिते रतः।
मुदितां भूमिलब्धस्तु जीवेद् वर्षशतानि षट्।।
मायूरी नामतो विद्या सिद्धा तस्य महात्मनः।
नानाशास्त्रार्थधात्वर्थनिःस्वभावार्थतत्त्ववित्।।
सुखावत्यां चोपपद्येत यदासौ त्यक्तकलेवरः।
सोऽनुपूर्वेण नियतं संप्रपत्स्यते .... ।।
-मञ्जुश्रीमूलकल्पतंत्रम्, म.सू.सं. भाग-२, ५३/४४०-४५१, मि.प्र. १९६४।

[2] अयं सातवाहनवंशस्य महत्त्वपूर्णः शासकः आसीत्। अनेन स्वकुलस्य विलुप्तप्रतिष्ठा पुनः स्थापिता। स्वपूर्वजैः युद्धे पराजितान् प्रदेशान् विजित्य पूर्वतः पश्चिमसमुद्रपर्यन्तं राज्यस्य विस्तारः कृतः। नासिकाभिलेखेन ज्ञायते यत् तस्य अश्वैः त्रयाणां समुद्राणां जलं पीतम्। अयमेव

पूर्वकुशलमूलवशान्नियतोत्पादात्। प्रकृतिरिति हेतुः। अत एव सुकृतार्हेत्युक्तम्। यो ह्यतीते कुशलकारी, स सम्प्रति कुशलभाग् भवति। अत एव स सद्धर्मश्रवणयोग्य इति। तत एव **त्वया आर्यागीतय** इमाः श्रोतव्याः। केन किमर्थं प्रणीता इति चेत्? **सुगतवचोभ्यः समुदानीताश्च मया** (नागार्जुनेन) **शुभमालक्ष्य कृता वै काश्चिदार्यागीतयः** इति। सुगतवचस्तावदत्यन्तं मनोहारि। ततः समुदानात् पुण्यस्याभिकाङ्क्षया मयेमा आर्यगीतयः रचितास्तास्त्वया श्रोतव्या इति। **आर्यगीतिः** इत्येतत् छन्दनाम। कियत्यस्ता इति चेत्? काश्चिदित्युक्तम्। अनेन तावच्छब्दबाहुल्यभयं प्रहीयते।

अथवा प्रकृतिगुणाढ्य इति स्वभावेन गुणगणान्वितः। अनेन कुशललक्षणान्युक्तानि। सुकृतार्हत्वमिति कुशलयोग्यत्वम्। यो हि कुशलाशयः सः सुकृतार्ह इति। अत एव स सद्धर्मश्रवणोचितः, सुकृतपूर्वगामित्वादिति।। शेषं पूर्ववत्।।१।।

दारुमयी ह्यपि प्रतिमा सम्पूज्यते काऽपि सुगतस्य विद्वद्भिः ।
तथाऽमनोज्ञं काव्यं सद्धर्माश्रयाच्च ममेदं न निन्द्यम् ।।२।।

अमनोज्ञं भवदीयं काव्यमिति न श्रोष्यामीति चेत्? उच्यते **दारुमयी ह्यपि प्रतिमा...** इत्यादि। **'अपि'** शब्देन पाषाणमृत्तिकादीनां संग्रहः। **काऽपि** इत्यनेन मनोज्ञं वा अमनोज्ञं वा भवेदित्यर्थः। यथा दार्वादिविनिर्मितः कीदृशोऽपि तथागतकायश्चतुर्विशेषण[1]निरपेक्षतया विद्वत्प्रवरैः सम्पूज्यते तथा अमनोज्ञमपि ममेदं काव्यं सद्धर्माश्रितत्वात् प्रशंसनीयमेवेति।[2] प्रशस्यत्वाद् श्रवणीयमपीत्यभिप्रायः।।२।।

सातवाहनगौतमीपुत्रनाम्ना प्रसिद्धो जातः। स सातवाहनवंशस्य सर्वाधिको बलवान् राजा मन्यते। बौद्धधर्मं प्रति तस्य सविशेषा रुचिरासीत्। नासिकात्प्राप्ताभिलेखाद् एवं ज्ञायते यत् तेन बौद्धभिक्षूणां कृते भूमिदानादिपुण्यकार्याणि कृतानि। सातवाहनगौतमीपुत्रः (१०६-१३० ई. सन्) चतुर्विंशति-वर्षाणिपर्यन्तं सफलं शासनं कृत्वा पश्चात् १३०तमे ईसवीये वर्षे स्वदेहं तत्याज।

-द्र. माध्यमिकभारत-भूमेरितिहासः, पृ. ११६।

[1] द्रष्टव्यम्-- १. मृष्टगात्रता, २. विशुद्धगात्रता, ३. विशुद्धनेत्रता, ४. व्यपगततिलकगात्रता।

महामुनेरतिमधुरं मन्ये वचनं भवताऽवगतमेव स्यात् ।
आकल्पितं तु सुधया नन्वतिधवलं न दृश्यते चन्द्रिकया? ।।३।।

अथावगतमेव मया तथागतवचनं किमिति पुनरनेन काव्येनेति चेत्? उच्यते- **महामुनेरतिमधुरं मन्ये वचनं भवतावगतमेव स्यात्**, इत्यादि। **'एव'**- शब्देन श्रुत-चिन्ता-भावनानां संग्रहः। यद्यपि महामुनेर्भगवतो बुद्धस्य मधुरवचनानि दृष्टान्यवगतानि च तथापि काव्यमिदं नोपेक्षणीयमेव। तत् कस्य हेतोः?

आकल्पितं तु सुधया नन्वतिधवलं न दृश्यते चन्द्रिकया? तु इत्येवमित्यर्थः। यथा सुधाविनिर्मितः प्रासादः प्रकृत्या धवलोऽपि चन्द्रकिरणैरधिकं धवलीक्रियते तथोपदिष्टानामपि वचनानां पौनःपुन्येनावृत्त्या तान्यत्यन्तं स्पष्टतराण्येव भवन्ति। तस्मात् काव्यमिदं नोपेक्षणीयमिति। सवासनक्लेशोत्पादाभावात् महामुनिस्तावत्तथागतः। सुभाषितत्वात्तद् (वचनं) मधुरमिति।।३।।

जिनैर्बुद्धधर्मसंघशीलत्यागदेवादिषडनुस्मृतयः ।
प्रदर्शितास्तास्तु तद्गुणसम्भारैः पृथगनुस्मरणीयाश्च ।।४।।

इतः परं **जिनैर्बुद्धधर्मे**त्यादिना धर्मदेशनामाह। पापधर्मविजेतृत्वाज्जिनास्तु भगवन्तो बुद्धाः। यथोक्तम्--

पापधर्मादहं जेताऽहमुपसंक्रमणाच्च ।।

--ध.सं.(म.सू.सं.), पृ. ३३४ ;

अ.वि.सू., पृ. ६४ ; १. प्रमृष्टपापधर्मतया मृष्टगात्रता, २. विशुद्धचित्तत्वात् विशुद्धगात्रता, ३. सुविशुद्धधर्मदेशनात् विशुद्धनेत्रता, ४. व्यपगतकालधर्मविनयत्वेन व्यपगततिलकालकगात्रता।

--आलोक, पृ. ५३९।

२ ग्रन्थज्ञो देवानां प्रियो न त्वर्थज्ञः। अर्थश्च प्रतिसरणमुक्तं भगवता। .... ;
अर्थश्च प्रतिसरणमुक्तं भगवतेति। "चत्वारीमानि भिक्षवः प्रतिसरणानि। कतमानि चत्वारि? धर्मः प्रतिसरणं न पुद्गलः, अर्थः प्रतिसरणं न व्यञ्जनम्, नीतार्थसूत्रं प्रतिसरणं न नेयार्थम्, ज्ञानं प्रतिसरणं न विज्ञानम्।" इति।

--अभि.को.स्फु., पृ. २५७, बौ.भा.प्र. १९८७ ।

षडनुस्मृतय उपदिष्टाः, कतमाः षट्? तद्यथा- बुद्धानुस्मृतिः धर्मानुस्मृतिः संघानुस्मृतिः त्यागानुस्मृतिः, शीलानुस्मृतिः देवतानुस्मृतिश्च।[१]

तत्र बुद्धालम्बनानुस्मरणमेव अनुस्मृतिः। एवमेव सर्वत्र योजनीयम्। कथं पुनस्ता अनुस्मृतयो भावनीया इति चेत्? **'पृथग्'**- इत्युक्तं। बुद्धादयः प्रत्येकं गुणैरनुस्मरणीया मनसि करणीया इत्यर्थः। इह तावद् बुद्धाद्यनुस्मृतय एवोच्यन्ते, अनुस्मरणस्थानत्वात्। अतो बुद्धादिषु प्रत्येकं तद्गुणसम्भारैरनुस्मृतेषु सत्सु साधु योगो भवति।

के तावद् बुद्धादीनां गुणाः? बुद्धगुणास्तु "इत्यपि स भगवांस्तथागतोऽर्हन् सम्यक्संबुद्धो विद्याचरणसम्पन्नः सुगतो लोकविदनुत्तरः पुरुषदम्यसारथिः शास्ता देवानां च मनुष्याणां च बुद्धो भगवानिति"[२]।

---

[१] बुद्धं आरब्भ उप्पन्ना अनुस्सति बुद्धानुस्सति। बुद्धगुणारम्मणाय सतिया एतं अधिवचनं। धम्मं आरब्भ उप्पन्ना अनुस्सति धम्मानुस्सति। स्वाक्खातादिधम्मगुणारम्मणाय सतिया एतं अधिवचनं। संघ आरब्भ उप्पन्ना अनुस्सति संघानुस्सति। सुपटिपन्नतादिसंघगुणारम्मणाय सतिया एतं अधिवचनं। सीलं आरब्भ उप्पन्ना अनुस्सति सीलानुस्सति। अखण्डतादिसीलगुणारम्मणाय सतिया एतं अधिवचनं। चागं आरब्भ उप्पन्ना अनुस्सति चागानुस्सति। मुत्तचागतादिचागगुणारम्मणाय सतिया एतं अधिवचनं। देवता आरब्भ उप्पन्ना अनुस्सति देवतानुस्सति। देवता सक्खिट्ठाने ठपेत्वा अत्तनो सद्धादिगुणारम्मणाय सतिया एतं अधिवचनं। ---वि.मग्ग, ७ परि०, भाग-१, पृ. ४०९, स.सं.वि.वि.सं. १९६९ ; अ.वि.सू., पृ. ४५, के.पी.जा.शो.सं.।

[२] अष्टसाहस्रिकाप्रज्ञापारमितायामुक्तम्- यदाहं देवपुत्रा दीपंकरस्य तथागतस्यार्हतः सम्यक्संबुद्धस्यान्तिके दीपवत्यां राजधान्यामन्तरायणमध्यगतोऽनया प्रज्ञापारमितया अविरहितोऽभूवम्, तदाहं दीपंकरेण तथागतेनार्हता सम्यक्संबुद्धेन व्याकृतोऽनुत्तरायां सम्यक्सम्बोधौ- 'भविष्यसि त्वं माणव, अनागतेऽध्वनि असंख्येयैः कल्पैः शाक्यमुनिर्नाम तथागतोऽर्हन् सम्यक्संबुद्धो विद्याचरणसम्पन्नः सुगतो लोकविदनुत्तरः पुरुषदम्यसारथिः शास्ता देवानां च मनुष्याणां च बुद्धो भगवानिति'।

-अ.प्र.सू., पृ. २४, मि.सं. १९६० ;

इह भिक्षव आर्यश्रावको बुद्धेऽवेत्यप्रसादेन समन्वागतो भवति- इत्यपि स भगवांस्तथागतोऽर्हन् सम्यक्सम्बुद्धो विद्याचरणसम्पन्नः सुगतो लोकविदनुत्तरः पुरुषदम्यसारथिः शास्ता देवानां च मनुष्याणां च बुद्धो भगवानिति।

-अ.वि.सू., पृ. ४५, के.पी.जा.सं., १९७१ ;

इत्यपीत्यादयस्तथागतगुणाः। स भगवान् इति यो लोके ख्यातः प्रसिद्धः, स भगवान् स तथागत इति सर्वैः पदैः सह योगः करणीयः, स एवम्, स एवमित्यर्थः।

तत्र रागादिहन्तृत्वेन **भगवान्**। बोधिमण्डप्रस्थानकाले विघ्नकरणार्थं प्रत्युपस्थितानां माराणां हननाद् वा **भगवान्**।[1] इतरथा तावद् भगोऽस्मिन्निति भगवान्, ऐश्वर्यादिगुणोपेतत्वात्। **तथागत** इति यथा भावानां स्थितिः, तथाऽधिगतत्वाज्ज्ञातत्वाच्च तथागतः। यथा वस्तुस्थितिस्तथैव गदनाद् वा तथागतः।[2]

इतिपि सो भगवा अरहं सम्मासम्बुद्धो विज्जाचरणसम्पन्नो सुगतो लोकविदू अनुत्तरो पुरिसदम्मसारथी सत्था देवमनुस्सानं बुद्धो भगवा' ति। -महापरित्राणसूत्रम्, नागपुर-संस्करणम्, १९८७ ; वि.मग्ग, ७/२, पृ. ४१०, स.सं.वि.वि.प्र. १९६९।

[१] क्लेश-स्कन्ध-मृत्यु-देवपुत्ररूपाणां चतुर्णां माराणां भञ्जकत्वान्निरुक्त्या भगवान् इति स्मर्यते। अथवा ऐश्वर्यादिमत्त्वात् भगवान् इत्युच्यते। यथोक्तम्-

ऐश्वर्यस्य समग्रस्य रूपस्य यशसः श्रियः।
ज्ञानस्याथ प्रयत्नस्य षण्णां भग इति श्रुतिः।। -वज्र.टीका (पुनरुद्धार), पृ. ९९, ति.सं. १९९४ ;
क्लेशकर्म तथा जन्म क्लेशज्ञेयावृती तथा।
येन वैपक्षिका भग्नास्तेनेह भगवान् स्मृतः।।
इत्यार्षोक्त्या नैरुक्तविधानेन क्लेशादिकं भग्नवानिति भगवान्।
-आलोकः, पृ. २७२, मि.सं. ;

इत्यपि स भगवानित्यादि विस्तरः। एभिश्च पदैर्यथाक्रमं गुणमाहात्म्यमभिद्योतितम्। विबन्धभङ्गाच्छास्तृत्वसम्पत् वक्तृत्वप्रतिपत्तृत्वलक्षणा, येन हेतुना यथा स भगवान् भव्याभव्यान् सत्त्वानवलोक्य भव्यान् विनयति, तच्च शास्तृत्वं येषु प्रतिष्ठितं तस्याभिद्योतनात्। तत्र भगवानित्यनेन विबन्धभङ्गं दर्शयति, भग्नवानिति कृत्वा नैरुक्तेन विधिना भगवान्। कः पुनरत्र शास्तृत्वसम्पदो विबन्धः? देवपुत्रमारः। तद्भङ्गेन प्रथमतः शास्तृत्वसम्पदो लाभात्।
-अ.वि.सू.नि., पृ. २४१, के.पी.जा.सं., १९७१ ।

[२] प्रज्ञापारमिता ज्ञानमद्वयं सा तथागतः।
-प्र.पि., १ कारिका ;

अचलिता हि तथता। .... या च तथता, स तथागतः, ...या च भूतकोटिः स तथागतः, ...या चा शून्यता, स तथागतः। ....या च यथावत्ता, स च तथागतः। .....यश्च निरोधः स तथागतः। ...यश्च आकाशधातुः, स तथागतः।
---अ.प्र.सू., ३१ परि. पृ. २५३ ;

भूतवादी सुभूतेः तथागतः, सत्यवादी तथावादी अनन्यथावादी तथागतः, न वितथवादी तथागतः।
-वज्र.सू., पृ. ३६, ति.सं. १९७८ ।

अर्हन् इति क्लेशारीणां हननात्, संसारचक्रस्य अराणां वा हननाद् अर्हन्, लाभ-सत्कारादिभिः पूजार्हत्वाद् वा अर्हन्निति।[१]

सम्यक्सम्बुद्ध इति सम्यगविपरीतं समन्ताद् धर्मान् बुद्धवानिति सम्यक्संबुद्धः।[२] **विद्याचरणसम्पन्न** इति विद्याचरणाभ्यां युक्तः। ज्ञानचरणवच्छीलसमाधिभ्यां च युक्त इति विद्याचरणसम्पन्नः।[३]

---

१ पूजादक्षिणागुणप्रकर्षाद्यर्हतया अर्हन्तः ; ... हतारित्वात् अर्हन्तः। -आलोकः, पृ. २७३ मि.सं. ;

ध्यानध्येयसमाधिविमोक्षवलाभिज्ञानक्लेशदुःखविकल्पाभावादर्हन्नित्युच्यते। -लं.सू., पृ. ४९, मि.सं. ;

यस्मा रागादिसङ्खाता सब्बे पि अरयो हता।
पञ्ञासत्थेन नाथे तस्मा पि अरहं मतो ति।। -वि.मग्ग, ७/६ ;

सम्यक् समाधिवशात् सकलविकल्पक्लेशानरीन् हतवान् (इत्यर्हन्)। --अ.क., पृ. २४०

२ सर्वाकाराविपरीतधर्मदैशिकत्वेन परार्थसंपदा तथागताः। सवासनक्लेशज्ञेयावरणप्रहाणयोगात् स्वार्थसंपदा अर्हन्तः। सम्यक्संपद्वयावाहकमार्गाधिगमात् सम्यक्संबुद्धाः। -आलोकः, पृ. ३००, मि.सं. ;

तथागतोऽर्हन् सम्यक्संबुद्धः इत्येभिस्त्रिभिः पदैः शास्तृत्वसम्पदं दर्शयति। सा च शास्तृत्वसंपत् द्विधा-वक्तृत्वलक्षणा प्रतिपत्तृत्वलक्षणा च। तत्र यथैव ते धर्मा व्यवस्थितास्तथैव गदनात्तथागत इत्यनेन अविपरीतधर्मदैशिकत्वात् वक्तृत्वसंपदुक्ता। प्रतिपत्तृत्वलक्षणा च ज्ञानप्रहाणसंपद्भेदेन द्विविधा। तत्र अरीन् हतवानर्हन् इत्यनेन प्रहाणसंपदुक्ता। अरयश्च रागादयः क्लेशाः सर्वकुशलधर्मोपघातार्थेन। इयं च प्रहाणसंपत्पूर्वमुक्ता, तत्पूर्वकत्वाज्ज्ञानसंपदः। सम्यक् अविपरीतं समन्ताद्धर्मावबोधात् सम्यक्संबुद्धः इत्यनेन ज्ञानसंपदुक्ता अविपरीतसर्वज्ञज्ञानाधिगमयोगात्। तदेवमविपरीतधर्मदैशिकत्वेन सर्वक्लेशप्रहाणेन सर्वाकारधर्मावबोधेन च शास्तृत्वसंपदसाधारणा परिपूर्णा च भगवतः कथिता। तथा हि-बाह्यानामविपरीतधर्मदैशिकत्वप्राप्तिः, सर्वक्लेशाप्रहाणात्। तस्मादेते न भूतशास्तारः। श्रावकप्रत्येकबुद्धास्तु यद्यपि भूतशास्तारः सर्वक्लेशप्रहाणात्, न तु सर्वाकारसर्वधर्मशास्तारः सर्वाकारसर्वधर्मानवबोधात्। भगवान् भूतशास्ता सर्वाकारशास्ता चेति प्रतिपादितम्।

-आलोकः, पृ. ३५१, मि.सं. ;

तथागतोऽर्हन् सम्यक्सम्बुद्ध इति। एभिः पदैः शास्तृत्वसम्पदं दर्शयति। सा च शास्तृत्वसम्पद् द्विविधा। वक्तृत्वलक्षणा प्रतिपत्तृत्वलक्षणा च। वक्तृत्वमविपरीतधर्मदेशकत्वं येन भगवान् तथागत इत्युच्यते, तथैवाविपरीतधर्मं गदतीति कृत्वा। प्रतिपत्तृत्वं प्रहाणसम्पत् ज्ञानसम्पच्च। प्रहाणसम्पदा भगवानर्हन्नित्युच्यते, अरीन् हतवानिति कृत्वा नैरुक्तेन विधिना। अरयो हि क्लेशाः, सर्वकुशलधर्मोपघातार्थेन। ज्ञानसम्पदा सम्यक्सम्बुद्ध इत्युच्यते, सम्यगविपरीतं समन्ताद् धर्मान् बुद्धवानिति कृत्वा। एतावता च शास्तृत्वसम्पत् परिपूर्णा भवति- अविपरीतधर्मदेशकत्वेन, सर्वक्लेशप्रहाणेन सर्वधर्माभिसम्बोधेन च। एतच्च त्रयं भगवत्येवोपलभ्यते। अतो भगवानेवंभूतां

सुगत इति प्रशस्तं शोभनं गतवान् इति सुगतः,[१] अपुनरावृत्त्या च गत इति सुगतः सुनष्टज्वरवदिति। **लोकविद्** इति नश्यते विनश्यत इति लोकः, स च द्विविधः

सर्वाकारां शास्तृत्वसंपदं प्राप्त इति निर्दिश्यते।

---अ.वि.सू.नि., पृ. २४२, के.पी.जा.सं. ;

यथावद्वस्तुतत्त्वदेशनात् तथागतः। अथवा यथा पूर्वका नैरात्म्यद्वयमार्गेण गताः, क्लेशज्ञेयावरणप्रहाणमधिगताः, अत्रापि तथा गतत्वात् तथागतः। सर्वलोकाभ्यर्हणीयत्वात्, अरीणां क्लेशानां वा हन्तृत्वाद् अर्हन्। समस्तज्ञेयानां सम्यगववोधात् सम्यकसम्बुद्धः। एभिः पदैर्भगवतः प्रहाणज्ञानरूपा स्व-परार्थसम्पदुपदर्शिता भवति। -

-वज्र.टी.(पुनरुद्धार), पृ, १०६, ति.सं. १९९४ ;

वस्तुतत्त्वं यथास्थितिः, तथैवाधिगम्यते, अधिगतत्वात् तथागतः। अथवा पूर्वकैर्बुद्धैर्यथा वस्तुतत्त्वमधिगतमविपर्ययेण तथैवानेनाप्यधिगतमित्यधिगतत्वात् तथागतः। स च तथ्यसंवृतौ ज्ञानकायत्वेन युज्यते, न चान्यत्राविकल्पितत्वात्। तच्च गमनादि क्वचित् संवृतावपि न सम्भवति, अमूर्तत्वात्। परमार्थे तु न सम्भवतितराम्, अनुत्पन्नत्वात्। ततः स वस्तुस्वभावाधिगत्या समस्तलोकस्य ज्येष्ठत्वात् पूजनीयत्वात् अर्हन् इत्युच्यते, सम्यगवबुद्धत्वात् सम्यक्सम्बुद्धः इत्युच्यते।

--वज्र.टी.(पुनरुद्धार), पृ. २१७, ति.सं. ;

[३] अनेन शास्तृत्वसंपदः प्राप्तिहेतुं दर्शयति। तत्र विद्या सम्यग्दृष्टिः। सम्यक्संकल्पादीनि शेषाण्यङ्गानि चरणम्। यतः सम्यग्दृष्ट्या तत्त्वं दृष्ट्वा सम्यक्संकल्पादिभिश्चरणभूतैर्गच्छति। अन्यथा अपश्यन्नचरणो गन्तुमसमर्थ इति भावः। ताभ्यां सम्पन्नो युक्तः। अधिप्रज्ञं वा शिक्षा विद्या। अधिचित्तमधिशीलं च शिक्षा चरणम्। प्रज्ञायाः पूर्वपरिकर्मभूतत्वेन पुरश्चरणं चरणमिति कृत्वा। विद्यायास्तु पूर्वग्रहणं तत्परिशुद्ध्या शीलसमाध्योः परिशुद्धितः। तथा हि प्रज्ञया चक्षुषेव पश्यंस्ताभ्यां च शीलसमाधिभ्यां चरणाभ्यामिव गच्छन् गन्तव्यमनुप्राप्नोतीति विद्याचरणशब्देन तिस्रः शिक्षा निर्दिश्यन्ते।

--आलोक, पृ. ३५२, मि.सं. ;

विद्याचरणसम्पन्न इत्यनेन तस्याः शास्तृत्वसम्पदः प्राप्तिहेतुत्वं दर्शयति। विद्याचरणमार्याष्टाङ्गो मार्गः। सम्यग्दृष्टिर्विद्या। शेषाण्यङ्गानि चरणम्, न ह्यपश्यन्नचरणो वा गन्तुं समर्थो भवतीति कृत्वा। तिस्रो वा शिक्षा विद्याचरणम्। अधिप्रज्ञशिक्षा विद्या, अधिशीलमधिचित्तं च शिक्षे चरणम्, प्रज्ञायाः पूर्वपरिकर्मत्वात् पुरश्चरणं चरणमिति कृत्वा। विद्यायास्तु पूर्वग्रहणं तत्परिशुद्ध्या शीलसमाधिपरिशुद्धितः। तथा हि प्रज्ञया चक्षुषेव पश्यन् ताभ्यां शीलसमाधिभ्यां चरणाभ्यामिव गच्छन् गन्तव्यमनुप्राप्नोति (इति) विद्याचरणशब्देन तिस्रः शिक्षा निर्दिश्यन्ते।

-अ.वि.सू.नि., पृ. २४३, के.पी.जा.सं., १९७१ ।

[१] सुगत इत्यनेन यथागन्तव्यं गतस्तं दर्शयति। सुष्ठु गतः सुगतोऽपुनरावृत्त्यर्थेन, सुनष्टज्वरवत्। निःशेषं वा गतः सुगतः निःशेषज्ञेयगमनार्थेन, सुपूर्णघटवत्। एतच्चार्थद्वयं बाह्यश्रावकादिभ्यो विशेषणार्थम्। बाह्या हि न सुष्ठु गताः पुनरावृत्तितः। श्रावकादयो यद्यपि सुष्ठु गताः, पुनः पृथग्जनताया अभव्यत्वात्,

सत्त्वलोको भाजनलोकश्च।[1] तयोः परिज्ञानाद् लोकविदिति। द्वादशाङ्गप्रतीत्यसमुत्पादव्यवस्थायाः[2] परिज्ञानात् सत्त्वलोकवित्, भूमिपर्वतादिमहाभूतादीनां स्थितिपरिमाणादिपरिज्ञानाच्च भाजनलोकविदिति

न तु निःशेषं गताः, सर्वज्ञेयेषु ज्ञानविबन्धत्वात्।

--अ.वि.सू.नि., पृ. २४४, के.पी.जा.सं. १९७१ ;

हेतोः प्रहाणं त्रिगुणं सुगतत्वमनिःश्रयात्।।
दुःखस्य शस्तं नैरात्म्यदृष्टेश्च युक्तितोऽपि वा।
पुनरावृत्तिरित्युक्तो जन्मदोषसमुद्भवौ ।।

सुगतत्वं व्याचिख्यासुराह- हेतोः समुदयस्य प्रहाणं निरोधः सुगतत्वम्, तच्च त्रिगुणं गुणत्रययुक्तम्। सुशब्दस्य त्रिविधोऽर्थः -- १. प्रशस्ता सुरूपवत्, २. अपुनरावृत्तिः सुनष्टज्वरवत्, ३. निःशेषता च सुपूर्णघटवत्। तत्र प्रशस्तं भगवान् ज्ञातवान्, सुगतः इति प्रशस्तार्थमाह-- अनिःश्रयाद् अनाश्रयणाद् दुःखस्य शस्तं सुगतत्वम्। तत् पुनर्दुःखानाश्रयणं नैरात्म्यदृष्टेः। आत्मदर्शी ह्यात्मनि स्निह्यन् तद्दुःखसुखपरिहारप्राप्तीच्छया जन्म दुःखरूपमादत्ते, प्रहीणात्मदर्शनस्तु नैतादृश इति प्रहीणदुःखोपायो युक्तितोऽपि वा युक्तिपरिदृष्टेनोपायेन वा गमनात् तत्सुगतत्वं प्रशस्तम्।। अथवा-- अपुनरावृत्त्या गमनं सुगतत्वम्, तदाख्यातुमाह-- जन्मनो रागादेश्च दोषस्य समुद्भवौ पुनः पुनरावर्तनात् पुनरावृत्तिरित्युक्तौ।।

--प्र.वा. १/१४१,१४२ का., प्र,वा.वृ., पृ. ४४-४५, बौ,भा.प्र., १९९४ ;

तथा हि-- लोकत्तरेण मार्गेण शोभनं ज्ञानप्रहाणसंपदं गतः सुगतः सुरूपवत्। अपुनरावृत्त्या वा सुष्ठु गतः सुगतः सुनष्टज्वरवत्। निःशेषं वा गतः सुगतः सुपरिपूर्णघटवत्। अर्थत्रयं चैतद्बाह्यवीतरागशैक्षाशैक्षेभ्यो विशेषणार्थम्। तथा हि-- आत्मविपर्यासेन बाह्यवीतरागा न शोभनं गताः। शैक्षास्तु संसारे पुनर्जन्मग्रहणान्न सुष्ठु गताः। अशैक्षाः पुनः सर्वज्ञेयेषु ज्ञानविबन्धान्न निःशेषं गताः।

--आलोकः, पृ. ३५२, मि.सं. ;

नैरात्म्यद्वयमार्गेण सम्यग् गत इति सुष्ठुरूपेण गतः सुगतः, सुरूपवदिति। अथवा निखिलसवासनाशेषक्लेशज्ञेयावरणानि प्रहाय गतः सुगतः, सुपूर्णघटवत्। अथवा अपुनरावृत्त्या गतः सुगतः, सुनष्टज्वरवत्। --वज्र.टी.(पुनरुद्धार), पृ. १०६, ति.सं. १९९४।

[1] नरकप्रेततिर्यञ्चो मनुष्याः षट् दिवौकसः।
कामधातुः ....।।
तत्र भाजनलोकस्य सन्निवेशमुशन्त्यधः।
लक्षषोडशकोद्वेधमसंख्यं वायुमण्डलम्।।

---अभि.को., ३/१, ४५ कारिका।

[2] द्रष्टव्यम्--- धर्मसंग्रहः, पृ. ३३१(म.सू.सं.), मि.सं. ; अभि.को., ३/२०, पृ. ४३५, बौ.भा.प्र., १९८७ ; अ.वि.सू., पृ. ५, के.पी.जा.सं. १९७१ ; प्रतीत्यसमुत्पादो नाम-म.सू., पृ. ११९(म.सू.सं.), मि.सं. ; अभि.समु., पृ. २६, वि.भा.प्र. १९५०।

लोकविदुच्यते। इतरथापि भद्रलोकव्यवहारपरिज्ञानाद् वा लोकविदिति।[1] **अनुत्तरः पुरुषदम्यसारथिः**[2] इत्यत्र दमयितुं योग्या दम्याः। पुरुषा एव दमनार्हा इति पुरुषदम्याः,

---

[1] अस्याश्च शास्तृत्वसंपदो द्विविधं कर्मेति प्रथमं भव्याभव्यलोकावलोकनं कर्म दर्शयति-- लोकविद् इति। भव्याभव्यलोकपरिज्ञानादसौ लोकविदुच्यते। तथा हि-- भगवान् त्रिःकृत्वो रात्रेस्त्रिःकृत्वो दिवसस्य सम्यग् बुद्धचक्षुषा लोकं व्यवलोकयति।

--आलोकः, पृ. ३५२, मि.सं. ;

लोकविदित्यनेन भव्याभव्यलोकावलोकनं दर्शयति। लोकं वेत्तीति लोकवित्। भव्याभव्यलोकपरिज्ञानादसौ लोकविदित्युच्यते। तथा हि भगवांस्त्रिः कृत्वा रात्रेस्त्रिः कृत्वा दिवसस्य च बुद्धचक्षुषा लोकं व्यवलोकयति-- को हीयते, को वर्धते, कः कृच्छ्रप्राप्तः, कः सङ्कटप्राप्तः, कोऽपाये निमग्नः, कमहमपायादुद्धृत्य स्वर्गे मोक्षे च प्रतिष्ठापयेयम्, कस्यानवरोपितानि कुशलमूलान्यवरोपयेयम्, कस्यावरोपितानि परिपाचयेयम्, कस्य परिपक्वानि परिमोचयेयमिति।

--अ.वि.सू.नि., पृ. २४५, के.पी.जा.सं. १९७१।

[2] अनुत्तरः पुरुषदम्यसारथिरित्यनेन भव्यविनयं दर्शयति। भव्याभव्यांल्लोकानवलोक्य भगवान् ये पुरुषदम्या दमनार्हा दमयितुं वा शक्यास्तान् विनयति, सारथिभावगमनात्। दमनं हि सारथिभावः। अनुत्तरग्रहणं सारथिभावविशेषणार्थम्। दुर्दमानामपि केषांचित् पुरुषदम्यानां तीव्ररागद्वेषमोहानामार्यसुन्दरानन्दाङ्गुलिमालोरुविल्वकाश्यपप्रभृतीनां दमनात्। उत्तमार्थे निर्वाणेऽपुनरावृत्तितो दमनादिति अनुत्तरः पुरुषदम्यसारथिरित्युच्यते। भव्यानां विनयादेवमुच्यते। ये पुनरभव्याः तेषु कथं प्रवर्तते? तानपि दारिद्र्यदुर्गतिदुःखपरित्राणेन भोगसुगत्यादिसुखे प्रतिष्ठापयति। भव्यांस्तु नियतगोत्रकान् श्रावकादिबोधौ यथाभव्यतया प्रतिष्ठापयति। अनियतान् पुनः प्रत्ययबलेन हीनाद् व्यावर्त्य प्रणीते प्रतिष्ठापयति।

---अ.वि.सू.नि., पृ. २४५-२४६, के,पी.जा.सं., १९७१ ;

भव्याभव्यांल्लोकान् व्यवलोक्य भगवान् ये पुरुषा एव दम्या दमानार्हा दमयितुं वा शक्या भव्यास्तान् विनयति। तेषां सारथिभावगमनात्। विनयनं हि सारथिभावः, असन्मार्गादपनीय सन्मार्गे प्रतिष्ठापकत्वात् गुणविशेषाधायकत्वाच्च, अश्वादिसारथिवत्। अनुत्तरग्रहणं सारथिभावविशेषणार्थम्। दुर्दमानामपि केषांचित् पुरुषदम्यानां तीव्ररागद्वेषमोहमानानामार्यसुन्दरानन्दाङ्गुलीमालोरुविल्वकाश्यपमहाराजकप्फिणप्रभृतीनां विनायक इति प्रदर्शनार्थम्। --आलोक, पृ ३५२, मि.सं. ;

द्रष्टव्यम्--

स्थायिनां त्वं परिक्षेप्ता विनियन्तापहरिणाम्।
समाधाता विजिह्मामानां प्रेरको मन्दगामिनाम्।। १०२।।

नियोक्ता धुरि दान्तानां खटुङ्कानामुपेक्षकः।
अतोऽसि नरदम्यानां सत्सारथिरनुत्तरः ।। १०३।।

--बुद्धस्तोत्रशतपञ्चशत्कः, लद्दाखरत्नश्रीदीपिका, १९९८।

तेषां सारथिः पुरुषदम्यसारथिस्तेषां दमनात्। **अनुत्तरः** श्रावकप्रत्येकबुद्धेभ्यो विशिष्टत्वात्। अत्र दम्यास्तावद् अप्राप्तार्यमार्गाः, तेषां सम्यग् दमनं भवति, ते नैव पुनः खटुङ्कस्वभावतया (तीव्ररागद्वेषादिस्वभावेन) परिवर्तन्ते।

शास्ता देवानां च मनुष्याणां च[१] इत्यत्र प्रशस्यत्वाद् आर्यमार्गस्य भाजनत्वाच्च देवमनुष्यौ कथितौ, अविपरीतानुशासनाद् शास्ता, यथाशयं धर्मदेशनया तथागतस्येमे गुणा विभज्यन्ते।

बुद्धो भगवानिति[२] तत्त्वावबोधाद् बुद्धः। अप्रकटितोऽत्र पदान्तरः (तत्त्वशब्दः)। अथवा बुद्धेः पर्यन्तविकासाद् वा बुद्धः, अवबुद्धानि पद्मानि यथा। अविद्यानिद्रातो विबुद्धत्वाद् वा बुद्धः, अवबुद्धपुरुष इव। एते पदार्था अत्र संगृह्यन्ते । विस्तरस्तु अन्यशास्त्रेभ्योऽवगन्तव्यम्। उक्ता बुद्धानुस्मृतिः।

---

[१] शास्ता देवानां च मनुष्याणां च इत्यनेन येषु तच्छास्तृकर्म प्रतिष्ठितं तान् दर्शयति। यद्यपि भगवान् विशेषेण सत्त्वानां स्वर्गापवर्गमार्गोपदेशाच्छास्ता, यत्र त्वार्यदर्शनं श्रामण्यफलप्राप्तिश्च प्रज्ञायते तेषामिहाधिकारः। यथार्थानुशासनमत्र शास्तृकर्माभिप्रेतम्। तस्य च देवमनुष्या भाजनम्। अतो देवमनुष्याणामित्युच्यते।

---अ.वि.सू.नि., पृ. २४६, के.पी.जा.सं. १९७१ ;

यद्यपि भगवान् न विशेषेण सर्वसत्त्वानां स्वर्गापवर्गमार्गोपदेशेन शास्ता, तथापि यत्र त्वार्यसत्यदर्शनं श्रामण्यफलप्राप्तिश्च प्रज्ञायते, तत्र मुख्यतो यथार्थानुशासनं भगवतः शास्तृकर्मस्थितिः। तस्य च देवमनुष्या भाजनम्। अतः शास्ता देवानां च मनुष्याणां चेत्युच्यते। --आलोकः, पृ. ३५२, मि.सं. ।

[२] बुद्धो भगवानिति पुनरेतत्पदद्वयं किमर्थम्? नवभिरेव पदैर्यथोक्तैः सकलं विवक्षितं गुणमाहात्म्यमभिद्योतितम्। यत्रैतद् गुणमाहात्म्यं स बुद्धो भगवानिति प्रदर्शनार्थम्। पदानां पुनः पिण्डार्थः ---

भङ्क्त्वा विबन्धं शास्तृत्वसम्पदं यो हि येन सः।
तथागतः शास्तृकर्म यच्च यैश्च परिग्रहः।।
इत्येतत्परिदीपितमिति। ---अ.वि.सू.नि., पृ. २४७, मि.सं. १९७१ ;

तत्र सकलपदार्थावबोधेन प्रकृष्टा बुद्धिरस्येति बुद्धः। अकारप्रत्ययोऽत्र अर्शआदेराकृतिगणत्वेन कार्यः। प्रकृष्टा च बुद्धिर्नवभिराकारैः -- सर्वज्ञानेन, अयत्नज्ञानेन, अनुपदिष्टज्ञानेन, सवासनक्लेशावरणप्रहाणज्ञानेन, निखिलज्ञेयावरणप्रहाणज्ञानेन, सर्वाकारसर्वसत्त्वार्थकरणशक्त्या, करुणासम्पत्त्या, अक्षयतासम्पत्त्या, अतुलतासम्पत्त्या च। समग्रैश्वर्यादियोगेन भगवान्।

---आलोकः, पृ. २५२-२५३, मि.सं. ।

धर्मगुणाः - स्वाख्यातादयः, तद्यथा- स्वाख्यातो भगवतो धर्मः सान्दृष्टिको निर्ज्वर आकालिक औपनयिक ऐहिपश्यिकः प्रत्यात्मवेद्यो विज्ञैरिति।[1]

द्विविधो धर्मः- देशनाधर्मः अधिगमधर्मश्च।[2] तत्र स्वाख्यात इत्यनेन आदि-मध्य-पर्यवसान-कल्याणतया देशनाधर्म उक्तः, अवशिष्टैः पदैः अधिगमधर्मो भाषित इति संग्रहार्थः। पदबाहुल्यभयान्नात्र विस्तारोऽनुष्ठितः।

---

[1] धर्मेऽवेत्य प्रसादेन समन्वागतो भवति-- स्वाख्यातो भगवता धर्मः सांदृष्टिको निर्ज्वर आकालिक औपनयिक ऐहिपश्यिकः प्रत्यात्मवेद्यो विज्ञैः यदुत-- मदनिर्मदनः, पिपासाप्रतिविनयः, आलयसमुद्घातः, धर्मोपच्छेदः, शून्यतोपलम्भः, तृष्णाक्षयः, विरागः, निरोधः, निर्वाणम्।

--अ.वि.सू., पृ. ४५, मि.सं. ;

स्वाक्खातो भगवता धम्मो सन्दिट्ठिको अकालिको एहिपस्सिको ओपनेय्यिको पच्चतं वेदितब्बो विञ्ञूही' ति एवं परियत्तिधम्मस्स चेव नवविधस्स च लोकुत्तरधम्मस्स गुणा अनुस्सरितब्बा।

--वि.मग्ग, ७/४७, भाग-१, पृ. ४६८, स.सं.वि.वि.सं. १९६९ ;

स्वाख्यातो भगवता धर्मः सांदृष्टिक इत्यादि। यथासूत्रं स्वाख्यात इत्युद्देशः। शेषोऽस्य निर्देशः। तत्राविपरीतधर्मसमाख्यानात् स्वाख्यातः। दृष्टार्थत्वात् सांदृष्टिकः, न तु श्रद्धामात्रगम्यः। क्लेशानुशयप्रतिपक्षत्वान्निर्ज्वरः। अपरिहाणीयत्वादाकालिकः, सर्वकालं परिहाण्यसम्भवात्, क्लेशप्रहाणं प्रति कालनियमा-भावाद्वा। अशेषदुःखनिर्याणोपनयनादौपनायिकः। असाधारणत्वादैहिपश्यिकः ; इहपश्येषु भावादिहपश्यः, इहधार्मिकः, इहैव तथात्वं पश्यन्तीति कृत्वा। अतर्क्यत्वात् प्रत्यात्मवेदनीयः। विज्ञैरित्यार्यैः। अनभिलाप्यत्वाद्वा प्रत्यात्मवेदनीयो विज्ञैरित्युच्यते। एभिश्चाष्टाङ्गो मार्गः समाख्यातः। बाह्यधर्माद्वा बौद्धधर्मस्य विशेषः परिदीपितः। बाह्यकानां धर्मा दुराख्यत्वात् न स्वाख्याताः। अदृष्टार्थत्वान्न सांदृष्टिक इत्येवमन्यत्रापि योज्यम्।

---अ.वि.सू.नि., पृ. २४८-२४९, के.पी.जा.सं. १९७१ ;

महायानोत्तरतन्त्रेऽपि धर्ममाहात्म्यमेवमुक्तम्---

यो नासन्न च सन्न चापि सदसन्नान्यः सतो नासतो-
ऽशक्यस्तर्कयितुं निरुक्त्यपगतः प्रत्यात्मवेद्यः शिवः।
तस्मै धर्मदिवाकराय विमलज्ञानावभासत्विषे
सर्वालम्बन-रागद्वेषतिमिर-व्याघातकर्त्रे नमः।। ---म.उ.तं., १/९

[2] सद्धर्मो द्विविधः शास्तुरागमाधिगमात्मकः।
धातारस्तस्य वक्तारः प्रतिपत्तार एव च ।।

तत्रागमः सूत्रविनयाभिधर्माः, अधिगमो बोधिपक्ष्याः --इत्येष द्विविधः सद्धर्मः। आगमस्य हि धारयितारो वक्तारः। अधिगमस्य प्रतिपत्तारः। अतो यावदेते स्थास्यन्ति तावत् सद्धर्म इति वेदितव्यम्। तेषां तु वर्षसहस्रमवस्थानमाहुः। अधिगमस्यैवम्। आगमस्य तु भूयांसं कालमित्यपरे।

--अभि.को.भा. ८/३९, पृ. ११८६, बौ.भा.प्र. १९८७ ।

संघगुणाः - सुप्रतिपन्नादयः, तद्यथा- सुप्रतिपन्नो भगवतः श्रावकसंघः, न्यायप्रतिपन्नः ऋजुप्रतिपन्नः सामीचीप्रतिपन्नः, यदुत चत्वारि पुरुषयुगानि अष्टौ पुरुषपुद्गलाः, एष भगवतः श्रावकसंघः आहवनीयः प्राहवनीयः अञ्जलिकरणीयः दक्षिणीयः अनुत्तरं पुण्यक्षेत्रं लोकस्येति।[१]

संग्रहार्थस्तावदत्र आर्यसंघस्य शैक्षाशैक्षद्विविधगुणनिर्देशः। सुप्रतिपन्नादिभिः पदचतुष्कैः प्रतिपत्तिगुणाः, आहवनीयादिभिः सर्वदा पूज्यत्वादिगुणाश्च प्रदर्शिताः।

त्यागगुणाः - अहो, मात्सर्यमलसमुत्थानानां जनानां मध्ये मात्सर्यमलरहितेन चित्तेन स्थित्वा योऽहं यायजूकः प्रसृतपाणिः व्यवसर्गरतः दानसंविभागरतश्चास्मि, सोऽहं तान् गुणान् सम्प्राप्तोऽस्मीति। अत्र तावत् स्वसन्तानान्तर्गतो दानगुणः, मात्सर्यमलप्रहाणं, दानशीलता, वीर्यारब्धकायता, वस्तुपरित्यागः त्यागाभिरतिश्चेति (गुणाः) सन्दर्शिताः।[२]

---

[१] सङ्घेऽवेत्यप्रसादेन समन्वागतो भवति। सुप्रतिपन्नो भगवतः श्रावकसंघः, न्यायप्रतिपन्नः, ऋजुप्रतिपन्नः, सामीचीप्रतिपन्नः, धर्मानुधर्मप्रतिपन्नः, अनुधर्मचारी। सन्ति संघे स्रोतआपत्तिफलसाक्षात्क्रियायै प्रतिपन्नकाः, सन्ति संघे स्रोतआपन्नाः, सन्ति संघे सकृदागामिफलसाक्षात्क्रियायै प्रतिपन्नकाः, सन्ति संघे सकृदागामिनः, सन्ति संघे अनागामिफलसाक्षात्क्रियायै प्रतिपन्नकाः, सन्ति संघे अनागामिनः, सन्ति संघे अर्हत्वफलसाक्षात्क्रियायै प्रतिपन्नकाः, सन्ति संघे अर्हन्तः ; यदुत्-- चत्वारि पुरुषयुगानि, अष्टौ पुरुषपुद्गलाः। एष भगवतः श्रावकसंघः शीलसम्पन्नः, समाधिसम्पन्नः, श्रद्धासम्पन्नः, श्रुतसम्पन्नः, विमुक्तिसम्पन्नः, विमुक्तिज्ञानदर्शनसम्पन्नः, आहवनीयः, प्राहवनीयः, अञ्जलिकरणीयः, सामीचीकरणीयः, अनुत्तरं पुण्यक्षेत्रं दक्षिणीयो लोकस्य। --अ.वि.सू., पृ. ४६-४७, के.पी.जा.सं. १९७१ ; पुनश्च द्रष्टव्यम्--अ.वि.सू.नि., पृ. २५०-२५५, के.पी.जा.सं., १९७१ ;

सुप्पटिपन्नो भगवतो सावकसंघो, उजुप्पटिपन्नो भगवतो सावकसंघो, ञायप्पटिपन्नो भगवतो सावकसंघो, सामीचिप्पटिपन्नो भगवतो सावकसंघो, यदिदं चत्तारि पुरिसयुगानि अट्ठ पुरिसपुग्गला, एस भगवतो सावकसंघो आहुनेय्यो, पाहुनेय्यो, दक्खिणेय्यो, अञ्जलिकरणीयो, अनुत्तरं पुञ्ञक्खेत्तं लोकस्सा' ति एवं अरियसंघगुणा अनुस्सरितब्बा।

--वि.मग्ग, ७/६४, पृ.४८४, भाग-१, स.सं.वि.वि.सं. १९६९।

[२] चागानुस्सतिं भावेतुकामेन पन पकतिया चागाधिमुत्तेन निच्चप्पवत्तदानसंविभागेन भवितब्बं। अथ वा पन भावनं आरभन्तेन इतो दानि पभुति सति पटिग्गाहके अन्तमसो एकालोपमत्तम्पि दानं अदत्वा न भुञ्जिस्सामी ति समादानं कत्वा तंदिवसं गुणविसिट्ठेसु पटिग्गाहकेसु यथासत्ति यथाबलं दानं दत्वा तत्थ निमित्तं गण्हित्वा रहोगतेन पटिसल्लीनेन "लाभा वत मे, सुलद्धं वत मे, योहं

शीलगुणाः - शीलं तावन्मामकीनम् अखण्डम् अपरामृष्टम् अशबलम् अकल्मषं भुजिष्यं विज्ञप्रशस्तं समाधिप्रतिपन्नं चेति। अत्रापि स्वसन्तानान्तर्गतः शीलगुण एव निर्दिष्टः। पदव्याख्यानं त्वधस्तात् प्रदर्शयिष्यते।[1]

देवगुणाः - चातुर्माहाराजिक-त्रायस्त्रिंशदेवेभ्य आरभ्य परनिर्मितवशवर्तिदेवपर्यन्ताः। तेषां देवानां तदीयानां गुणानां च यदनुस्मरणं (सा देवानुस्मृतिः) तत् क्रियते। तत्रोपपन्नानां देवानां उत्पाद-सन्तत्यादयः, तेषां शील-समाधि-प्रज्ञादयश्च गुणा देवगुणा इत्युच्यन्ते। अर्थतोऽत्र स्वगुणानेव देवगुणसमान्

मच्छेरमलपरियुट्ठिताय पजाय विगतमलमच्छेरेन चेतसा विहरामि, मुत्तचागो पयतपाणि वोस्सग्गरतो याचयोगो दानसंविभागरतो" ति एवं विगतमलमच्छेरतादिगुणवसेन अत्तनो चागो अनुस्सरितब्बो।

--वि.मग्ग, ७/७९, पृ. ४९३, भाग-१, स.सं.वि.वि. १९६९ ;

एवं नारायणपरिपृच्छायामप्युक्तम्-- न तद्वस्तूपादातव्यं यस्मिन् वस्तुनि नास्य त्यागचित्तमुत्पद्यते। न त्यागबुद्धिः क्रमेत। न स परिग्रहः परिग्रहीतव्यो यस्मिन् परिग्रहे नोत्सर्जनचित्तमुत्पादयेत्, न स परिवार उपादातव्यो यस्मिन् याचनकैर्याच्यमानस्य परिग्रहबुद्धिरुत्पद्यते। न तद्राज्यमुपादातव्यम्, न ते भोगाः, न तद्रत्नमुपादातव्यम्, यावन्न तत्किंचिद्वस्तूपादातव्यम्, यस्मिन् वस्तुनि बोधिसत्त्वस्यापरित्यागबुद्धिरुत्पद्यते। अपि तु खलु पुनः कुलपुत्र बोधिसत्त्वेन महासत्त्वेनैवं चित्तमुत्पादयितव्यम्-- अयं ममात्मभावः सर्वसत्त्वेभ्यः परित्यक्तः उत्सृष्टः, प्रागेव बाह्यानि वस्तूनि। यस्य यस्य सत्त्वस्य येन येन यद्यत्कार्यं भविष्यति, तस्मै तस्मै तद्दास्यामि सत्संविद्यमानम्। हस्तं हस्तार्थिकेभ्यो दास्यामि, पादं पादार्थिकेभ्यो नेत्रं नेत्रार्थिकेभ्यो दास्यामि, मासं मांसार्थिकेभ्यः, शोणितं शोणितार्थिकेभ्यो मज्जानं मज्जार्थिकेभ्योऽङ्गप्रत्यङ्गान्यङ्गप्रत्यङ्गार्थिकेभ्यः, शिरः शिरोऽर्थिकेभ्यः परित्यक्ष्यामि। कः पुनर्वादो बाह्येषु वस्तुषु यदुत धनधान्य-- ....।

--शि.समु.(उद्धृतं), पृ. १६, मि.सं. १९६० ।

[1] आर्यकान्तैः शीलैः समन्वागतो भवति। यानि च तानि शीलानि अखण्डानि, अच्छिद्राणि, अशबलानि, अकल्मषाणि, भुजिष्याणि, अपरामृष्टानि, सुमाप्तानि, सुसमारब्धानि, विज्ञप्रशस्तानि, अगर्हितानि च विज्ञैरिति। --अ.वि.सू., पृ. ४७, के.पी.जा.सं. ;

सीलानुस्सतिं भावेतुकामेन पन रहोगतेन पटिसल्लीनेन "अहो वत मे सीलानि अखण्डानि अच्छिद्दानि असबलानि अकम्मासानि भुजिस्सानि विञ्ञुप्पसत्थानि अपरामट्ठानि समाधिसंवत्तनीकानी" ति एवं अखण्डतादिगुणवसेन अत्तनो सीलानि अनुस्सरितब्बानि। तानि च गहट्ठेन गहट्ठसीलानि, पब्बजितेन पब्बजितसीलानि।

--वि.मग्ग, ७/७६, पृ. ४९०, भाग-१, स.सं.वि.वि. १९६९ ;

शीलादपि वरं भ्रंशो न तु दृष्टेः कदाचन।
शीलेन गम्यते स्वर्गो दृष्ट्या याति परं पदम्।। --चतु., १२/११ ।

विधाय तदनुस्मरणमेवानुस्मृतिरिति।[१] षडनुस्मृतिस्थानानां चित्तविशोधकत्वात् बहुतरपुण्यहेतुकत्वाच्च आदावेव निर्देशः।

तत्र श्रद्धायुक्तेन चित्तेन सदा कुशलमेवाचरणीयमिति निर्देष्टुमुक्तम्--

दशकुशलाः कर्मपथाः कायवाक्चित्तैः सर्वदाऽभ्यसनीयाः ।
मद्यादिभिर्निवृते पुण्यमयैश्चाजीवैः सुप्रसन्नः स्याः ।।५।।

दशकुशलाः कर्मपथा[२] इत्यादि। अभीष्टफलदायकत्वात् कुशलम्, क्रियास्वरूपत्वात् कर्म, सुगतीनां मार्गत्वात् कर्मपथाः। कतमे च ते दश

---

[१] देवतानुस्सर्तिं भावेतुकामेन पन अरियमग्गवसेन समुदागतेहि सद्धादीहि गुणेहि समन्नागतेन भवितब्बं। ततो रहोगतेन पटिसल्लीनेन "सन्ति देवा चातुमहाराजिका, सन्ति देवा तावतिंसा, यामा, तुसिता, निम्मानरतिनो, परनिम्मितवसवत्तिनो, सन्ति देवा ब्रह्मकायिका, सन्ति देवा ततुत्तरि, यथारूपाय सद्धाय समन्नागता ता देवता इतो चुता तत्थ उपपन्ना, मय्हम्पि तथारूपा सद्धा संविज्जति। यथारूपेन सीलेन। यथारूपेन सुतेन। यथारूपेन चागेन। यथारूपाय पञ्ञाय समन्नागता ता देवता इतो चुता तत्थ उपपन्ना, मय्हम्पि तथारूपा पञ्ञा संविज्जती" ति एवं देवता सक्खिट्ठाने ठपेत्वा अत्तनो सद्धादिगुणा अनुस्सरितब्बा। --वि.मग्ग, ७/८४, पृ. ४९६, भाग-१, स.सं.वि.वि.सं. १९६९।

[२] प्राणातिपातः कतमः। वधाभिप्रायस्य क्लिष्टचेतसः परप्राणिनि तत्रैव वधयोगे वधनिष्ठायां यत्कायकर्म। अदत्तादानं कतमत्। अपहाराभिप्रायस्य क्लिष्टचेतसः परपरिगृहीते वस्तुनि तत्रैवाहारप्रयोगे तत्रैवापहारनिष्ठायां यत्कायकर्म। काममिथ्याचारः कतमः। सेवाभिप्रायस्य क्लिष्टचेतसः अगम्यानङ्गादेशाकालेषु तत्रैव काममिथ्याचारप्रयोगः काममिथ्याचारनिष्ठायां च यत्कायकर्म।

मृषावादः कतमः। विनिधाय संज्ञां वक्तुकामस्य क्लिष्टचेतसः परसत्त्वे तत्रैव कूटसाक्षिप्रयोगे कूटसाक्षिनिष्ठायां च यद्वाक्कर्म। पैशुन्यं कतमत्। भेदाभिप्रायस्य क्लिष्टचेतसः परसत्त्वेषु तत्रैव भेदप्रयोगे भेदनिष्ठायां च यद्वाक्कर्म। पारुष्यं कतमत्। परुषं वक्तुकामस्य क्लिष्टचेतसः परसत्त्वेषु तत्रैव परुषवचनप्रयोगे परुषवचननिष्ठायां च यद्वाक्कर्म। संभिन्नप्रलापः कतमः। प्रलपितुकामस्य क्लिष्टचेतसोऽबद्धप्रलापप्रयोगेऽबद्धप्रलापनिष्ठायां च यद्वाक्कर्म।

अभिध्या कतमा। परस्वीकरणाभिप्रायस्य क्लिष्टचेतसः परस्वीकरणाभिप्राये निश्चयप्रयोगे तन्निष्ठायां च यन्मनस्कर्म। व्यापादः कतमः। परव्यापादाभिप्रायस्य क्लिष्टचेतसः परव्यापादाभिप्रायनिश्चयप्रयोगे तन्निष्ठायां च यन्मनस्कर्म। मिथ्यादृष्टिः कतमा। अपवादाभिप्रायस्य क्लिष्टचेतसोऽपवादाभिप्रायनिश्चयप्रयोगे तन्निष्ठायां च यन्मनस्कर्म।

प्राणातिपातविरतिः कतमा। प्राणातिपात आदीनवाभिप्रायस्य कुशलचेतसस्तत्संयमप्रयोगे तत् संयमनिष्ठायां च यत्कायकर्म। यथा प्राणातिपातविरतिरेवमदत्तादानकाममिथ्याचार-

मृषावादपैशुन्यपारुष्यसंभिन्नप्रलापाभिध्याव्यापाद-मिथ्यादृष्टिविरतयो वेदितव्याः।

--यो.भू., पृ. १८१-१८२, कलकत्ता विश्वविद्यालय, १९५७ ;

तत्र प्राणातिपातः परेषां जीवितक्षयः। स्थानाच्चौर्येण परद्रव्यावर्जनमदत्तादानम्। अनङ्गादौ स्त्र्याद्यभिगमनं काममिथ्याचारः।

वल्कलैः सगुडैः काचित्क्रियते मधुनापरा।
पिष्टकिण्वजलैरन्या सुरा ज्ञेया त्रिधा बुधैः।।

मैरेयं गुडधात्र्यम्बुधातकीसंस्कृतं विदुः।
मदयेदशितं पीतं यत्तन्मद्यमिति स्मृतम्।।

तदेतत् त्रिविधं सर्वं शुक्लधर्मविपक्षतः।
प्रमादस्थानमित्याह प्रसङ्गादागतं पुनः।।

अभूताभिधानमनृतवचनम्। परभेदकं वचः पिशुनवचनम्। अप्रियाभिधानं परुषवचनम्। सर्वक्लेशजनितं वाक्यं संभिन्नप्रलापः। अभिध्या परद्रव्येषु विषमस्पृहा। व्यापादः सत्त्वविद्वेषः। नास्तीति दृष्टिर्मिथ्यादर्शनम्।

---आलोकः, पृ. ४७५, मि.सं. ;

दशकर्मपथा उक्ता यथायोगं शुभाशुभाः। --अभि.को., ४/६६ ;

कायवाङ्मनसां दशकुशलेषु कर्मपथेषु व्यापारः। तत्र कायिकं त्रिविधम्-- प्राणातिपातादत्तादानकाममिथ्याचाराद् विरतिः। वाचिकं चतुर्विधम्-- अनृतपैशुन्यपारुष्यसम्भिन्नप्रलापाद् विरतिः। मानसं त्रिविधम्-- अभिध्याव्यापादमिथ्यादृष्टिभ्यो विरतिः।

--अ.वि.सू., पृ. ३६, के.पी.जा.सं. १९७१ ;

प्राणातिपातस्याकुशलकर्मपथस्य विपाकेन पृथिव्या ओजश्च तेजश्चान्तर्धीयते। तस्यैव च कर्मणो विपाकेनाल्पायु- र्भवति। अदत्तादानस्याकुशलस्य कर्मपथस्य विपाकेन पृथिव्यामशनिशुकशलभमूषिककीट-प्रभृतयः(सस्यघातका) उत्पद्यन्ते। तस्यैव कर्मणो विपाकेन भोगव्यसनमधिगच्छति। काममिथ्याचारस्याकुशलस्य कर्मपथस्य विपाकेन पृथिव्यां तृणदर्भादीनि दुर्गन्धीनि प्रादुर्भवन्ति। तस्यैव कर्मणो विपाकेन सम्पन्नगृहावासं प्रविशन्ति। अत्रावदानं श्वभ्रपदस्य सुसुधी दारिका काशिराज्ञःपत्नी। देवावतरणे कालोदयिनः पूर्वजन्मन्यवदानं वक्तव्यम्।

मृषावादस्याकुशलस्य कर्मपथस्य विपाकेन मुखरोगदन्तरोगगलरोगमुखदौर्गन्ध्यादीनि प्रादुर्भवन्ति। तस्यैव कर्मणो विपाकेनाभूताख्यानं प्रतिलभते। पिशुनवचनस्याकुशलस्य कर्मपथस्य विपाकेन पृथिव्यां शर्करकठल्यादीनि दुःखसंस्पर्शादीनि प्रादुर्भवन्ति। तस्यैव कर्मणो विपाकेन जातिव्यसना मित्रव्यसना भवन्ति, भेद्यः परिवारश्च भवति। परुषवचसोऽकुशलकर्मपथस्य विपाकेन पांशुरजोधूलिवातवृष्ट्यादीनि प्रादुर्भवन्ति। तस्यैव कर्मणो विपाकेनामनोज्ञशब्दश्रवणदर्शनान्यनुभवन्ति। संभिन्नप्रलापस्याकुशलस्य कर्मपथस्य विपाकेन ....कंदरश्वभ्रादीनि प्रादुर्भवन्ति। तस्यैव कर्मणो विपाकेनानादेयवचना भवन्ति।

कुशलकर्मपथाः? तद्यथा- प्राणातिपातविरतिः अदत्तादानविरतिः काममिथ्याचारविरतिः मृषावादविरतिः पैशुन्यात् प्रतिविरतिः, पारुष्यवादात् प्रतिविरतिः सम्भिन्नप्रलापविरतिः, अभिध्यातः प्रतिविरतिः, व्यापादात् प्रतिविरतिः मिथ्यादृष्टेः प्रतिविरतिः, इत्येते दश कुशलकर्मपथा नित्यं सेवितव्याः। कथं ते सेवितव्या इति चेत्? **कायवाक्चित्तैः सर्वदा** इत्युक्तम्। तत्र प्राणातिपातविरत्यादयस्त्रयः सदैव कायेन सेवितव्याः। मृषावादविरत्यादयश्चत्वारः सदैव वाचा सेवनीयाः। अभिध्यातो

अभिध्याया अकुशलस्य कर्मपथस्य विपाकेन व्रीहियवगोधूमादीनां सस्यानां तुषपलालादीनि प्रादुर्भवन्ति। तस्यैव कर्मणो विपाकेन परप्रार्थनीयभोगा भवन्ति। व्यापादस्याकुशलकर्मपथस्य विपाकेन प्रभूते उप्ते निष्फलं सस्यं भवति। तस्यैव कर्मणो विपाकेन प्रतिकूलदर्शनो भवति। मिथ्यादृष्टेरकुशलस्य कर्मपथस्य विपाकेन तिक्तकटुकभावान्यपि पिचुमन्दकोषातकीविषतिक्तालाबु-प्रभृतीनि फलानि प्रादुर्भवन्ति। मिथ्यादृष्टेरकुशलस्य कर्मपथस्य विपाकेन नास्तिक्यवादी भवति, उच्छेददृष्टिः।

--महा.क.वि.सू.(म.सू.सं.) पृ. २०१, मि.सं. १९६१ ;

श्रेष्ठा गतिर्भवति चापि महाशयानां देवेषु चैव मनुजेषु च मूर्ध्नप्राप्ताः।
संबोधिमार्ग सद सत्त्व समादयन्ति संयोजयन्ति कुशलेषु दशस्वथापि ।।

--रा.परि.सू.(म.सू.सं. भाग-१), ७०का. मि.सं. ;

तत्थ अकुसलं कायकम्मं वचीकम्मं मनोकम्मञ्चेति कम्मद्वारवसेन तिविधं होति। कथं? पाणातिपातो अदिन्नादानं कामेसु मिच्छाचारो चेति कायविञ्जत्तिसङ्खाते कायद्वारे बाहुल्लवुत्तितो कायकम्मं नाम। मुसावादो पिसुणवाचा फरुसवाचा सम्फप्पलापो चेति वचीविञ्जत्तिसङ्खाते वचीद्वारे बाहुल्लवुत्तितो वचीकम्मं नाम। अभिज्झा, व्यापादो मिच्छादिट्ठि चेति अञ्ञत्रापि विञ्जत्तिया मनसिं येव बाहुल्लवुत्तितो मनोकम्मं नाम।

---अभि.संग. ५/४५-४८, पृ. ५३०, स.सं.वि.सं., १९९२ ;

इमे खलु पुनर्दशाकुशलाः कर्मपथा अधिमात्रत्वादासेविता भाविता बहुलीकृता निरयहेतुर्मध्यत्वात् तिर्यग्योनिहेतुर्मृदुत्वाद्यमलोकहेतुः। तत्र प्राणातिपातो निरयमुपनयति, तिर्यग्योनिमुपनयति, यमलोकमुपनयति। अथ चेत्पुनर्मनुष्येषु उपपद्यते, द्वौ विपाकावभिनिर्वर्तयति, अल्पायुष्कतां च बहुग्लान्यतां च। अदत्तादानं ... पेयालं .... परीत्तभोगतां च साधारणभोगतां च। काममिथ्याचारो .... अनाजानेयपरिवारतां च ससपत्नदारतां च। मृषावादो ..... अभ्याख्यानबहुलतां च परैर्विसंवादनतां च। पैशुन्यं .... भिन्नपरिवारतां च हीनपरिवारतां च। पारुष्यं .... अमनापश्रवणतां च कलहवचनतां च। संभिन्नप्रलापो ..... अनादेयवचनतां च अनिश्चितभानतां च। अभिध्या ... असंतुष्टितां च महेच्छतां च। व्यापादो .... अहितैषितां च परोत्पीडनतां च। मिथ्यादृष्टिः ...... कुदृष्टिपतितश्च भवति शठश्च संवर्तते।

--द.भू.सू., पृ. १६-१७, मि.सं. १९६७।

विरत्यादयस्त्रयस्तावच्चित्तेन सदैव सेवनीयाः। सर्वदेत्यनेन कृतं सञ्चितं च कर्म व्यपदिश्यते।

तत्र कथं प्राणातिपातः कर्मपथः? प्राणी स्यात्, प्राणिसंज्ञा च स्यात्, हननचित्तं प्रत्युपस्थितं भवेत्, तदर्थमुपक्रमोऽपि स्यात्, तथा सति यदि मरणं स्यात्तदा प्राणातिपातः कर्मपथो भवति।[१] पापस्य गुरु-लाघवं पुनः वस्त्वाशयप्रयोगविशेषैर्वेदितव्यम्।

अदत्तादानं कथं कर्मपथः? परपरिगृहीतत्वं तथासञ्जाननं चौरचित्तप्रत्युपस्थानं तथाविधेन स्तेयचित्तेन स्वायत्तीकरणे अदत्तादानं (निष्पन्नं) भवति।[२] पापस्य गुरुलाघवं पुनः यस्य तद्द्रव्यं तस्य वैशिष्ट्येन प्रयोगाशयविशेषैश्च वेदितव्यम्।

---

[१] तत्र प्राणातिपातः कतमः? प्राणी च भवति प्राणिसंज्ञा च भवति, बधकचित्तं चोत्पादयति। उपक्रमं च करोति। जीविताद् व्यपरोपयति। अयमुच्यते भिक्षवः प्राणातिपातः। अन्यत्र प्रमादाददृष्टाद्वा अप्राणिवधः। --अ.वि.सू., पृ. ३६, के.पी.जा.सं. १९७१ ;

प्राणातिपातात्प्रतिविरतो भवति निहतदण्डो निहतशस्त्रो निहतवैरो लज्जावान् दयापन्नः सर्वप्राणिभूतेषु हितसुखानुकम्पी मैत्रचित्तः। स संकल्पैरपि प्राणिविहिंसां न करोति, कः पुनर्वादः परसत्त्वेषु सत्त्वसंज्ञिनः संचिन्त्यौदारिककायविहेठनया। --द.भू.सू., पृ. १५, मि.सं. १९६७ ;

प्राणातिपातः सञ्चिन्त्य परस्याभ्रान्तिमारणम्। --अभि.को., ४/७३ ;

"तत्थ पाणस्स अतिपातो पाणातिपातो नामः, पाणवधो, पाणघातो ति वुत्तं होति। पाणो ति चेत्थ वोहारतो सत्तो, परमत्तो जीवितिन्द्रियं, तस्मिं पन पाणे पाणसञ्चिनो जीवितिन्द्रियुपच्छेदक-उपक्कमसमुट्ठापिका कायवचीद्वारानं अञ्ञतरद्वारप्पवत्ता वधकचेतना पाणातिपातो।"

--अट्ठ०(धम्मसङ्ग-अट्ठकथा), पृ. ८०, भण्डारकर ओरियन्टल सिरीज, पूना, १९४२ ।

[२] तत्रादत्तादानं कतमत्? स्तेयचित्तस्य परद्रव्यस्वीकरणमदत्तादानम्। अन्यत्र मातृपितृभ्रातृस्वजनमित्रद्रव्यस्य स्वल्पस्यानुपरोधिनो ग्रहणं नादत्तादानम्।

--अ.वि.सू., पृ. ३६, के.पी.जा.सं. १९७१ ;

अदत्तादानात्प्रतिविरतः खलु पुनर्भवति स्वभोगसंतुष्टः परभोगानभिलाषी अनुकम्पकः। स परपरिगृहीतेभ्यो वस्तुभ्यः परपरिगृहीतसंज्ञी स्तेयचित्तमुपस्थाप्य अन्तशस्तृणपर्णमपि नादत्तमादाता भवति, कः पुनर्वादोऽन्येभ्यो जीवितोपकरणेभ्यः।

--द.भू.सू., पृ. १५. मि.सं. ९१६७ ;

अदत्तादानमन्यस्वस्वीक्रिया बलचौर्यतः। --अभि.को., ४/७३ ;

कथं काममिथ्याचारः कर्मपथः? धर्मरक्षितायां पररक्षितायां स्वस्त्रियां वा अकाले अस्थाने अदेशे अगमनीयावयवे वा कामधर्माचरणं काममिथ्याचारः।[1] अत्रापि गुरुलाघवं तावद् वस्त्वाशयप्रयोगविशेषैर्वेदितव्यम्।

कथं तावन्मृषावादः कर्मपथः? विसंवादाशयं वञ्चनादृष्टिं च मनसि निधाय अर्थमवबोधयितुं यदा वाग्विज्ञप्तिर्वा कायविज्ञप्तिर्वा प्रयुज्यते तदा मृषावादः कर्मपथो निष्पद्यते।[2] सन्दिग्धस्थलेषु निश्चित इव वादोऽपि मृषावाद एव। अत्रापि गुरुलाघवविशेषस्तु विसंवाद्यविशेषेण आशयविशेषेण च वेदितव्यः।

"अदिन्नस्स आदानं 'अदिन्नादानं' ; परस्सहरणं थेय्यं, चोरितं ति वुत्तं होति। .... तस्मिं पन परपरिग्गहितसञ्ञिनो तदादायक-उपक्कमसमुट्ठापिका थेय्यचेतना अदिन्नादानं।"

--अट्ठ०(धम्मसङ्ग-अट्ठकथा), पृ. ८१, भण्डारकर ओरियन्टल सिरीज, पूना, १९४२ ।

१ तत्र काममिथ्याचारः कतमः? परस्त्रीणामुपभोगः भर्तृराजमातृपितृरक्षितानामथवा अस्थानगम्यादेशकालेषु विप्रतिपत्तिः। अयमुच्यते काममिथ्याचारः। कायिकमेतत् त्रिविधम्।

--अ.वि.सू., पृ. ३६, के.पी.जा.सं. १९७१ ;

काममिथ्याचारात्प्रतिविरतः खलु पुनर्भवति स्वदारसंतुष्टः परदारानभिलाषी। स परपरिगृहीतासु स्त्रीषु परभार्यासु गोत्रध्वजधर्मरक्षितासु अभिध्यामपि नोत्पादयति, कः पुनर्वादो द्वीन्द्रियसमापत्या वा अनङ्गविज्ञप्त्या वा।

--द.भू.सू., पृ. १५, मि.सं. १९६७ ;

अगम्यगमनं काममिथ्याचारश्चतुर्विधः। --अभि.को., ४/७४ ;

"कामेसुमिच्छाचारो ति एत्थ पन 'कामेसू' ति मेथुनसमाचारेसु। 'मिच्छाचारो' एकन्तनिन्दितो लामकाचारो। लक्खणतो पन असद्धम्माधिप्पायेन कायद्वारप्पवत्ता अगमनीयट्ठान-वीतिक्कमचेतना 'कामेसुमिच्छाचारो'।"

--अट्ठ०(धम्मसङ्ग-अट्ठकथा), पृ. ८१, भण्डारकर ओरियन्टल सिरीज, पूना, १९४२ ।

२ अनृतं कतमत्? साक्षिप्रश्ने यथाभूताद् वितथवचनमनृतम्। अनर्हतो वा अर्हन्नस्मीति परिहासवर्जम्। इदमुच्यते अनृतम्। --अ.वि.सू., पृ. ३६, के.पी.जा.सं. १९७१ ;

अनृतवचनात्प्रतिविरतः खलु पुनर्भवति सत्यवादी भूतवादी कालवादी, यथावादी तथावादी। सोऽन्तशः स्वप्नान्तरगतोऽपि विनिधाय दृष्टिं क्षान्तिं रुचिं मतिं प्रेक्षां विसंवादनाभिप्रायो नानृतां वाचं निश्चारयति, कः पुनर्वादः समन्वाहृत्य। --द.भू.सू., पृ. १५, मि.सं. ;

अन्यसंज्ञोदितं वाक्यमर्थाभिज्ञे मृषावचः। --अभि.को., ४/७४ ;

कथं तावत् पैशुन्यवाक् कर्मपथः? प्रहृष्टुकामतया भेदाशयेन वा कस्माच्चित् पुरुषात् कञ्चित् पुरुषं प्रति निगदितमप्रियं वचनं श्रुत्वा तमारोचयति, ततोऽपि श्रुत्वा इमं (पूर्वपुरुषं) कथयति, तच्च वचनं सत्यं वा भवेद् अभूतं वा भवेत् पैशुन्यं स्यात्।[1] अभूतेन कथनेन कथं न तन्मृषावाद इति चेत्? भवत्येवेति केचित्, किन्तु तन्न तथा ग्रहीतव्यम्। कस्मादिति चेत्? अत्र (पैशुन्यावस्थायां) भेदाशयो भवति, न तु विसंवादाशयः। एवं सति यदि कश्चिद् अभूतं च परुषं च वदेत्, ततोऽपि न मृषावादः, आशयद्वयस्य युगपत् सम्भवाभावात्।

कथं परुषवचनं कर्मपथः? श्रावणाशयेन परदुःखकामनया साक्षादर्थबोधकवचनोच्चारणं परुषवचनम्।[2] साक्षादर्थानवबोधे सम्भिन्नप्रलापः स्यात्।

" 'मुसा' ति विसंवादनपुरेक्खारस्स अत्थभञ्जको वचीपयोगी, कायप्पयोगी वा। विसंवादनाधिप्पायेन परस्स परं विसंवादका कायवचीपयोगसमुट्ठापिका चेतना मुसावादो। अपरो नयो- 'मुसा' ति अभूतं अतच्छं वत्थु। 'वादो' ति तस्स भूततो तच्छतो विञ्ञापनं। लक्खणतो पन अतथं वत्थु तथतो परं विञ्ञापेतुकामस्स तथाविञ्ञत्तिसमुट्ठापिका चेतना मुसावादो ति।''

--अट्ठ०(धम्मसङ्ग-अट्ठकथा), पृ. ८१, भण्डारकर ओरियन्टल सिरीज, पूना, १९४२ ।

[1] पैशुन्यं कतमत्? अभूतेन सत्येन वा भेदकरं वचनं पैशुन्यं तत्। इदमुच्यते पैशुन्यम्।

--अ.वि.सू., पृ. ३६, के.पी.जा.सं. १९७१ ;

पिशुनवचनात्प्रतिविरतः खलु पुनर्भवति अभेदाविहेठाप्रतिपन्नः सत्त्वानाम्। स नेतः श्रुत्वा अमुत्राख्याता भवत्यमीषां भेदाय। न अमुतः श्रुत्वा इहाख्याता भवत्येषां भेदाय। न संहितान् भिनत्ति, न भिन्नानामनुप्रदानं करोति। न व्यग्रारामो भवति न व्यग्ररतो न व्यग्रकरणीं वाचं भाषते सद्भूतामसद्भूतां वा। --द.भू.सू., पृ, १५, मि.सं. ;

पैशुन्यं क्लिष्टचित्तस्य वचनं परभेदने। --अभि.को., ४/७६ ;

''तत्थ सङ्किट्ठचित्तस्स परेसं वा भेदाय अत्तनो पियकम्यताय वा कायवचीपयोगसमुट्ठापिका पिसुणा वाचा नाम।'' --अट्ठ०(धम्मसङ्ग-अट्ठकथा), पृ. ८२, भण्डारकर ओरियन्टल सिरीज, पूना, १९४२ ।

[2] तत्र पारुष्यं कतमत्? परदुःखचिकीर्षोरनिष्टवचनश्रावणं पारुष्यम्। दुःखमस्य भवत्वित्यनया बुद्ध्या यदनिष्टवचनश्रावणं क्रियते तत्पारुष्यम्। इमदुच्यते पारुष्यम्।

--अ.वि.सू., पृ. ३६, के.पी.जा.सं. १९७१ ;

परुषवचनात्प्रतिविरतः खलु पुनर्भवति। स येयं वागदेशा कर्कशा परकटुका पराभिसंजननी अन्वक्षान्वक्षप्राग्भारा ग्राम्या पार्थग्जनकी अनेला अकर्णसुखा क्रोधरोषनिश्चारिता हृदयपरिदहनी

कथं सम्भिन्नप्रलापः कर्मपथः? मृषावादादित्रयातिरिक्तं किमप्यन्यविधं वचनं क्लिष्टचित्तेन प्रयुक्तं सम्भिन्नप्रलापः।[१] एते त्रयोऽपि कर्मपथाः मृषावाद इव कायेनापि निष्पाद्यन्ते। गुरुलाघवविशेषोऽपि मृषावादवद् वेदितव्यः।

कथं अभिध्या कर्मपथः? यदि परवित्तस्पृहा, तस्यां सत्यामभिध्याचित्तोत्पादः।[२]

मनःसंतापकरी अप्रिया अमनापा अमनोज्ञा स्वसंतानपरसंतानविनाशनी। तथारूपां वाचं प्रहाय येयं वाक् स्निग्धा मृद्वी मनोज्ञा मधुरा प्रियकरणी मनापकरणी हितकरणी नेला कर्णसुखा हृदयंगमा प्रेमणीया पौरी वर्णविस्पष्टा विज्ञेया श्रवणीया निश्चिता बहुजनेष्टा बहुजनकान्ता बहुजनप्रिया बहुजनमनापा विज्ञापन्ना सर्वसत्त्वहितसुखावहा समाहिता मनउत्प्लावनकरी मनःप्रह्लादनकरी स्वसंतानपरसंतानप्रसादनकरी तथारूपां वाचं निश्चारयति।

--द.भू.सू., पृ. १५, मि.सं. ;

पारुष्यमप्रियम् ....। --अभि.को., ४/७६ ;

"याय पन अत्तानं पि परं पि फरुसं करोति, या वाचा सयं पि फरुसा नेव कण्णसुखा, न हदयङ्गमा, अयं 'फरुसा वाचा' नाम। .....परस्स मम्मच्छेदककायवचीपयोगसमुट्ठापिका एकन्तफरुसचेतना 'फरुसावाचा'। --अट्ठ०(धम्मसङ्ग-अट्ठकथा), पृ. ८२, भण्डारकर ओरियन्टल सिरीज, पूना, १९४२ ।

[१] सम्भिन्नप्रलापः कतमः? तद्यथा-- राजकथा, चोरकथा, युद्धकथा, मद्यकथा, द्यूतकथा, स्त्रीकथा, आख्यायिककथा कथनं वा। अयमुच्यते सम्भिन्नप्रलापः। वाचिकमेतच्चतुर्विधम्।

--अ.वि.सू., पृ. ३६, के.पी.जा.सं. १९७१ ;

संभिन्नप्रलापात्प्रतिविरतः खलु पुनर्भवति सुपरिहार्यवचनः कालवादी भूतवादी अर्थवादी धर्मवादी न्यायवादी विनयवादी। स निदानवतीं वाचं भाषते कालेन सावदानम्। स चान्तश इतिहासपूर्वकमपि वचनं परिहार्यं परिहरति, कः पुनर्वादो वाग्विक्षेपेण। --द.भू.सू., पृ. १६, मि.सं. १९६७ ;

.... सर्वं क्लिष्टं भिन्नप्रलापिता।।
अतोऽन्यत् क्लिष्टमित्यन्ये, लपनागीतनाट्यवत्।
कुशास्त्रवच्च, ... ।। --अभि.को., ४/७६-७७ ;

"येन सम्फं पलपति निरत्थकं सो 'सम्फप्पलापो'। ......अनत्थविञ्ञापिका कायवचीपयोगसमुट्ठापिका अकुसलचेतना 'सम्फप्पलापो'।" --अट्ठ०(धम्मसङ्ग-अट्ठकथा), पृ. ८२-८३, भ.ओ.सि., पूना, १९४२ ।

[२] तत्राभिध्या कतमा? परद्रव्यस्वीकरणेच्छा अभिध्या। यान्यस्य द्रव्याणि तानि मम स्युरिति। इदमुच्यतेऽभिध्या। --अ.वि.सू., पृ. ३६, के.पी.जा.सं. १९७१ ;

कथं व्यापादः कर्मपथः? यदि परसत्त्वान् प्रति द्वेषः, तस्मिन् सति व्यापादचित्तोत्पादः।[१]

कथं मिथ्यादृष्टिः कर्मपथः? नास्ति किमपि फलं निश्चयेन कुशलाकुशलकर्मणामिति चिन्तनं मिथ्यादृष्टिः।[२] त्रयाणामेषां कर्मपथानां पापस्य

अनभिध्यालुः खलु पुनर्भवति परस्वेषु परकामेषु परभोगेषु परवित्तोपकरणेषु। परपरिगृहीतेषु स्पृहामपि नोत्पादयति, किमिति यत्परेषां तन्नाम स्यादिति नाभिध्यामुत्पादयति, न प्रार्थयते न प्रणिदधाति, न लोभचित्तमुत्पादयति। --द.भू.सू., पृ. १६, मि.सं. १९६७ ;

अभिध्या तु परस्वविषमस्पृहा।। --अभि.को., ४/७७ ;

"अभिज्झायतीति अभिज्झा। परभण्डाभिमुखी हुत्वा तन्निन्नताय पवत्ततीति अत्थो। सा 'अहो तव इदं ममस्सा' ति एवं परभण्डाभिज्झायनलक्खणा।" --अट्ठ०(धम्मसङ्ग-अट्ठकथा), पृ. ८३, भ.ओ.सि, पूना, १९४२ ।

[१] तत्र व्यापादः कतमः? परजीवितव्यपरोपणावच्छेदनपीडादिचिन्तनम्। अयमुच्यते व्यापादः।
--अ.वि.सू., पृ. ३६, के.पी.जा.सं. १९७१ ;

अव्यापन्नचित्तः खलुः पुनर्भवति। सर्वसत्त्वेषु मैत्रचित्तो हितचित्तो दयाचित्तः सुखचित्तः स्निग्धचित्तः सर्वजगदनुग्रहचित्तः सर्वभूतहितानुकम्पाचित्तः। स यानीमानि क्रोधोपनाहखिलमलव्यापादपरिदाहसंधुक्षितप्रतिघाद्यानि तानि प्रहाय यानीमानि हितोपसंहितानि मैत्र्युपसंहितानि सर्वसत्त्वहितसुखाय वितर्कितविचारितानि, तान्यनुवितर्कयिता भवति।
--द.भू.सू., पृ. १६, मि.सं. १९६७ ;

व्यापादः सत्त्वविद्वेषः, ...। --अभि.को., ४/७८ ;

"हितसुखं व्यापादयतीति 'व्यापादो'। सो परविनासाय मनोपदोसलक्खणो।" --अट्ठ०(धम्मसङ्ग-अट्ठकथा), पृ. ८३, भ.ओ.सि., पूना, १९४२ ।

[२] तत्र मिथ्यादृष्टिः कतमा? नास्त्ययं लोकः, नास्ति परलोक इति पूर्ववत्। एतन्मानसं त्रिविधम्।
--अ.वि.सू., पृ. ३६, के.पी.जा.सं. १९७१ ;

सम्यग्दृष्टिः खलुः पुनर्भवति सम्यक्पथगतः कौतुकमङ्गलनानाप्रकारकुशीलदृष्टिविगत-ऋजुदृष्टिरशठोऽमायावी बुद्धधर्मसंघनियताशयः।
---द.भू.सू., पृ. १६, मि.सं. १९६७ ;

.... नास्तिदृष्टिः शुभाशुभे।
मिथ्यादृष्टिः, ... ।। --अभि.को., ४/७८ ;

"यथाभुच्चगहणाभावेन मिच्छा पस्सतीति 'मिच्छादिट्ठि'। सा 'नत्थि दिन्नं' ति आदिना नयेन विपरीतदस्सन- लक्खणा।"

--अट्ठ०(धम्मसङ्ग-अट्ठकथा), पृ. ८३, भ.ओ.सि, पूना, १९४२ ;

आत्मात्मीयध्रुवोच्छेदनास्तिहीनाग्रदृष्टयः।
अहेत्वमार्गे तद्दृष्टिरेतास्ता पञ्च दृष्टयः ।।

ईश्वरादिषु नित्यात्मविपर्यासात् प्रवर्तते।
कारणाभिनिवेशोऽतो दुःखदृग्घेय एव सा।।

--अभि.को. ५/७ ; अभि.दी. १६९-१७१ का., पृ. २२९-२३२ ;

तत्र सत्कायदृष्टिर्यत्पञ्चसूपादानस्कन्धेष्वात्मात्मीयदर्शनम्। अन्तग्राहदृष्टिस्तेष्वेव पञ्चसूपादानस्कन्धेष्वात्मात्मीयत्वेन गृहीतेषु यदुच्छेदतः शाश्वततो वा दर्शनम्। मिथ्यादृष्टिः- यया मिथ्यादृष्ट्या हेतुं वाऽपवदति फलं क्रियां वा सद् वा वस्तु नाशयति, सा सर्वदर्शनपापत्वात् मिथ्यादृष्टिरित्युच्यते। दृष्टिपरामर्शः पञ्चसूपादानस्कन्धेष्वग्रतो विशिष्टतः श्रेष्ठतः परमतश्च यद् दर्शनम्। शीलव्रतपरामर्शः पञ्चसूपादानस्कन्धेषु शुद्धितो मुक्तितो नैर्याणिकतश्च यद् दर्शनम्।

-- त्रिं.वि.मा.सि., पृ. २११, स.सं.वि., १९७२ ;

आत्मदृष्टिरात्मीयदृष्टिर्वा सत्कायदृष्टिः। सीदतीति सत्। चयः कायः संघात इत्यर्थः। सच्चायं कायश्चेति सत्कायः पञ्चोपादानस्कन्धाः। ...सत्काये दृष्टिः सत्कायदृष्टिः। सर्वैव सास्रवालम्बना दृष्टिः सत्काये। आत्मात्मीयदृष्टिरेव तु सत्कायदृष्टिरुक्ता। यथोक्तम्- 'ये केचिद् भिक्षवः श्रमणा ब्राह्मणा वा आत्मेति समनुपश्यन्तः समनुपश्यन्ति, सर्वे त इमानेव पञ्चोपादानस्कन्धान्' इति। तस्यैवात्माभिमतस्य वस्तुनो ध्रुवदृष्टिरुच्छेददृष्टिर्वाऽन्तग्राहदृष्टिः, शाश्वतोच्छेदान्तग्रहणात्। सति दुःखादिसत्ये नास्तीति दृष्टिर्मिथ्यादृष्टिः। सर्वैव हि विपरीतस्वभावप्रवृत्ता दृष्टिर्मिथ्यादृष्टिः एकैव तूक्ता, अतिशयवत्त्वात् दुर्गन्धक्षतवत्। एषा ह्यपवादिका अन्यास्तु समारोपिकाः। हीने अग्रदृष्टिर्दृष्टिपरामर्शः। किं हीनम्? सर्वं सास्रवम्, आर्यैः प्रहीणत्वात्। तस्याग्रतो ग्रहणं दृष्टिपरामर्शः। ...अहेतौ हेतुदृष्टिरमार्गे मार्गदृष्टिः शीलव्रतपरामर्शः, तद्यथा- महेश्वरो न हेतुर्लोकानाम्, तं च हेतुं पश्यति, प्रजापतिमन्यं वा। अग्निजलप्रवेशादयश्च न हेतुः स्वर्गस्य, तांश्च हेतुं पश्यति। शीलव्रतमात्रकं सांख्ययोगज्ञानादयश्च न मार्गो मोक्षस्य तांश्च मार्गं पश्यति। ...इत्येतास्ताः पञ्च दृष्टयो वेदितव्याः।

--अभि.को.भा., पृ. ७७२-७७३, बौ.भा.प्र., १९८७ ;

सत्कायदृष्टिः कतमा। पञ्चोपादानस्कन्धानात्मतः आत्मीयतो वा समनुपश्यतो या क्षान्ती रुचिर्मतिः प्रेक्षा दृष्टिः। सर्वदृष्टिगतसन्निश्रयदानकर्मिका। अन्तग्राहदृष्टिः कतमा। पञ्चोपादानस्कन्धान् शाश्वततो वा उच्छेदतो वा समनुपश्यतः या क्षान्ती रुचिर्मतिः प्रेक्षा दृष्टिः। मध्यमाप्रतिपन्निर्याणपरिपन्थकर्मिका। दृष्टिपरामर्शः कतमः। दृष्टिं दृष्ट्याश्रयांश्च पञ्चोपादानस्कन्धानग्रतः श्रेष्ठतो विशिष्टतः परमतश्च समनुपश्यतो या क्षान्ती रुचिर्मतिः प्रेक्षा दृष्टिः। असद्दृष्ट्यभिनिवेशसन्निश्रयदानकर्मकः। शीलव्रतपरामर्शः कतमः। शीलं व्रतं शीलव्रता(श्रयां)श्च पञ्चोपादानस्कन्धान् शुद्धितो मुक्तितो नैर्याणिकतश्च समनुपश्यतो या क्षान्ती रुचिर्मतिः प्रेक्षा दृष्टिः। श्रमवैफल्यसन्निश्रयदानकर्मकः। मिथ्यादृष्टिः कतमा। हेतुं वाऽपवदतः फलं वा क्रियां वा सद्वा वस्तु नाशयतः मिथ्या च विकल्पयतो या

गुरुलाघवं तावदाशयविशेषेण वेदितव्यम्। व्यापादचित्तस्य तु आलम्बनवशेनापि गुरुलाघवमिष्यते। एतेषां दशाकुशलपथानां प्रहाणार्थं दशकुशलपथाः सेवितव्याः।

मद्यप्रकारेभ्यो विरतिरित्यत्र मद्यं तावन्महतामवद्यानां हेतुः। नैव तत् केवलं सेवनमात्रेण अकुशलं भवति, अत एव कर्मपथेषु नोक्तम्, तस्य तावत् पृथग् निषेधो देशितः। मदजननेऽविशेषेऽपि हेतुविशेषेण तेषां मदप्रकाराणां भेदो ज्ञातव्यः। सुरा खलु इक्षुनिर्मितं मद्यम्, ब्रीहिनिर्मितं मद्यं मधूलिका, इतरं मधुमद्यम् इति प्रकारत्रयम्। मैरेयं तावत् पुष्पादिरसग्रहणनिर्मितं वेदितव्यम्।[1]

क्षान्ती रुचिर्मतिः प्रेक्षा दृष्टिः। कुशलमूलसमुच्छेदकर्मिका, अकुशलमूलदृढतासन्निश्रयदानकर्मिका। अकुशले प्रवृत्तिकर्मिका कुशले चाप्रवृत्तिकर्मिका वा।

--अभिधर्मसमुच्चय, पृ. ७, वि.भा.प्र., १९५०।

[1] प्रतिक्षेपणसावद्यान्मद्यादेव, ...
किं कारणं मद्यादेव, नान्यस्मात्?
......अन्यगुप्तये।।
मद्यं पिबतोऽन्यान्यप्यङ्गान्यगुप्तानि स्युः।
कथं पुनर्मद्यपानं प्रतिक्षेपणसावद्यं गम्यते? प्रकृतिसावद्यलक्षणाभावात्। प्रकृतिसावद्यं हि क्लिष्टेनैव चित्तेनाध्याचर्यते। शक्यं तु मद्यं प्रतीकारबुद्ध्यैव पातुम्, यावन्न मदयेत्। क्लिष्टमेव तच्चित्तं यन्मदनीयं ज्ञात्वा पिबति। न तत् क्लिष्टं यदमदनीयमात्रां विदित्वा पिबति। प्रकृतिसावद्यं मद्यमिति विनयधराः। कथं भदन्त ग्लान उपस्थातव्यः? शाक्येषु ग्लानेषु मद्यपानं नाभ्यनुज्ञातम्। इदं चोक्तम्-- "मा भिक्षवः शास्तारमुद्दिशद्भिः कुशाग्रेणापि मद्यं न पातव्यम्" इति। अतः प्रकृतिसावद्यमिति ज्ञायते।
आर्यैश्च जन्मान्तरगतैरप्यनध्याचारात्। प्राणिवधादिवत्। कायदुश्चरितवचनाद्, दुर्गतिगमनाच्चेति।
नेत्याभिधार्मिकाः। उत्सर्गविहितस्यापि ग्लानेषु प्रज्ञप्तिसावद्यस्य पुनर्मद्यस्यापवादः प्रसङ्गपरिहारार्थं मदनीयमात्रानियमनात्।
अत एव च कुशाग्रपानप्रतिषेधः। आर्यैरनध्याचरणं ह्रीमत्त्वात्, तेन च स्मृतिनाशात्। अल्पकस्याप्यपानमनियमाद् विषवत्। दुश्चरितवचनं प्रमादस्थानत्वात्।
अत एवात्रैव प्रमादस्थानग्रहणम्, नान्येषु, तेषां प्रकृतिसावद्यत्वात्। अत्यासेवितेन दुर्गतिगमनाभिधानम्। तत्प्रसङ्गेनाभीक्ष्णमकुशलसन्ततिप्रवृत्तेरापायिकस्य कर्मण आक्षेपाद्, वृत्तिलाभाद्वा।
सुरामैरेयमद्यप्रमादस्थानमिति कोऽर्थः? सुरा--अन्नास्रवः। मैरेयम्--द्रवास्रवः। ते वा कदाचिदप्राप्तप्रच्युतमद्यभावे भवत इति, अतो मद्यग्रहणम्। पूगफलकोद्रवादयोऽपि मदयन्तीति सुरामैरेयग्रहणम्। प्रज्ञप्तिसावद्यस्याप्यादरेण प्रहेयत्वे कारणज्ञापनार्थं प्रमादस्थानवचनम्, सर्वप्रमादास्पदत्वादिति।

---अभि.को.भा., ४/३४, पृ. ६३२, बौ.भा.प्र. १९८७।

पुण्यमयैश्चाजीवैरिति स्यादित्यनेन सम्बध्यते। कुशलाजीविका नाम या परपीडनाय न क्रमते। इत्येवं कुशलेषु कर्मसु स्थित्वा यथावत् द्रव्यदानं कर्त्तव्यमिति प्रतिपादयितुमाह-

ज्ञात्वा चलामसारां सम्पत्तिं द्विजभिक्षुदीनमित्रेभ्यः ।
दानं देयं विधिना[१] जन्मान्तरेषु न दानात् परं मित्रम् ।।६।।

उपभुज्यमानत्वात् सम्पत्तिः। अत्र देयवस्तुनः अन्नपानादीनां च भोग्यवस्तूनां ग्रहणम्। ते भोगा अपि चला अस्थिरत्वात्। सारहीना अतृप्तिकरत्वात्। अनेन

---

[१] दानं नाम महानिधानमनुगं चौराद्यसाधारणं
दानं मत्सरलोभदोषरजसः प्रक्षालनं चेतसः।
संसाराध्वपरिश्रमापनयनं दानं सुखं वाहनं
दानं नैकसुखोपधानसुमुखं सन्मित्रमात्यन्तिकम्।।
--जा.मा.(श्रेष्ठिजातकम्), ३/२१ ;

दीयते येन तद्दानम्, ...
भवति स्म। रागादिभिरपि दीयते, न चात्र तदिष्टम्, अतो विशेषार्थमाह्--
.... पूजानुग्रहकामया।
परेषां पूजानुग्रहकामताभ्यां येन दीयते। किं पुनस्तत् स्याद्येन दीयते?
कायवाक्कर्म सोत्थानम्, ...
किं पुनस्तदुत्थानम्? येन कलापेन तदुत्थाप्यते। आह चात्र--
शुभेन मनसा द्रव्यं स्वं ददाति यदा पुमान्।
तत् क्षणं कुशलाः स्कन्धाः दानमित्यभिधीयते।।
तच्चैतद् दानमयं पुण्यक्रियावस्तु महाभोग्यफलम्। स्वभावे चैष मयड् वेदितव्यः। तद्यथा-- तृणमयं गृहम्, पर्णमयं भाजनमिति।। तत् खल्वेतद् दानम्--
स्वपरार्थोभयार्थाय नोभयार्थाय दीयते।
तद्विशेषः पुनर्दातृवस्तुक्षेत्रविशेषतः ।।
दाता विशिष्टः श्रद्धाद्यैः, सत्कृत्यादि ददाति अतः।
सत्कारोदाररुचिता कालानाच्छेद्यलाभिता।।

वर्णादिसम्पदा वस्तु सुरूपत्वं यशस्वि वा।
प्रियता सुकुमारर्तुसुखस्पर्शाङ्गता ततः।। ---अभि.को.भा., ४/११३-११६, पृ. ७४०-७४३।

सब्बदानं धम्मदानं जिनाति, सब्बरसं धम्मरसो जिनाति।
सब्बरतिं धम्मरति जिनाति, तण्हक्खयो सब्बदुक्खं जिनाति।। --धम्म. २४/२१

सर्वभोगेष्वासक्तिः निवर्तते। **ज्ञात्वेति** अवबुध्य। **'भिक्षु'**- इत्यादिना त्रीणि दानक्षेत्राणि प्रदर्शितानि। दानक्षेत्राणि श्रमणब्राह्मणाः। करुणाक्षेत्रं दीनाः। उपकारिक्षेत्रं मित्राणि।[1] **विधिना** इत्यनेन आदरः सत्कारो वा निर्दिश्यते। तत्तु (दानं) एकान्तेन इष्टविपाकहेतुः। उक्तं च भगवता-- **''ससत्कारं दानस्य भिक्षवः तावदिष्टो विपाकः, मनोऽनुरूपा अनुभूतिश्च पृथक् पृथग् जायते।'' न दानात् परं मित्रम्** इत्यनेन दानस्य महोपकारित्वं ज्ञापितम्। अतो दानमाश्रयणीयमिति वेदितव्यम्।

भोगेषु नैरपेक्ष्येण सम्यक् शीलमेव परिगृह्य आचरणीयमिति प्रदर्शनार्थमाह--

शीलं सेव्यममिश्रं त्वयानुपहतालंघितानुपलिप्तं च ।
चराचरप्रतिष्ठं तु गुणाश्रयं भूवच्च राजते शीलम् ।।७।।

अनुपहतमिति यथागृहीतम् अंशतोऽपि नैव स्खलितम्। एकेनापि शीलेन च्युतेरुपहतं भवति। अनेकेभ्यः शिक्षापदेभ्योऽतिक्रमेण दोषवद् भवति शीलम्। उभयोरभावं निर्देष्टुम् अनुपहतमनुल्लंघितं चेति। सदोषं शीलं तावदुल्लंघितमुच्यते। मिश्रितं शीलमकुशलं भवति। मिश्रितत्वाभावादमिश्रमिति। भवार्थं भवोपकरणार्थम् अपरिणामित्वान्निर्दोषम्। इदमेव शीलमन्याकारेणापरिवर्तनादनुपलिप्तमित्युच्यते। उपलिप्तं तावदन्याकारेण परिवर्तितमिति। अनुपहतादिगुणान्वितं शीलं स्वतन्त्रमपि भवति, तृष्णादासीभावान्मुक्तत्वात्। अतएव शीलमिदं विद्वद्भिः प्रशंसितं

---

१ गतिदुःखोपकारित्वगुणैः क्षेत्रं विशिष्यते।
गतिविशेषात् तावद् विशिष्यते। तथा ह्युक्तं भगवता-- ''तिर्यग्योनिगताय दानं दत्त्वा शतगुणो विपाकः प्रतिकाङ्क्षितव्यः। दुःशीलाय मनुष्यभूताय दानं दत्त्वा सहस्रगुणः'' इति।
दुःखविशेषाद् विशिष्यते। तथा ह्यौपधिकेषु पुण्यक्रियावस्तुषु, ग्लाने दानम्, ग्लानोपस्थापके दानम्, शीतलिकादिषु च दानमुक्त्वोक्तम्-- ''एभिः सप्तभिः औपधिकैः पुण्यक्रियावस्तुभिः समन्वागतस्य श्राद्धस्य कुलपुत्रस्य वा कुलदुहितुर्वा न लभ्यं पुण्यानां प्रमाणमुद्ग्रहीतुम्'' इति।
उपकारित्वविशेषाद् यथा-- मातापित्रोरन्येषां चोपकारिणाम् ; ऋक्षमृगजातकाद्युदाहरणात्।
मातृपितृग्लानधार्मकथिकेभ्योऽन्त्यजन्मने।
बोधिसत्त्वाय चामेया अनार्येभ्योऽपि दक्षिणा।।
--अभि.को.भा., ४/११७-११८, पृ. ७४३, बौ.भा.प्र.।

समाधिप्रापकमपि। शीलवतश्चित्तं समाधीयत इति।[1] तथाविधं शीलं त्वया सेवनीयमेव। कस्य हेतोः? **चराचरप्रतिष्ठं तु गुणाश्रयं भूवच्च राजते शीलम्** इत्युक्तम्। **'तु'** इति एवमित्यर्थः। यथा पृथ्वी चराचराणाम् उत्पादस्थितिवृद्धिहेतुभूता तथैव शीलमपि समाध्यादिसर्वगुणानामाश्रयभूतम्। अनेन तावदादरोत्पादनार्थं शीलवतः पुरुषस्य कारित्रफलं निर्दिष्टम्। एवं हि दानं शीलं च सामान्यतः प्रतिपादिते।

अधुना महायाने प्रवृत्त्यर्थं दानादिपारमितानां संग्रहनिर्देशमाह--

षडिमा दानं शीलं क्षान्तिवीर्यध्यानप्रज्ञाः पारमिताः ।[2]

---

[1] दौःशील्यतद्धेत्वहतं तद्विपक्षसमाश्रितम्।

दौःशील्येन तावदनुपहतं भवति यथोक्तेन दौःशील्येन। हेतुनाप्यनुपहतं भवति। लोभादिभिः क्लेशोपक्लेशैः दौःशील्यविपक्षाश्रितं च भवति। स्मृत्युपस्थानसन्निश्रितत्वात् समाश्रितं च भवति। नोपपत्तिविशेषाश्रितम्, निर्वाणपरिणामितत्वात्।

पञ्चभिः कारणैः इत्यपरे। १. मौलैः कर्मपथैर्विशुद्धं भवति, २. सामन्तकैर्विशुद्धम्, ३. वितर्कैरनुपहतम्, ४. स्मृत्यानुपरिगृहीतम्, ५. निर्वाणपरिणामितं चेति।

चतुर्विधं शीलमित्यपरे। १. भयशीलम्-- यदाजीविकाश्लोकदण्डदुर्गतिभयात् पाल्यते। २. आशास्तिशीलम्-- यद्भवभोगसत्कारतृष्णाकृतम्। ३. बोध्यङ्गानुलोमं शीलम्-- यन्मोक्षार्थं सम्यग्दृष्टिकानाम्। ४. परिशुद्धं शीलम्-- अनास्रवशीलम्, निर्मलत्वादिति।

--अभि.को.भा. ४/१२३, पृ. ७५०, बौ.भा.प्र. ;

विषकर्मणां विरतिसमादानाच्छीलम्, शीतलत्वादिति निरुक्तिः। "सुखशीलसमादानं कायो न परिदह्यते।"

--अभि.को.भा., पृ. ६०९, बौ.भा.प्र. १९८७ ;

शीलेन युक्तो श्रमणो तिरेति, शीलेन युक्तो ब्राह्मणो तिरेति।
शीलेन युक्तो नरदेवपूज्यो शीलेन युक्तस्य हि प्रातिमोक्षम्।

--प्र.मो.सू., पृ. १, गंगानाथ झा शोध संस्थान, इलाहाबाद, १९५६ ;

रक्षन्ति शीलममलं मणिरत्नतुल्यं न च ते भोति अनुशील सुसंयतो वा।
तत्रैव शीलि सद सत्त्व नियोजयन्ति आकाङ्क्षमाणमिममनुत्तमबुद्धशीलम्।।

--रा.परि.सू. (म.सू.सं., भाग-१), ६३ का., मि.सं. १९६१।

[2] षट्पारमितां परिपूर्य बुद्धत्वमवाप्यत इति। तत्कतमास्ताः षट्पारमिताः? कथं च परिपूरिं गच्छन्ति? भगवानाह-- त्रय एते महामते पारमिताभेदाः। कतमे त्रयः? यदुत लौकिकलोकोत्तरलोकोत्तरतमाः। तत्र महामते लौकिक्यः पारमिता आत्मात्मीयग्राहाभिनिवेशाभिनिविष्टाः। अन्तद्वयग्राहिणो विचित्रभवोपपत्त्यायतनार्थं रूपादिविषयाभिलाषिणो दानपारमितां परिपूरयन्ति। एवं शीलक्षान्तिवीर्यध्यानप्रज्ञापारमितां महामते परिपूरयन्ति बालाः। अभिज्ञाश्चाभिनिर्हरन्ति ब्रह्मत्वाय। तत्र

लोकोत्तराभिः पारमिताभिः श्रावकप्रत्येकबुद्ध- निर्वाणग्राहपतिताशया दानादिषु प्रयुज्यन्ते यथैव बाला आत्मसुखनिर्वाणाभिलाषिणः। लोकोत्तरतमाः पुनर्महामते स्वचित्तदृश्यविकल्पमात्रग्रहणात्स्वचित्तद्वयावबोधाप्रवृत्तेर्विकल्पस्य उपादानग्रहणाभावात्स्वचित्तरूपलक्षणानभिनिवेशाद् दानपारमिता सर्वसत्त्वहितसुखार्थमाजायते बोधिसत्त्वानां महासत्त्वानां परमयोगयोगिनाम्। यत्तत्रैवालम्बने विकल्पस्याप्रवृत्तिं शीलयन्ति, तच्छीलं पारमिता च सा। या तस्यैव विकल्पस्याप्रवृत्तिक्षमणता ग्राह्यग्राहकपरिज्ञया, सा क्षान्तिपारमिता। येन वीर्येण पूर्वरात्रापररात्रं घटते योगानुकूलदर्शनाद्विकल्पस्य व्यावृत्तेः, सा वीर्यपारमिता। यद्विकल्पनिवृत्तेस्तीर्थ्यनिर्वाणग्राहापतनं सा ध्यानपारमिता। तत्र प्रज्ञापारमिता यदा स्वचित्तविकल्पाभावादाबुद्धिप्रविचयात्प्रतिविचिन्वन् अन्तद्वये न पतति आश्रयपरावृत्तिपूर्वकर्मविनाशतः, स्वप्रत्यात्मार्यगतिप्रतिलम्भाय प्रयुज्यते, सा प्रज्ञापारमिता। --लं.अ.सू., पृ. ९६ ;

शिक्षात्रयमधिकृत्य च षट् पारमिता जिनैः समाख्याताः।
आद्या तिस्रो द्वेधा अन्त्यद्वयतस्तिसृष्वेका ।।

इति षष्ठः। तत्राद्या अधिशीलं शिक्षा तिस्रः पारमिताः ससंभारपरिवारग्रहणात्। दानेन हि भोगनिरपेक्षः शीलं समादत्ते समात्तं च क्षान्त्या रक्षत्याक्रुष्टाप्रत्याक्रोशनादिभिः। द्विधेत्यधिचित्तमधिप्रज्ञं च शिक्षा सा अन्तेन द्वयेन संगृहीता यथाक्रमं ध्यानेन प्रज्ञया च। तिसृष्वपि शिक्षास्वेका वीर्यपारमिता वेदितव्या। सर्वासां वीर्यसहायत्वात्। लक्षणविभागे श्लोकाः षट्।

दानं विपक्षहीनं ज्ञानेन गतं च निर्विकल्पेन।
सर्वेच्छापरिपूरकमपि सत्त्वविपाचकं त्रेधा।।

बोधिसत्त्वानां दानं चतुर्विधलक्षणम्। विपक्षहीनं मात्सर्यस्य प्रहीणत्वात्। निर्विकल्पज्ञानसहगतं धर्मनैरात्म्यप्रतिवेधयोगात्, सर्वेच्छापरिपूरकं यो यदिच्छति तस्मै तस्य दानात्। सत्त्वपरिपाचकं त्रेधा दानेन सत्त्वान् संगृह्य त्रिषु यानेषु यथाभव्यनियोजनात्। ...... यथा दानलक्षणं चतुर्विधमेव शीलादीनां वोदितव्यम्। पुनश्चोक्तम्--

दानं निष्प्रतिकाङ्क्षस्य निःस्पृहस्य पुनर्भवे।
शीलं क्षान्तिश्च सर्वत्र वीर्यं सर्वशुभोदये।।

विनारूप्यं तथा ध्यानं प्रज्ञा चोपायसंहिता।
सम्यक्प्रयोगो धीराणां षट्सु पारमितासु हि।। ---म.सू.अ., पृ. ९८-९९, १५८, मि.सं. ;

"षट्पारमितापूर्णाधिवचनमेतत् यदुत प्रज्ञापारमिता" इति प्राग्वचनात् प्रज्ञापारमिताचर्ययैव षट् पारमिता भावनापरिपूरिं गच्छन्तीत्यर्थः। इह पारमिता भावनानिष्पत्तिं प्रतिपद्यन्ते इत्यवगन्तव्यम्। तथा चोक्तं पञ्चविंशतिसाहस्रिकायाम्-- "इह सुभूते बोधिसत्त्वस्य दानं ददतः सत्त्वेषु मैत्रं कायवाङ्मनस्कर्म प्रत्युपस्थितं भवति, एवं शीलपारमिता। तस्यैव प्रतिग्राहकाणामाक्रोशपरिभाषादिक्षमणेन क्षान्तिपारमिता। तस्यैव याचकाक्रोशपरिभाषादिभिर्दानोत्साहापरित्यागात् वीर्यपारमिता। तस्यैव च तद्दानं सर्वाकारज्ञतायां परिणामयतः श्रावकप्रत्येकबुद्धभूमिविक्षेपचित्ताभावेन ध्यानपारमिता। तस्यैव दानं ददतो मायाबुद्धिप्रत्युपस्थानेन कस्यचिदुपकारापकारादर्शनात् प्रज्ञापारमिता" इति।

--आलोक, पृ. ५२३, मि.सं. ;

इयं कौशिक प्रज्ञापारमिता बोधिसत्त्वानां महासत्त्वानां दानपारमितामभिभवति, शीलपारमितामभिभवति, क्षान्तिपारमितामभिभवति, वीर्यपारमितामभिभवति, ध्यानपारमितामभिभवति। तद्यथापि नाम कौशिक जात्यन्धानां शतं वा सहस्रं वा अपरिणायकानामभव्यं मार्गावतरणाय, कुतः पुनर्नगरानुप्रवेशाय, एवमेव कौशिक अचक्षुष्काः पञ्च पारमिता जात्यन्धभूता भवन्ति विना प्रज्ञापारमितया अपरिणायकाः, विना प्रज्ञापारमितया अभव्या बोधिमार्गावतरणाय, कुत एव सर्वाकारज्ञतानगरानुप्रवेशाय। यदा पुनः कौशिक पञ्च पारमिताः प्रज्ञापारमितापरिगृहीता भवन्ति, तदा एताः पञ्च पारमिताः सचक्षुष्का भवन्ति। प्रज्ञापारमितापरिगृहीताश्चैताः पञ्च पारमिताः पारमितानामधेयं लभन्ते। इति विस्तरः।।

एवमन्यत्रापि यथासूत्रमवगन्तव्यम्। उक्तं च---

सर्वपारमिताभिस्त्वं निर्मलाभिरनिन्दिते।
चन्द्रलेखेव ताराभिरनुयातासि सर्वदा।। इति।। (प्रज्ञापारमितास्तवः, ८का.)

--बो.च.पं.(उद्धृतं), पृ. १६९, मि.सं. ;

जात्यन्धकोटिनियुतान्यविनायकानां मार्गे अकोविदु कुतो नगरप्रवेशे ।
विन प्रज्ञ पञ्च इमि पारमिता अचक्षुः अविनायका न प्रभवन्ति स्पृशेतु बोधिम्।।

--र.गु.सं.गा.(म.सू.सं.), ७५का. पृ. ३६३, मि.सं. ;

सर्वत्र सर्वं ददतः कारुण्याद् दानपूरणम्।

यदा सर्वस्मै सर्वं ददाति आ अक्ष्णः,' आ मज्जायाः, कारुण्यात् नाभ्युदयविशेषं लिप्समानः --इयता दानपारमिता परिपूर्णा भवति। **अङ्गच्छेदेऽप्यकोपात्तु रागिणः क्षान्तिशीलयोः।।** यदायमवीतरागोऽपि च्छिद्यमानेष्वङ्गेषु नाल्पमपि कुप्यति, तदा अस्य क्षान्तिशीलपारमिते परिपूर्णे भवतः। **तिष्यस्तोत्रेण वीर्यस्य, ...** । तिष्यं तथागतरत्नगुहायां तेजोधातुसमापन्नदृष्ट्या भगवान् बोधिसत्त्वभूत एकेन पादेन स्थित्वा सप्त दिवसान् स्तुतवानेकगाथया---

"न दिवि भुवि वा नास्मिन् लोके न वैश्रवणालये।
न मरुभवने दिव्यस्थाने न दिक्षु विदिक्षु च।।

चरतु वसुधां स्फीतां कृत्स्नां सपर्वतकाननाम्।
पुरुषवृषभस्त्वत्तुल्योऽन्यो महाश्रमणः कुतः ।।" इति।

तदा किल वीर्यपारमिता परिपूर्णा, नव च कल्पाः प्रत्युदावर्तिताः। .... **धीसमाध्योरनन्तरम्।** बोधेः पूर्वसमनन्तरं ध्यानप्रज्ञापारमितयोः परिपूरिः। वज्रोपमसमाधौ स्वस्याः सम्पदः पारगमनात् पारमिताः।

---अभि.को.भा., ४/१११-११२, पृ. ७३८-७३९, बौ.भा.प्र. ;

दानेन प्रेतगति छिन्दति बोधिसत्त्वो दारिद्रकं च छिनती तथ सर्वक्लेशान्।
भोगांश्चनन्तविपुलां लभते चरन्तो दानेन सत्त्व परिपाचयि कृच्छ्रप्राप्तान् ।।

शीलेन तीर्यगति वर्जयि नेकरूपामष्टौ च अक्षण क्षणां लभते स नित्यम्।
क्षान्तीय रूप लभते परमं उदारं सुवर्णच्छवि प्रियु जगस्य उदीक्षणीयो ।।

अप्रमेयाः संवर्ध्य भवेच्च भवसागरपारगो जिनेन्द्रः ।।८।।

सर्वसत्त्वानां हिताय बोधिचित्तोत्पादेन दानं तावद् दानपारमिता, शीलादिपारमिता अपि तथैव वेदितव्याः। क्षान्तिरत्र द्विविधा- परापकारमर्षणक्षान्तिः दुःखाधिवासनक्षान्तिश्च।

सत्त्वार्थं बुद्धधर्मपर्येषणे समुत्साहो वीर्यम्। सत्त्वार्थकराणि विधिसत्त्वसमाधिप्रतिपादकानि चत्वारि ध्यानानि ध्यानम्। सर्वधर्माणां सम्यग् यथावज्ज्ञानं सत्त्वेभ्योऽविपरीतार्थदेशको यो धर्मप्रविचयः स प्रज्ञा। तथाविधा सा प्रज्ञा अप्रमेया, श्रावकादिष्वभावात्। **इमाः पारमिताः संवर्ध्य** इति इमाः पारमिताः परिपूरयन्त्वित्यर्थः। कस्य हेतोः? **भवेच्च भवसागरपारगो जिनेन्द्रः** इत्युक्तम्। तत्र पारगो भवेदिति पारंगतः स्यादित्यर्थः। कस्येति चेत्? भवसागरस्य। श्रावकः प्रत्येकबुद्धोऽपि भवसागरपारग इति तस्माद् विशेषीकरणाय जिनेन्द्र इत्युक्तम्। एवमिमाः षट्पारमिताः परिपूर्य बुद्धत्वमवाप्यत इति हेतोस्त्वयाऽपि इमाः पारमिताः परिपूरयितव्याः, ततस्त्वमपि बुद्धो भवेत्युच्यते।

गृहस्था अपि दानादिष्वभियुक्ता दृश्यन्त इति तेषामपराणि कुशलकर्माणि प्रदर्शनार्थमाह-

यत्र पूजा पितॄणां कुलं तदाचार्यब्रह्मभिः समृद्धम् ।
तत्पूजया च कीर्तिस्तदनन्तरं चाधिगम्यतेऽभ्युदयोऽपि ।।९।।

यत्र पूजा पितॄणाम् इत्यनेन यस्मिन् कुले मातापितरौ पूज्येते तस्मिन् कुले मनुष्यैरमनुष्यैर्वा कृतो नैव कश्चनापकारो भवति। **तदाचार्यब्रह्मभिः समृद्धम्** इत्यनेन

वीर्येण शुक्लगुण हानि न अभ्युपैति ज्ञानं अनन्त लभते जिनकोशगञ्जम् ।
ध्यानेन कामगुण उत्सृजते जुगुप्स्यान् विद्या अभिज्ञ अभिनिर्हरते समादिम्।।

प्रज्ञाय धर्मप्रकृती परिजानयित्वा त्रैधातुकान्त समतिक्रमते अपायान् ।
वर्तित्व चक्ररतनं पुरुषर्षभाणां देसेति धर्म जगती दुखसंक्षयाये ।।
--र.गु.सं.गा.(म.सू.सं.), ३२/१-४, पृ. ३९६, मि.सं.।

तत्कुलस्य सब्रह्मभिर्देवैरधिष्ठितत्वं गुरुभिश्च विशिष्टैरधिष्ठितत्वं निर्दिष्टम्। अपि च, दृष्टधर्मानुशंसामपरजन्मानुशंसां च दर्शयितुं **तत्पूजया च** इत्याद्युक्तम्। तयोर्द्वयोः (मातापित्रोः) पूजा तत्पूजा। मातापितृपूजया दृष्टधर्मे तावत् सुकीर्तिस्तु भवेदेव, अपरजन्मन्यपि अभ्युदयः स्वर्गादिकमधिगम्यते। अत एव गृहस्थैः सप्रयत्नं मातापितरौ सत्कर्तव्याविति।[१]

गृहस्थानां सर्वदा ब्रह्मचर्याचरणस्यातिदुष्करत्वात् अहोरात्रस्यापि ब्रह्मचर्यस्य योगार्थम् अष्टाङ्गपोषधं दर्शयितुमाह--

हिंसाचौर्ये मदिरा कामातिचारमृषोक्तिनृत्यगीतानि ।
त्याज्यान्यकालभक्तं मालागन्धादिविशेषोच्चशयनानि ।।१०।।

तत्र प्राणातिपातस्तावद् **हिंसा**। अदत्तादानं हि **चौर्यम्**। **कामातिचार** इत्युच्चारप्रस्रावमुखाद्यमार्गेषु मैथुनरतिः। **मृषोक्ति**रिति मृषावादः। **मदिरा** इति सुरामैरेयादिमद्यभेदाः। **अकालभक्त**मिति विकाले भोज्यपदार्थानामादानम्। **उच्चशयनं**

---

[१] ब्रह्मा हि मातापितरौ पूर्वाचार्यो तथैव च।
आह्वनीयौ पुत्रस्य अग्निः स्याद् देवतानि च।।

तस्मादेतौ नमस्येत सत्कुर्याच्चैव पण्डितः।
उद्वर्तनेन स्नानेन पादानां धावनेन च।
अथ वा अन्नपानेन वस्त्रशय्यासनेन च।।

तया स परिचर्यया मातापितृषु पण्डितः।
इह चानिन्दितो भवति प्रेत्य स्वर्गे च मोदते।। -- अ.श.(मैत्रकन्यकम्), पृ. ८८ ;

येहि पूजित जिनान कोटियो, दानशीलचरिता विचक्षणाः।
पापमित्र पुरि येहि वर्जिता, तेष पैतृकधनं निरुत्तरम्।।

कल्याणमित्रास्य न भोन्ति दुर्लभा, बुद्धांश्च यो पश्यति श्रावकांश्च।
दृष्ट्वा च तान् पूजयते प्रसन्नो, अमत्सरिस्या इमि आनुशंसाः ।।

नित्य सगौरव चाचरियेषु मातु पितुस्तथ सर्वजगस्मिन्।
मा पुन मानवशानुग भोथा लप्स्यथ लक्षण त्रिंश दुवे च।।
--समाधि.सू., २०/८, २६/८ , ३७/९२ ।

तावत् अतिपरिमाणानि पीठसन्दिकादीनि। **नृत्यगीतानि** इति तु लोकप्रसिद्धान्येव। **मालागन्धादिविशेष** इत्येतेषां निषेधस्तु ये तावत् स्वमाहात्म्यख्यापनार्थं तान् धारयन्ति तस्यैव निषेधः, न तु व्याधिप्रतीकारार्थं धारणस्य निषेधः। एतान्यष्टौ पोषधाङ्गानि उक्तानि।[१] कस्येमानि अङ्गानि, किमेतदतिरिक्तोऽस्ति कश्चिदन्यः संवरः? नास्ति, तथापि सामान्याङ्गानीमान्युच्यन्ते, पश्चिमं पञ्चाङ्गवदिति।[२]

किं पुनः इमान्येवाङ्गानि अर्हतः शीलान्यनुकुर्वन्ति? अत आह--

अनुकृत्यार्हच्छीलं कुर्यादुपोषधमष्टाभिरङ्गैश्चेत् ।
लभते हि पुमान् स्त्री वा सुरम्यकामावचरादिदेवकायम् ।।११।।

---

[१] पञ्चाष्टदशसर्वेभ्यो वर्ज्येभ्यो विरतिग्रहात्।
उपासकोपवासस्थश्रमणोद्देशभिक्षुता ।।
यथासंख्यमनुदेशो वेदितव्यः। पञ्चभ्यो वर्जनीयेभ्यो धर्मेभ्यो विरतिसमापादनादुपवासकसंवरस्थो भवति-- प्राणातिपाताद्, अदत्तादानात्, कामिमिथ्याचारात्, मृषावादात् सुरामैरेयमद्यपानाच्च। अष्टाभ्यो विरतिसमादानादुपवासस्थः -- प्राणातिपाताद्, अदत्तादानाब्रह्मचर्यमृषावादमद्यपानेभ्यः, गन्धमाल्यविलेपननृत्यगीतवादित्राद्, उच्चशयनमहाशयनाद्, अकालभोजनाच्च। दशभ्यो विरति समादानाच्छ्रामणेरो भवति-- एभ्य एव, जातरूपरजतप्रतिग्रहाच्च। नृत्यगीतवादित्रगन्धमाल्यविलेपनं चात्र द्वयीकृत्य दश भवन्ति। सर्वेभ्य एव वर्जनीयेभ्यः कायवाक्कर्मभ्यः विरतिसमादानात् भिक्षुरित्युच्यते।
--अभि.को.भा., ४/१५, पृ. ६०८, बौ.भा.प्र., १९८७।

[२] तुलनीयम्--
शीलाङ्गान्यप्रमादाङ्गं व्रताङ्गानि यथाक्रमम्।
चत्वार्येकं तथा त्रीणि स्मृतिनाशो मदश्च तैः ।।
चत्वारि तावच्छीलाङ्गानि यावन्मृषावादविरतिः, प्रकृतिसावद्यविरतित्वात्। एकमप्रमादाङ्गं मद्यपानाद् विरतिः। समात्तशीलोऽपि मद्यपः प्रमाद्येत। त्रीणि व्रताङ्गानि यावदकालभोजनाद् विरतिः, संवेगानुगुणत्वात्। किं पुनरेभिरप्रमादाङ्गव्रताङ्गैरनुपात्तैः स्यात्? ... मद्यं हि पिबतः कार्याकार्यस्मृतिरेव नश्येत्। उच्चशयनमहाशयननृत्यगीतादिकं प्रतिसेवमानस्य मदः सम्भवेत्। मत्तस्य च दौःशील्यमदूरं भवेत्। काले पुनर्भुञ्जानस्योचितभक्तकालपरिहारादुपवासस्मृतिः संवेगश्चोपतिष्ठेत्। तदभावादुभयं न स्यादिति।
--अभि.को.भा ., ४/२९, पृ. ६२३, बौ.भा.प्र. ।

अनेन तावदुक्तेन प्रथमाङ्गेनाहम् आर्याणामर्हतां शीलमनुशिक्षे[1], अनुकरोमीत्यादिकं किं सम्भवति? अर्हच्छीलान्यत्र अङ्गानि, पुद्गलस्तावत्तदनुकरोतीति आधाराधेयभावोऽत्र यद्यपि प्रतीयते, किन्तु **'मञ्चाः क्रोशन्ति'**[2] इतिवन्नायं दोषः।

लभते हि सुरम्यकामावचरादिदेवकायम्[3] इत्यादिना पोषधसंवरस्य विपाकफलं दर्शितं भवति। तथोक्तम्-- **'अहोरात्रं पोषधसंवरेण'**[4] षट्सु

---

[1] अर्हतां समीपे वसन्त्यनेनेति उपवासः, तेषामनुशिक्षणात्। यावज्जीविकसंवरसमीपे वसन्त्यनेनेत्यपरे। अल्पकुशलमूलानां कुशलमूलपोषणात् पोषध इति वा। "पोषं दधाति मनसः कुशलस्य यस्मादुक्तस्ततो भगवता किल पोषधोऽयम्।" इति।

--अभि.को.भा., पृ. ६२३, बौ.भा.प्र. १९८७ ।

[2] द्रष्टव्यम्--

यथा मञ्चस्थेषु पुरुषेषु क्रोशत्सु मञ्चाः क्रोशन्तीत्युपचारः तद्वत्।

--अभि.को.टी., पृ. ११५, बौ.भा.प्र.।

[3] ये बुद्धं शरणं यान्ति न ते गच्छन्ति दुर्गतिम्।
प्रहाय मानुष्यान् कायान् दिव्यान् कायांल्लभन्ति ते ।। --बो.च., ५/९८ ;

"इहायुष्मन्तो भिक्षुः शीलसम्पन्नश्च भवति, समाधिसम्पन्नश्च प्रज्ञासम्पन्नश्च। सोऽभीक्ष्णं संज्ञावेदितनिरोधं समापद्यते व्युतिष्ठते च, अस्ति चैतत् स्थानमिति यथाभूतं प्रजानाति। स न हैव दृष्ट एव धर्मे प्रतिपद्येवाज्ञामारागयति। नापि मरणकालसमयं भेदाच्च। कायस्यातिक्रम्य देवान् कवडीकारभक्षानन्यतरस्मिन् दिव्ये मनोमये काय उपपद्यते। स तत्रोपपन्नोऽभीक्ष्णं संज्ञावेदितनिरोधं समापद्यते च व्युतिष्ठते च, अस्ति चैतत् स्थानमिति यथाभूतं प्रजानाति" इति।

--अभि.को.भा., पृ. २४१-२४३, बौ.भा.सं. ९१८७।

सूत्रोक्तम्-- ते भवन्ति रूपिणो मनोमयाः सर्वाङ्गप्रत्यङ्गोपेता अविकला अहीनेन्द्रियाः शुभा वर्णस्थायिनः स्वयम्प्रभा विहायसङ्गमाः प्रीतिभक्षाः प्रीत्याहारा दीर्घायुषो दीर्घमध्वानं तिष्ठन्ति।

--अभि.को.भा., पृ. ५५४ ;

यच्चक्रवर्तित्वमवाप्नुवन्ति भवन्ति शक्रास्त्रिदशेश्वराश्च।
ब्रह्माण ईशा वशवर्तिनश्च तद् ब्रह्मचर्यं विपुलं चरित्वा।।

क्षितीश्वराश्चैव भवन्त्युदग्राः सुश्रेष्ठिनो वै गृहपत्यमात्याः।
सुखसौमनस्येन च यान्ति वृद्धिं ये ब्रह्मचर्यं विपुलं चरति।।

--शि.समु., पृ. ४८, मि.सं. १९६०।

कामावचरदेवेषु यथेच्छमुत्पत्स्यते’ इत्युच्यते। **पुमान् वा स्त्री** वेति पुरुषाय वा स्त्रियै वा (देवकायं) प्रापयति, न तु षण्ढादिभ्यः, तेषु संवरोत्पादस्य असम्भवात्। **लभत** इति प्रापयति।

गृहस्थेषु दुष्कृतासक्तिरागदोषवशाद् मात्सर्यादीनि सम्भवन्ति, तानि च दुर्गतिहेतुकानि, अतस्तानि निवर्तयितुमाह--

मात्सर्यशाठ्यमायाभिमानासक्तिकौसीद्यरागद्वेषान् ।
कुलरूपयौवनश्रुतबलादिजं मदं रिपुमिव परिपश्येच्च ।।१२।।

तत्र **मात्सर्यं**[1] तावद् दानविरोधी स्वसम्पत्तौ चेतस आग्रहः। **शाठ्यं**[2] स्वाशयं काक्वा प्रच्छादयति। **माया**[3] परवञ्चना। अनया परस्याशयं परिज्ञाय चातुर्येण परं

---

४ यावज्जीवं समादानमहोरात्रं च संवृत्तेः। सप्तवैकायिकस्य प्रतिमोक्षसंवरस्य यावज्जीवं समादानम्, उपवाससंवरस्य अहोरात्रमित्येष नियमः ।

--अभि.को.भा., पृ. ६२०।

१ मात्सर्यं कतमत्? लाभसत्काराध्यवसितस्य परिष्कारेषु रागांशिश्चेतस आग्रहः। असंलेखसन्निश्रयदानकर्मकम्।

--अभि.समु., पृ. ८, वि.भा.प्र. १९५० ;

मात्सर्यं दानविरोधी चेतस आग्रहः। उपात्तं वस्तु धर्मामिषकौशलात्मकम्। येन पूजानुग्रहकाम्ययाऽर्थिनेऽनर्थिने वा दीयते तद् दानम्, तस्मिन् सति दानाभावात् तद्विरोधीत्युच्यते। लाभसत्काराध्यवसितस्य जीवितोपकरणेषु रागांशिकश्चेतस आग्रहोऽपरित्यागेच्छा मात्सर्यम्। इदं चासंलेखनिश्रयदानकर्मकम्। असंलेखः पुनर्मात्सर्येणानुपयुज्यमानानामप्युपकरणानां संचयाद् वेदितव्यः।

--वि.मा.सि., पृ. २१९, प्रथम संस्करण, १९७२ ;

धर्मामिषकौशलप्रदानविरोधी चित्ताग्रहो मात्सर्यम्। --अभि.को.भा., पृ ८४४।

धर्मस्यामिषस्य च प्रदाने विरोधी चित्तस्याग्रहो मात्सर्यम्। मा मत्तः सरतु इत्याकारो मत्सरः। मत्सर एव मात्सर्यम्। मत्सरिणो वा भावो मात्सर्यम्।

--अभि.को.स्फु., पृ. ८४४, बौ.भा.प्र.।

२ शाठ्यं कतमत्? लाभसत्काराध्यवसितस्य रागमोहांशिका भूतदोषविमालना। सम्यगववादलाभपरिपन्थकरम्।

--अभि.समु., पृ. ८, वि.भा.प्र. १९५० ;

शाठ्यं स्वदोषप्रच्छादनोपायसंगृहीतं चेतसः कौटिल्यम्। स्वदोषप्रच्छादनोपायः परव्यामोहनम्। तत्पुनरन्येनान्यत् प्रतिसरन् विक्षिपति, अपरिस्फुटं वा प्रतिपद्यते। अत एव शाठ्यं म्रक्षाद् भिद्यते। स हि

व्यामोहयति। **आसक्तिर्हि** तृष्णा, सा च आत्मभोगयोरध्यवसानं प्रार्थना च। **कौसीद्यं**[१] वीर्यविपक्षो धर्मः, आलस्यमित्युच्यते। **अभिमानः**[२] अप्राप्ते प्राप्यविशेषे प्राप्तो मयेति

स्फुटमेव प्रच्छादयति, न काक्वा। इदमपि लाभसत्काराध्यवसितोपायाभ्यां रागमोहाभ्यां स्वदोषप्रच्छादनार्थं परव्यामोहनाय प्रवर्तते। तयोरेव सहितयोः प्रज्ञप्यते। इदं च सम्यगववादलाभपरिपन्थिकर्मकम्। सम्यगववादस्य यो लाभो योनिशोमनसिकारस्तस्यान्तरायं करोति।
--वि.मा.सि., पृ, २२२, सं.सं.वि.वि. १९७२।

३ माया कतमा? लाभसत्काराध्यवसितस्य रागमोहांशिका अभूतगुणसंदर्शना। मिथ्याजीवसन्निश्रयदानकर्मिका।
--अभि.समु., पृ. ८, वि.भा.प्र. ;

मायापरवञ्चना, या अभूतार्थसंदर्शनता। लाभसत्काराध्यवसितस्य परवञ्चनाभिप्रायेणान्यथावस्थितस्य शीलादेरर्थस्यान्यथा प्रकाशना। इयं च सहिताभ्यां रागमोहाभ्यां अभूतान् गुणान् प्रकाशयतस्तयोः समुदितयोः प्रज्ञप्यत इति क्रोधादिवत् प्रज्ञप्तित एव, न द्रव्यत इति मिथ्याजीवसंनिश्रयदानकर्मिका।
--वि.मा.सि., पृ. २२१।

१ कौसीद्यं कतमत्? निद्रापार्श्वशयनसुखमल्लिकामागम्य मोहांशिकश्चेतसोऽनभ्युत्साहः। कुशलपक्षप्रयोगपरिपन्थकर्मकम्। --अभि.समु., पृ. ९, वि.भा.प्र. ;

कौसीद्यं कुशले चेतसोऽनभ्युत्साहो वीर्यविपक्ष। कुशले कायवाङ्मनःकर्मणि निद्रापार्श्वशयनसुखमागम्य यो मोहांशिकश्चेतसोऽनभ्युत्साहः। एतच्च कुशलपक्षप्रयोगपरिपन्थिकर्मकम्।
--वि.मा.सि. पृ, २२९ ;

कौसीद्यं चेतसो नाभ्युत्साहो वीर्यविपक्षः। --अभि.को.भा., पृ. १९१, बौ.भा.प्र.।

२ मानः कतमः? सत्कायदृष्टिसन्निश्रयेण चित्तस्योन्नतिः। अगौरवदुःखोत्पत्तिसन्निश्रयदानकर्मकः।
--अभि.समु., पृ. ७, वि.भा.प्र. ;

मानेन दुर्गतिं नीता मानुष्येऽपि हतोत्सवाः।
परपिण्डाशिनो दासा मूर्खा दुर्दर्शनाः कृशाः ।।

सर्वतः परिभूताश्च मानस्तब्धास्तपस्विनः ।
तेऽपि चेन्मानिनां मध्ये दीनास्तु वद कीदृशाः।।

सप्तविधमानेषु अन्यतमेन मानेन दुर्गतिं नीता नरकादिषु पातिताः। अथ कथंचिन्मनुष्यप्रतिलम्भो भवति तेषाम्, तदा तत्रापि तन्निन्दाफलेन हतोत्सवा निरानन्दा भवन्ति। हीनदीनमनस इत्यर्थः। परपिण्डाशिनः आहारवैकल्यात् परदत्तभिक्षाहारभुजः। दासाः परतन्त्रवृत्तयोः भृत्याः। मूर्खाः सर्वविवेकशून्याः। दुर्दर्शनाः विरूपात्मभावा अप्रीतिजनकाश्च। कृशाः दुर्बलशरीराः सामर्थ्यरहिताश्च। सर्वतः सर्वेभ्योऽकृतापराधा अपि कायवचःपरिभवलाभिनो भवन्ति। के पुनरेवम्? मानस्तब्धास्तपस्विनः मानेन स्तब्धाः अनम्राः। तपस्विनो वराकाः। तेऽपि चेत्, एवंभूता अपि यदि मानिनां मध्ये गण्यन्ते, तर्हि दीनाः कृपणाः कृपापात्रमित्यर्थः। --बो.च.पं., ७/५७-५८, पृ. १३०।

चित्तस्योन्नतिरिति। **रागस्तु**[1] मैथुनतृष्णा। **द्वेषः**[2] सर्वसत्त्वेष्वाघातचित्तता। एते अष्टौ धर्माः कुलादिपञ्चमदाश्चेति त्रयोदश अकुशलधर्माः शत्रुवद् द्रष्टव्याः। एतैः साकं संस्पर्शो न विधेय इत्यर्थः। तत्र मदस्तावत्तैर्धर्मैश्चित्तप्रहर्षः।[3] यैर्मत्तपुरुष इव

मानो हि नाम सर्व एव सत्कायदृष्टिसमाश्रयेण प्रवर्तते। स पुनश्चित्तस्योन्नतिलक्षणः, तथा ह्यात्मात्मीयभावं स्कन्धेष्वध्यारोप्य 'अयमहम्, इदं मम' इत्यात्मानं तेन तेन विशेषेणोन्नमयति, अन्येभ्योऽधिकं मन्यते। स चागौरवदुःखोत्पत्तिसंनिश्रयदानकर्मकः। अगौरवं गुरुषु गुणवत्सु च पुद्गलेषु स्तब्धता कायवाचोरप्रसृतता, दुःखोत्पत्तिः पुनरत्र पुनर्भवोत्पत्तिः। स च पुनश्चित्तोन्नतिस्वरूपाभेदेऽपि चित्तोन्नतिनिमित्तभेदात् सप्तधा भिद्यते, मानोऽतिमान इत्येवमादि।

--वि.मा.सि., पृ २०५-२०६, सं.सं.वि.वि., १९७२ ;

.... मान उन्नतिः ।

येन केनचित् परतो विशेषपरिकल्पेन चेतस उन्नतिः मानः। --अभि.को., २/३३, पृ. २०७ ।

[1] रागः कतमः? त्रैधातुकोऽनुनयः। दुःखसंजननकर्मकः। --अभि.समु., पृ, ७, वि.भा.प्र. ;

तत्र रागो भवभोगयोरध्यवसानं प्रार्थना च। स पुनर्दुःखसंयोजनकर्मकः। दुःखमत्रोपादानस्कन्धास्तेषां कामरूपारूप्यतृष्णावशादभिनिर्वृत्तिः। अतो रागस्य दुःखसंयोजनं कर्म निर्दिश्यते।

--वि.मा.सि., पृ. २०२, ;

न रूपवन्तो हि भवन्ति रागात् न रक्तचित्ताः सुगतिं व्रजन्ति।
न निर्वृतिं यान्ति च रक्तचित्ता रागो हि तस्मात्परिवर्जनीयः।।

--शि.समु., पृ. ४७, मि.सं. १९६०।

[2] प्रतिघः सत्त्वेष्वाघातः सत्त्वेषु रूक्षचित्तता, येनाविष्टः सत्त्वानां वधबन्धनादिकमनर्थं चिन्तयति। स पुनरस्पर्शविहारदुश्चरितसंनिश्रयदानकर्मकः। स्पर्शः सुखम्, तेन सहितो विहारः स्पर्शविहारः, न स्पर्शविहारः 'अस्पर्शविहारः' दुःखसहित इत्यर्थः। आघातचित्तस्यावश्यं दौर्मनस्यसमुदाचारात् चित्तं तप्यते। चित्तानुविधानाच्च कायोऽपि तप्यत एवेति सर्वेर्यापथेषु सदुःखसविघातोऽस्पर्शविहारो भवति। प्रतिहतचित्तस्य च न किंचिद् दुश्चरितं विदूर इति प्रतिघोऽस्पर्शविहारदुश्चरितसंनिश्रयदानकर्मक उक्तः।

--वि.मा.सि., पृ. २०३-२०४ ।

[3] मदः कतमः? आरोग्यं वा आगम्य यौवनं वा दीर्घायुष्कलक्षणं वोपलभ्यान्यतमान्यतमां वा सास्रवां संपत्तिं रागांशिकनन्दीसौमनस्यम्। सर्वक्लेशोपक्लेशसन्निश्रयदानकर्मकः। --अभि.समु., पृ. ९ ;

मदः स्वसम्पत्तौ रक्तस्योद्धर्षश्चेतसः पर्यादानम्। कुलारोग्ययौवनबलरूपैश्वर्यबुद्धिमेधाप्रकर्षः स्वसम्पत्तिः। उद्धर्षो हर्षविशेषः। येन हर्षविशेषेण चित्तमस्वतन्त्रीक्रियते तेन तदात्मतन्त्रीकरणात् पर्यात्तं भवतीत्येतदुक्तं चेतसः पर्यादानमिति। अयं च सर्वक्लेशोपक्लेशसंनिश्रयदानकर्मकः। --वि.मा.सि., पृ. २२३ ;

मदः स्वधर्मे रक्तस्य पर्यादानं तु चेतसः।।

धर्माधर्मप्रतिपत्तिर्नैव सम्भवति। अत एव मदः स्वसम्पत्तौ रक्तस्योद्धर्षश्चेतसः पर्यादानम्। स्वसम्पत्तौ रागवशेन तत्र चित्तं पर्यादत्तं भवति, न चान्यौ धर्माधर्मौ परिज्ञायेते इति वाक्यार्थः।

गृहस्थेष्वपि प्रायशोऽप्रमादबहुला इति तान् तत्र प्रतिष्ठापयितुमाह-

अप्रमादोऽमृतपदं प्रमादो मृत्युपदमिति मुनिनादिष्टम् ।
कुशलधर्मस्य वृद्धये सदाऽप्रमादोऽभ्यसनीयस्त्वया चैव ।।१३।।

अमृतनिर्वाणस्याधारो**ऽप्रमाद**[1] इत्यर्थः । मृत्युपदञ्च **प्रमादः**[2]। कथं ज्ञायत इति चेत्? मुनिनादिष्टम् इत्युक्तम्, तथागतेन तथा निर्देशादित्यर्थः। यथोक्तम् गाथया...

अप्रमादोऽमृतपदं प्रमादो मृत्योः पदम् ।
अप्रमत्ता न म्रियन्ते ये प्रमत्ता यथा मृताः ।।इति।।[3]

मदस्तु स्वधर्मेष्वेव रक्तस्य यच्चेतसः पर्यादानम्। यथा मद्यज एवं रागजः। सम्प्रहर्षणविशेषो मद इत्यपरे। --अभि.को. २/३३, पृ. २०७, बौ.भा.प्र. ।

[1] तत्राप्रमादः प्रमादप्रतिपक्षः। अलोभाद् यावद् वीर्यम् अप्रमादः। यैरलोभादीन् निश्रित्य अकुशलान् धर्मान् प्रजहाति, तत्प्रतिपक्षांश्च कुशलान् धर्मान् भावयति, तेऽलोभादयोऽप्रमादः। अत एव प्रमादप्रतिपक्षः, प्रमादस्यातो विपरीतत्वात्। स पुनर्लौकिकलोकोत्तरसम्पत्तिपरिपूरणकर्मकः।
--वि.मा.सि., पृ. १९७, सं.सं.वि.वि., १९७२ ;

मा कुमार भव सुप्रमत्तको मा प्रमादवशमभ्युपेष्यसे।
अप्रमाद सुगतेन वर्णितो निन्दिता हि सुगतैः प्रमत्तकाः।।

अप्रमत्त इह ये च सूरता दानसंयमरता अमत्सराः।
सर्वसत्त्वकृपमैत्रमानसा ते भवन्ति नचिरान्नरोत्तमाः।।

येऽप्रमेय सुगता अतीताः साम्प्रतं च हि येऽप्यनागताः।
सर्व एव कुशलैस्त उद्गता अप्रमादपथ एव सुस्थिताः।।
--रा.परि.सू.(म.सू.सं.भाग-१) २२९-२३१ का.।

[2] बहुकल्पकोटीभि कदाचि बुद्धो उत्पद्यते लोकहितो महर्षिः।
लब्धोऽधुना स प्रवरः क्षणोऽद्य त्यज प्रमादं यदि मोक्षकामः।।
--रा.परि.सू.(म.सू.सं.भाग-१), ९१ का.।

[3] अप्पमादो अमतपदं, पमादो मच्चुनो पदं।

तत्र अप्रमादस्तावत् कुशलानां धर्माणां भावना, तद्विपरीतः प्रमाद इति ज्ञेयः। अत एव **कुशलधर्मस्य वृद्धये** इति निर्दिष्टम्। यतो हि महानुशंसोऽप्रमादस्ततस्त्वया कुशलधर्माणां विकासाय सदैव अप्रमत्तेन भाव्यम्। कुशलधर्माभ्यासो नैव परिवर्जनीय इत्यर्थः।

अथ ममार्थाय आदावेव प्रमादावस्थायां त्वया किं नोक्तम्, अधुना अप्रमादेन किं स्यादिति चेत्? आह....

पूर्वप्रमत्तः कोऽपि मेघान्निर्गतेन्दुरिव ततोऽप्रमादी ।[1]
स हि नन्दाङ्गुलिमालोदयनाजातशत्रुसदृशः सुशोभेत ।।१४।।

अप्पमत्ता न मियन्ते, ये पमत्ता यथा मता।। --धम्मपद (अप्पमादवग्ग), १ का० ;

यथोक्तमार्यचन्द्रप्रदीपसूत्रे--
यावन्ति धर्माः कुशलाः प्रकीर्तिताः शील श्रुतं त्यागु क्षान्तिः।
सर्वेष मूलं ह्ययमप्रमादो निधानलम्भः सुगतेन देशितः ।।
उक्तं हि आर्यतथागतगुह्यसूत्रे-- तत्र कतमोऽप्रमादः? यदिन्द्रियसंवरः। स चक्षुषा रूपाणि दृष्ट्वा न निमित्तग्राही भवति, नानुव्यञ्जनग्राही। एवं यावन्मनसा धर्मान् विज्ञाय न निमित्तग्राही भवति, नानुव्यञ्जनग्राही। सर्वधर्मेष्वास्वादं चादीनवं च निःशरणं च यथाभूतं प्रजानाति। अयमुच्यते अप्रमादः। पुनरपरम्-- अप्रमादो यत्स्वचित्तस्य दमनम्, परचित्तस्यारक्षा, क्लेशरतेरपरिकर्मणा, धर्मरतेरनुवर्तनम्, यावदयमुच्यतेऽप्रमादः। ....तथा अत्रैवाह--
सदाऽप्रमादो ह्यमृतस्य मूलं सत्त्वार्थयुक्तस्य च बोधिचित्तम्।
यद्योनिशश्चैव विवेकचित्तमपरिग्रहः सर्वसुखस्य मूलम् ।। ---शि.समु., पृ. १९१, मि.सं.।

[1] यो च पुब्बे पमज्जित्वा, पच्छा सो नप्पमज्जति।
सो इमं लोकं पभासेति, अब्भा मुत्तो व चन्दिमा।। --धम्मपद, १३/४ ;

तुलनीयम्-
मा पमादमनुयुञ्जेथ मा कामरतिसन्थवं।
अप्पमत्तो हि झायन्तो पप्पोति विपुलं सुखं।। --धम्मपद, २/७ ;

बहुकल्पकोटीभि कदाचि बुद्धो उत्पद्यते लोकहितो महर्षिः।
लब्धोऽधुना स प्रवरः क्षणोऽद्य त्यज प्रमादं यदि मोक्षकामः।।
--रा.परि.सू.(म.सू.सं.), ९१ का. मि.सं.।

तथा हि, यः कश्चित् पूर्वं प्रमत्तः, सोऽपि यदि पश्चाद् अप्रमादं सेवेत, शोभनमेव तत्, विघनेन्दुवत्। किमेवंविधाः केचन सत्त्वा दृश्यन्ते? तन्निर्देष्टुं **नन्दाङ्गुलिमाले**त्याद्युक्तम्। नन्दो हि एकः शाक्ययुवा महाकामुकः, सोऽत्यन्तं स्वपत्नीरागवशात् तदभावे क्षणमात्रमपि सुखं स्थातुं नैव शशाक। तथाविधः स तथागतेन गृहान्नीत्वा बलेन प्रव्राजितः। प्रव्रजितोऽपि स नक्तन्दिवं तामेव अनुचिन्तयति, नैव धर्मम्। तथाविधोऽपि स तथागतेन अर्हत्पदं प्रापितः।[१]

अङ्गुलिमालो ब्राह्मणबटुरासीन्मन्दबुद्धिः। तस्य गुरुणोपदिष्टं यदि त्वं सहस्रमेकं मानवान् हनिष्यसि तदा धर्मः स्यादिति । सोऽपि गुरोर्व्याकरणमनुसृत्य एकोनसहस्रमनुष्यान् हतवान्। तथाविधोऽपि स पश्चात् तथागतान्तिके प्रव्रज्य त्रिभ्यो धातुभ्यो वीतरागो बभूव।

अजातशत्रुर्हि अजातशत्रुः। स क्रोधन आसीत्। अकल्याणमित्रसंसर्गेण पूर्ववैरानुबन्धवशाच्च तेन धार्मिकः स्वपिता महाराजो (विम्बसारः) घातितः। सोऽपि कल्याणमित्रतथागतस्य शासनाश्रयेणैव नरकानलेन्धनीभावान्मुक्तः।[२]

---

[१] द्रष्टव्यम्--

यथा आर्यसुनन्दरनन्देन किल क्रकुच्छन्दे सम्यक्संबुद्धे भिक्षुसंघे जेन्ताकस्नानं कृतम्। तांश्च दृष्ट्वा चित्तं प्रसादितम्। भूयश्च सुवर्णेन हरितालेन प्रत्येकबुद्धस्तूपे लेपो दत्तः। इदमपि दृष्ट्वा चित्तं प्रसादितम्, अभिरूपतायां च परिणामितम्। भूयश्च स्तूपे क्रियमाणे प्रथमं छत्रं कारितम्। यथा पश्चमभवे स एव व्याकरोति-

जेन्ताकस्य च स्नानेन हरितालस्य लेपनेन च।
एकच्छत्रप्रदानाच्च प्राप्ता मे सुवर्णवर्णता।।

तथैवायं शोभितवान्। इदं कर्म प्रासादिकसंवर्तनीयम्। --महा.क.वि.(म.सू.सं), पृ. १८४ ;

[२] द्रष्टव्यम्--

यथा राजा अजातशत्रुः। तेन देवदत्तसहायेन आनन्तर्यं कर्म कृतम्। पितृवधः। संघभेदः। धनपालमोक्षणम्। शिलायन्त्रमोक्षणं देवदत्तस्यादेशेन। तस्मादवीचिनरकगमनं श्रुत्वा तेन संविग्नेन भगवति चित्तं प्रसादितम्। श्रामण्यफलसूत्रेऽत्ययदेशनं कृतम्। प्रतिसंदधाति कुशलमूलानि। तेन मरणकाले चित्तं प्रसादितम्। अस्थिभिरपि बुद्धं भगवन्तं शरणं गच्छामि। स उपपन्नमात्र एव च्यवति। इदं कर्म येन समन्वागतः पुद्गलो नरकेषूपपन्नमात्र एव च्यवति।

--महा.क.वि.(म.सू.सं.), पृ. १८९ ;

उदयनस्तावत् कुलपुत्रोऽयोनिशोमनस्कारवशतया परस्त्रीसहवासविरोधमाचरन्तीं स्वमातरं हतवान्। सोऽपि पश्चात् तथागतशासनमाश्रित्य कन्दुकोत्प्लवनमिव वज्र(अवीचि)-नरकान्निःसृत्य स्वर्गसुखमनुभूतवानिति श्रुतिः।

एवं नन्दादयस्ते पूर्वं प्रमत्ताः (प्रमादरताः) आसन्, पश्चाद् अप्रमादवशात् तत्तद्दुःखविशेषान्मुक्ता अभूवन्। अतस्त्वयापि पूर्वमाचरितेऽपि प्रमादेऽधुना अप्रमादोऽनुष्ठेय इति।

गृहस्था हि अनेकेच्छाविघातानीप्सितसंगमनवशेन प्रायः क्रोधबहुला भवन्ति, तेषां तच्छन्दादिनिवारणार्थं क्षान्तिं प्रतिपादयितुमाह-

क्षान्तिसमं नैव तपस्ततस्त्वया न क्रोधावसरो देयः ।
बुद्धेनानुमतं वै पदमवैवर्तिकं क्रोधप्रहाणेन ।।१५।।

क्षान्तिसदृशं नास्त्येव तपः[१], तस्मात् क्षान्तिरेव सर्वेषु तपःसु गरिष्ठा "**क्षान्तिः परमं तपः तितिक्षा**"[२] इति गाथावचनात्। क्षान्तिवान् एव तपस्वी, न तु प्रतिघचित्तो यः वायूदकमूलफलादीनि भुक्त्वा शुष्ककायः, न च जटा-पत्र-वल्कलजीर्णवसनः। इत्येवं क्षान्त्या तावत् क्लेशान् सन्तापयति, अन्याचरणैस्तु केवलं

---

[१] न द्वेषसमं पापं न क्षान्तिसमं तपः।
तस्मात्क्षान्तिं प्रयत्नेन भावयेद्विविधैर्नयैः।।

न च द्वेषेण समं पापमशुभं पुण्याभिभवहेतुरस्ति। न च क्षान्त्या तितिक्षया समं तुल्यं तपः। सुमहत्परिश्रमसाध्यत्वात् सुकृतम्। यत एवम्, तस्मात् क्षान्तिं क्षमां सर्वतात्पर्येण भावयेदभ्यसेत्। विविधैर्नानाप्रकारैरुपायैर्वक्ष्यमाणैः। --बो.च.पं., ६/२, पृ. ८१ ;

पुनश्च उक्तम्--

पुण्यविघ्नः कृतोऽनेनेत्यत्र कोपो न युज्यते।
क्षान्त्या समं तपो नास्ति नन्वेतत्तदुपस्थितम् ।। --बो.च. ६/१०२ ;

तत्र क्षान्तिस्त्रिविधा धर्मसंगीतिसूत्रेऽभिहिता-- दुःखाधिवासनक्षान्तिः, धर्मनिध्यानक्षान्तिः परापकारमर्षणक्षान्तिश्चेति। --शि.समु., पृ. १००. मि.सं. ; द्रष्टव्यम्-- म.सू.सं., पृ. ३३७, मि.सं.।

[२] खन्ती परमं तपो तितिक्खा, निब्बानं परमं वदन्ति बुद्धा।
न हि पब्बजितो परूपघाती, समणो होति परं विहेठयन्तो।।
--धम्मपद (बुद्धवग्ग), १४/६

कायसन्तापः। कायसन्तापेन तु सुगतिरपि नावाप्यते, किं पुनर्मोक्षः। एवं महोपकारित्वात् क्षान्तेः **त्वया न क्रोधावसरो देयः।** अपि च क्षान्त्यानुशंस्यप्रतिपादनाय **पदमवैवर्तिकं क्रोधप्रहाणेन** इत्यादिकमुक्तम्। यस्य क्रोधस्य प्रहाणेन बहुदुःखे कामधातौ अनागामी भवति पुद्गलः, अवैवर्तिकपदं प्राप्नोतीत्यर्थः। तथ्यमिदं स्वयं बुद्धेनाङ्गीकृतम्, साक्षी अस्मीत्यर्थः। यथोक्तं- भगवता **''क्रोधः परिहर्त्तव्यः, अवैवर्तिकपदप्राप्तये साक्षिभूतोऽस्म्यहम्''** इति। का क्षान्तिरिति चेत्? अक्रोधः, उत्पन्नेऽपि क्रोधे तत्क्षणमेव तस्य शमनम्, न तु द्वेषोपादानम्। कः क्रोधः? वर्तमानमपकारमागम्य सत्त्वासत्त्वविषयः यश्चेतस आघातः सत्त्वेषु रूक्षचित्तता क्रोध[१] इत्युच्यते।

---

[१] न हि वेरेन वेरानि सम्मन्तीध कुदाचनं।
अवेरेन च सम्मन्ति एस धम्मो सनन्तनो।। --धम्मपद, १/५ ;

मनः शमं न गृह्णाति न प्रीतिसुखमश्नुते।
न निद्रां न धृतिं याति द्वेषशल्ये हृदि स्थिते।।

पूजयत्यर्थमानैर्यान् येऽपि चैनं समाश्रिताः।
तेऽप्येनं हन्तुमिच्छन्ति स्वामिनं द्वेषदुर्भगम्।।

सुहृदोऽप्युद्विजन्तेऽस्माद् ददाति न च सेव्यते।
संक्षेपान्नास्ति तत्किंचित् क्रोधनो येन सुस्थितः।।

शमं प्रशमं न गृह्णाति नाश्रयते। अनुपशान्तं एव सदा द्वेषानलप्रज्वलितत्वात् न प्रीतिसुखं सौमनस्यसुखमश्नुते आप्नोति, तेनैवाक्रान्तत्वात्। न निद्रां न धृतिं चित्तसुखं लभते कायचित्तसंतापकारिणि द्वेषशल्ये हृदयनिवासिनि। पूजयति सत्करोति लाभसत्कारैर्यान्। येऽपि चानुजीविनः, एवं द्वेषिणं स्वामिनमपकर्तुमिच्छन्ति। किमिति? द्वेषदुर्भगम् अप्रियमिति हेतुपदमेतत्। सुहृदो मित्राण्यपि उद्विजन्ते उत्त्रसन्ति अस्माद् द्वेषिणः। दानोन्मुखोऽपि भृत्यवर्गैर्न सेव्यते नोपगम्यते। किं वहुना? इदमिह संक्षेपेणावधार्यताम्-- नास्ति तदुपशमकारणं किंचिद्येन कोपनः सुखं लभेत। ... एवमिह दृष्टधर्मेऽपि द्वेषदोषानवगम्य तत्परित्यागाय यत्नवता भवितव्यमित्याह--
एवमादीनि दुःखानि करोतीत्यरिसंज्ञया ।
यः क्रोधं हन्ति निर्बन्धात् स सुखीह परत्र च।। ---बो.च.पं., ६/३-६, पृ. ८२, मि.सं. ;

व्यापादविहिंसावर्जितः सत्त्वासत्त्वयोराघातः क्रोधः। --अभि.को.भा., ५/४८, पृ. ८४४ ;

अक्रोशीदवधीन्मामजैषीन्मामहार्षीद् वै वित्तं मे ।
वैरैरेभिः कलहस्त्यजति य एतद् वैरं स सुखं शेते ।।१६।।

इत्यनेन क्षान्तिरेवोपदिष्टा। चत्वारो वैरग्रहणप्रकाराः- अनेनाहं अपमानितः, अनेनाहं नाशितः, अनेनाहं पराजितः, अनेन मे धनं हृतमित्येवं वैरमुपनह्यते। यश्चतुर एतान् गृह्णाति, स प्रतीकारमारभते, तेन च कलहो जायते।[1] यस्मिन् एतादृशं ग्रहणं न भवति, स वैरं त्यक्त्वा दुःखाभावात् सुखं शेते।[2] एतद्विपरीतस्तु दुःखचित्तत्वात् सदुःखं शेते।

जलेऽवनौ पाषाणे चित्रमिव चित्तं त्रिधा खलु सत्त्वानाम् ।
क्लेशवतां हि प्रथमो धर्माभिलाषिणामन्तिमो ज्यायान् ।।१७।।

अनेन सर्वेषु पृथग्जनेषु पूर्वोक्तानि कुशलाकुशलचित्तानि समुद्भवन्तीति निर्दिष्टम्। अतस्त्वया कुशलं प्रति चित्तं द्रढयितुं यतनीयम्, न त्वकुशलं प्रति इत्युपदिष्टम्।[3] त्रिधा खलु सत्त्वानां चितम्, यथा- जले चित्रलेखनमिव, भूमौ

तत्र क्रोधो वर्तमानमपकारमागम्य यश्चतेस आघातः। अयं चाघातस्वरूपत्वात् प्रतिघात् न भिद्यते, किन्त्वस्य प्रतिघस्यावस्थाविशेषे प्रज्ञप्तत्वात् प्रतिघांशिकः। वर्तमानमपकारमागम्य यश्चेतस आघातः सत्त्वासत्त्वविषयो दण्डदानादिसंनिश्रयदानकर्मकश्च स क्रोध इति प्रज्ञप्यते।

--वि.मा.सि., पृ. २१५ ;

अनत्थं मे अचरीति आघातो जायति, अनत्थं मे चरतीति आघातो जायति, अनत्थं मे चरिस्सतीति आघातो जायति, पियस्स मे मनापस्स अनत्थं अचरि...प०... अनत्थं चरति....प०....अनत्थं चरिस्सतीति आघातो जायति, अप्पियस्स मे अमनापस्स अत्थं अचरि... प......अत्थं चरति....प....अत्थं चरिस्सतीति आघातो जायति, अट्ठाने पन आघातो जायति।

---ध.सं., पृ. २४१ नालन्दा संस्करण ।

[1] अक्कोच्छि मं अवधि मं, अजिनि मं अहासि मे।
ये च तं उपनय्हन्ति, वेरं तेसं न सम्मति ।। -- धम्मपद, १/३

[2] अक्कोच्छि मं अवधि मं, अजिनि मं अहासि मे।
ये च तं नूपनय्हन्ति, वेरं तेसूपसम्मति ।। --धम्मपद, १/४

[3] तुलनीयम्--
फन्दनं चपलं चित्तं, दुरक्खं दुन्निवारयं।

चित्रलेखनमिव, पाषाणे चित्रलेखनमिव च। फलतः पुरुषा अपि त्रिविधा वेदितव्याः। कानिचिद् अकुशलानि कुशलानि वा जले चित्रलेखनवद् भवन्ति, पाषाणे चित्रलेखनवदपि तथैव। तत्र क्लेशवतां कृते प्रथमं जले चित्रलेखनमिव तावदुचितम्, धर्मिष्ठानां कृते तु अन्तिमं पाषाणे चित्रलेखनमिवोत्तमम्। अतस्त्वया अकुशलं चित्तं जले चित्रलेखनमिव विधेयम्, कुशलं तु पाषाणे चित्रलेखनमिव विधातव्यमित्यभिप्रायः।

यथा सत्त्वानां त्रिविधं चित्तं तथैव वागपि त्रिविधेति निर्देष्टुमाह-

वाचस्त्रिधा जनेभ्यः प्रोक्ता जिनेन मधुरसत्यमिथ्याख्या ।
क्रमशो मधुः पुष्पाशुचितुल्याश्चरमा च परिहर्त्तव्यैतासु ।।१८।।

त्रिविधा जिनेन वाक् समुपदिष्टेत्यनेन योजनीयम्। कथं ताः? **मधुः पुष्पाशुचितुल्याः** इति। कास्ताः? **मधुर-सत्य-मिथ्याख्याः जनेभ्यः प्रोक्ताः**।[१] मधुरवचनं मधुवत्। अत एव आह्लादकत्वाद् रमणीयत्वाच्च हृदयङ्गममिति। सत्यवचनं पुष्पवत् प्रशंसनीयत्वात्। मिथ्यावचनम् अशुचिवद् निन्दनीयत्वाद्। इत्येतेषु त्रिषु वचनेषु अन्तिमं तावद् अशुचिसदृशम्, अतस्त्वया तत् प्रहातव्यमित्यर्थः।

उजुं करोति मेधावी, उसुकारो व तेजनं।। --धम्मपद, ३/१

[१] आर्यदशभूमकसूत्रेऽप्युक्तम्-- येयं वागमनोज्ञा स्वसंतानपरसंतानविनाशनी तथारूपां वाचं प्रहाय, येयं वाक् स्निग्धा मृद्वी मनोज्ञा मधुरा प्रियकरणी मनआपकरणी हितकरणी कर्णसुखा हृदयंगमा प्रेमणी वर्णविष्पष्टा विज्ञेया श्रवणीया अनिश्रिता बहुजनकान्ता बहुजनप्रिया बहुजनमनआपा विज्ञप्रशस्ता सर्वसत्त्वहितसुखावहा मनउत्प्लावकरी मनःप्रह्लादनकरी स्वपरसंतानप्रमोदनकरी रागद्वेषमोहसर्वक्लेशप्रशमनी, तथारूपां वाचं निश्चारयति। यावदितिहासपूर्वकमपि वचनं परिहार्य परिहरतीति।

आर्यगगनगञ्जसूत्रे तूक्तम्-- गुरुवचनानवमर्दनतया, परवचनानाच्छिन्दनतया चादेयग्राह्यवचनो भवतीति। धर्मसंगीतिसूत्रेऽप्युक्तम्-- गगनगञ्जो बोधिसत्त्व आह-- न बोधिसत्त्वेनैषा वाग्भाषितव्या यया परो व्यापद्येत। न सा वाग्भाषितव्या यया परं तापयेत्। न बोधिसत्त्वेन सा वाग्भाषितव्या यत्परो जानीयात्। न सा वाग्भाषितव्या यापार्था निरर्था। न बोधिसत्त्वेन सा वाग्भाषितव्या यया न विद्यामुत्पादयेत्। न सा वाग्भाषितव्या या सत्त्वानां न हृदयंगमा न पौरी न कर्णसुखा, न सा वाग्भाषितव्येति।

--शि.समु., पृ. ७१, मि.सं.।

संसारे संसरतां चतुर्विधास्तावच्चर्याः। अतस्त्वया श्रेष्ठायां चर्यायां स्थातव्यमित्यत्र योजनार्थमाह-

चतुर्विधा वै पुरुषाः प्रकाशात्प्रकाशे तमसस्तमसि पुनः ।
तमः प्रकाशाद् गच्छति तमसस्तेजसि पुद्गलो वरः प्रथमः ।।१९।।

यथा सूत्रे प्रकाशात् प्रकाशमनुगमनम्। तत्र **प्रकाशात् प्रकाशे** तावत् सुभगेषु मनुष्येषु देवेषु चोत्पद्य पुनस्तत्रैवोत्पद्यन्ते। **तमसस्तमसि** तु ये दुर्गतिषु दुर्भगेषु मनुष्येषु चोत्पद्य पुनस्तत्रैवोत्पद्यन्ते। **प्रकाशात् तमः गच्छती**ति तावत् सुभगेषु मनुष्येषु देवेषु चोत्पद्य पुनस्तिसृषु दुर्गतिषु वा अल्पभाग्येषु मनुष्येषु उत्पद्यन्ते, यथा- मात्सर्यानुरक्ताः। **तमसस्तेजसि** तु ये तिसृषु दुर्गतिषु दुर्भगेषु मनुष्येषु चोत्पद्य देवलोकेषु सुभगेषु मनुष्येषु चोत्पद्यन्ते, यथा- देवपुत्रः मण्डूकः। एते चत्वारः पुद्गलाः। तेषु तावत् प्रथमः श्रेष्ठ :। अतः प्रकाशात् प्रकाशे गन्तव्यमिति।

गृहस्थाः सम्प्रति बहुभिः सत्त्वैः सह संवसन्ति, तेषु कः समीचीन इति युक्त्या प्रतिपादनाय तेषां चर्याविशेषं दर्शयितुमाह-

जनानां त्वाम्रफलमिव पक्वमपक्वे पक्वेऽपक्वतुल्यं च ।
अपक्वेऽपक्वं तथा पक्वे पक्वमिव भाति चातुर्विध्यम् ।।२०।।

इति। चतुर्विधमाम्रफलम्। अपक्वेऽपि किमपि बहिः पक्वमिव भाति, कानिचित् पक्वानि अपि बहिः हरीतिमाऽवियोगाद् अपक्वानीव प्रतीयन्ते। कानिचिद् अपक्वानि अपक्वानीव च दृश्यन्ते तथा कतिपयानि पक्वानि पक्वानीव च लक्ष्यन्ते। तथैव पुद्गला अपि चतुर्विधा वेदितव्याः। प्रथमः आशयहीनोऽपि प्रयोगसम्पन्नः, द्वितीयः प्रयोगहीनोऽप्याशयसम्पन्नः, तृतीयस्तावत् उभाभ्यां हीनः, चतुर्थस्तु उभयसम्पन्न इति।

गृहस्थेषु काममिथ्याचारविरतिर्दुष्करा, तथा सति परस्त्रीदर्शने तत्पूर्वगामिनो भवन्ति, अतस्तन्निवृत्त्यर्थमाह-

परदारान्न तु पश्येद् दृष्टे च ज्ञेया अवस्थानुरूप्येण ।
कन्याम्बाभगिनीवद् आसक्तावप्यशुचिमेव चिन्तयेच्च ।।२१।।

इति। यथोक्तं सूत्रे- "**भदन्त, स्त्रीषु कथं प्रतिपत्तव्यमिति पृष्टे आनन्द, अदर्शनेन**" इति। गृहस्थानामत्र प्रसङ्गात् 'परस्त्री' एव ज्ञातव्या। दर्शने सति तासु मातृ-दुहितृ-भगिनीसंज्ञा उत्पादनीया। सापि नैवाक्रमेण, अपि तु वयोऽनुरूपतया।[1] तथा चिन्तनेऽपि सति राग उत्पद्येत अथवा दृष्टौ सत्यामासक्तिर्भवेत् तदा ताः स्त्रियः 'दुर्गन्धशरीरा नवाशुचिद्वाराः' इत्यादिरूपेण अशुचिमेव तासां सम्यक् चिन्तयेत्।

अशुचिचिन्तायामपि यदि शुचिचित्तमेव समुद्भवेत्तदा कथं वर्तितव्यमिति चेत्? चित्तमेव रक्षणीयमिति निर्देष्टुमाह-

रक्षेच्चञ्चलचित्तं श्रुति-पुत्र-निधि-प्राणसदृशं च नितराम् ।
चित्तं परिहर्त्तव्यं शत्रुसर्पविषायुधाग्निसमात् कामात् ।।२२।।

इति। यथोच्यते- लोके यथा श्रवणादिकं महार्थत्वेन रक्ष्यते तथैव चित्तं त्वया संरक्षणीयमिति। अत्रापि यदि रक्षिष्यते तदा नूनं सुखं प्राप्स्यते।[2] यथोक्तं भगवता-

---

[1] दृष्ट्वा च दारान् हि परस्य ये वै कुर्वन्ति माताभगिनीति संज्ञाम्।
प्रासादिकास्ते हि सुदर्शनीया भवन्ति नित्यं परमं मनोज्ञाः।। --शि.समु., पृ. ४७, मि.सं. ;
द्रष्टव्यम्-

चत्तारि ठानानि नरो पमत्तो, आपज्जति परदारसेवी।
अपुञ्ञलाभं न निकामसेय्यं, निन्दं ततीयं निरयं चतुत्थं।। --धम्म. २२/४ ;

नैकयान्यस्त्रिया कुर्याद्यानं शयनमासनम्।
एकया अद्वितीयया अन्यस्त्रिया। गृहिप्रव्रजितयोरिदमिह साधारणमित्यन्यग्रहणम्। न कुर्याद्यानादि।
--बो.च.पं., पृ. ७४, मि.सं.।

[2] व्याघ्राः सिंहा गजा ऋक्षाः सर्पाः सर्वे च शत्रवः।
सर्वे नरकपालाश्च डाकिन्यो राक्षसास्तथा।।

सर्वे बद्धा भवन्त्येते चित्तस्यैकस्य बन्धनात्।
चित्तस्यैकस्य दमनात् सर्वे दान्ता भवन्ति च।।
सुबोधम्। कुतः पुनरेवमित्याह--

''चित्तं दान्तं सुखावहम्''[1] इति। अन्यच्च विषादिभ्य इव कामसुखेभ्य उद्विजेत्। सर्प इति आशीविषः। स चण्डत्वेन चित्तोद्वेगस्य हेतुः। हननात्मकत्वेन विषम्। दुःखोत्पादहेतुत्वेन शस्त्रम्। दहनात्मकत्वेन अग्निः। स्वपरबाधकत्वेन इमे सर्प इव अनिष्टकरा एव। कुशलकर्मविप्रणाशकत्वेन इमे विषमिव हननस्वभावा एव। दुर्गतिप्रापकत्वेन इमे दुःखोत्पादकायुधवदिति। देवमनुष्याणां सम्पत्तेर्दूरीकरणाद् इमे शत्रुवत् सुखान्तरायकरा एव। कौकृत्योपसंहारकत्वेन अग्निवत् सन्तापकरा एव। अत एव कामसुखेभ्यश्चित्तमुद्वेजनीयम्।[2] अन्यच्च कामास्तावदनर्थोत्पादकाः, तस्मात् कामसुखेभ्यः उद्विग्नमना भूयात्।

कथं सर्पादिभ्य इव कामसुखेभ्यश्चित्तोद्वेगः सम्पादनीय इति चेदाह-

कामस्त्वनर्थजनकः प्रोक्तः किम्पाकफलसमो जिनेन्द्रेण ।

यस्माद् भयानि सर्वाणि दुःखान्यप्रमितानि च।
चित्तादेव भवन्तीति कथितं तत्त्ववादिना।।

सर्वे ह्येते कर्माक्षेपवशादनिष्टदायका भवन्ति। कर्म च चित्तमेव। चेतना कर्मेति वचनात्। वाक्कायकर्मणोरपि चित्तमेव समुत्थापकम्। तदन्तरेण तयोरनुत्पत्तेः। चेतयित्वा कर्मेति वचनात्। तस्मात् सर्वमिह कर्मनिर्मितमेव। तच्च चित्तान्नान्यत्। तदाह--

कर्मजं लोकवैचित्र्यं चेतना तत्कृतं च तत्।
चेतना मानसं कर्म तज्जे वाक्कायकर्मणी ।। इति।। (अभि.को., ४/१)

न च अनपकारचित्तस्य केचिदपकारिणो नाम। यस्मात्--

निवृत्तपापचित्तस्य नास्ति लोके भयं द्विषः।
सुखहानिर्न तस्यास्ति यस्य चित्तं वशे स्थितम्।।

--बो.च.पं., ५/४,५,६, पृ. ५१, मि.सं.।

[1] चित्तस्स दमनं साधु चित्तं दन्तं सुखावहं। --धम्मपद, ३/३

[2] तुलनीयम्-

न शस्त्रं न विषं नाग्निर्न प्रपातो न वैरिणः।
कामानामुपमां यान्ति नरकादिव्यथास्मृतेः ।।

अमी शस्त्रादयो दुःखजनकत्वेन प्रसिद्धा न सादृश्यं भजन्ते प्रति कामानाम्। कस्मात्? नरकादिदुर्गतिदुःखस्य आगमात् प्रतिपन्नस्य स्मरणात् स्मरणेनामुखीकरणात्। शस्त्रादयो हि नियतकालं मरणमात्रदुःखदायकाः, कामास्तु दीर्घकालिकतीव्रनरकादिदुःखहेतव इति कीदृशी तैरुपमा भवेत्?

--बो.च.पं, ८/८४, पृ. १५४, मि.सं. १९६०।

पाशैस्तस्य हि बद्धो भवचारके लोकः स प्रहातव्यः ।।२३।।

इति। 'तु'- शब्दो यस्मादित्यर्थः। उपभोगकाले कामं सुखमनुभूयते, तथापि परिणामे ह्यनर्थजनक एव, तस्माद् विद्वद्भिर्नूनं विषयुक्तभोजनमिव स प्रहातव्य एव।[1]

---

[१] यतश्चैते कामा एवं स्मरणप्रार्थनाविषयमपि गता एवमनर्थकराः, तेनैव कामापवादकसूत्रेऽभिहितम्-- निवारय भिक्षो चित्तं कामेभ्यः। सभयश्चैष मार्गः सप्रतिभयः सकण्टकः सगहन; उन्मार्गः कुमार्गो वेदनापथः असत्पुरुषसंसेवितः। नैष मार्गः सत्पुरुषसंसेवितः। ....

कामस्य हेतोर्निरयं पतन्ति प्रेतास्तिरश्चोऽथ भवन्ति रागात्।
कुम्भाण्डयक्षा असुराः पिशाचा भवन्ति ये रागपरीत्तचित्ताः।।

काणाश्च खञ्जाश्च विजिह्वकाश्च विरूपकाश्चैव भवन्ति रागात्।
भवन्ति नानाविधदोषभाजश्चरन्ति ये कामचर्ीं जघन्याम् ।।

---शि.समु., पृ ४६, ४८, मि.सं. ;

कामा ह्यनर्थजनका इह लोके परत्र च।
इह बन्धवधोच्छेदैर्नरकादौ परत्र च।। बो.च., ८/४० ;

आर्यरत्नमेघेऽप्यनर्थवर्जनमुक्तम्-- तावत्पिण्डाय चरति यावदस्य कार्यस्य प्राप्तिर्भवति। अन्यत्र येषु स्थानेषु चण्डा वा कुक्कुरास्तरुणवत्सा वा गावः प्रकृतिदुःशीला वा तिर्यग्योनिगता विहेठनाभिप्राया वा स्त्रीपुरुषदारकदारिकाः, जुगुप्सितानि वा स्थानानि, तानि सर्वेण सर्वं वर्जयतीति।

--शि.समु.(उद्धृतः), पृ. ६६, मि.सं. ;

संकल्पप्रभवो रागो द्वेषो मोहश्च कथ्यते।
शुभाशुभविपर्यासान् सम्भवति प्रतीत्य हि।।

कामं जानामि ते मूलं संकल्पात् किल जायसे।
न त्वां संकल्पयिष्यामि ततो मे न भविष्यसि ।।

--म.शा. २३/१, (उद्धृतं), पृ. १४९, बौ.भा.प्र. १९८३ ;

तत्रैव रज्यते कश्चित् कश्चित्तत्रैव दुष्यति।
कश्चिन्मुह्यति तत्रैव तस्मात् कामो निरर्थकः।।

रञ्जनीयवस्त्वायत्तोदयो हि रागः। तच्च रञ्जनीयं वस्तु स्वरूपासिद्धम्। तथाहि-- यदेव ह्येकस्य रञ्जनीयं तदेवापरस्य द्वेषणीयं मोहनीयं वोपलभ्यते। यदि च रञ्जनीयं वस्तु स्वरूपतः स्यात् सर्वदा सर्वस्य च तथैव स्यात्। न त्वेष नियमो दृष्टः। तथाहि-- रज्यति तत्रैवापरो दुष्यति तत्रैवापरो मुह्यति। तस्माद् विषयकामः स्वरूपासिद्धत्वाच्छून्यः। न चैवं रञ्जनीयवस्तुशून्यताभावनातत्परस्य योगिनो रागप्रहाणं न सम्भाव्यत् इति।

--चतु.श.वृ., ८/२, पृ. १२-१३, आलोक, प्र., नागपुर, १९७१।

आदौ प्रहर्षकरत्वात् परिणामे परितापकत्वाच्च कामाः जिनेन्द्रेण किम्पाक (इन्द्रायणी)-फलसदृशाः प्रोक्ताः, यस्य बही रूपमात्रमेव शोभनम्, न त्वभ्यन्तरे स्वादु। अपिच, कामाः संसारबन्धहेतुत्वात् सुतरां प्रहातव्या एवेति निर्दिश्य **पाशैस्तस्य हि बद्धो भवचारके लोकः** इति संसारकारागारे विषयलौहश्रृङ्खलाभिर्बद्धोऽयं सत्त्वलोक इत्यर्थः।

य इन्द्रियाणि निगृह्णाति, तस्य प्रशंसामुखेन क्षान्त्युत्पादनार्थमाह-

चलाध्रुवाणि षडक्षाणि जयन्ति समरे वा शत्रूनपि चैके ।
तयोश्च सुधियः प्रथमं वरमिन्द्रियविजेतारं च मन्यन्ते ।।२४।।

इति। विषयसंस्पर्शेन विकारित्वादस्थिराणि, विषयाधिरागेण च चलानि। केचित् षडिन्द्रियाणि पराजयन्ति, केचिच्च संग्रामे शत्रुगणं पराजयन्ति, तेषु विद्वांसो मनीषिणः प्रथमान् ये जितेन्द्रियास्तान् श्रेष्ठा इत्यभ्युपगच्छन्तीत्यर्थः।[1] पशवोऽपि शत्रून् विजयमाना दृश्यन्ते, किन्तु न हि ते इन्द्रियाणि जेतुं शक्नुवन्ति।

अशुचिरेव सम्यक् चिन्तनीयेति प्रतिपादनार्थमाह-

युवतिशरीरं हि पूति यन्नवाशुचिद्वारमशुचिभाण्डसमम् ।
चर्मावृतदुष्पूरं भूषितमपि भूषणैः पृथग् द्रष्टव्यम् ।।२५।।

इति। तत्र शरीरेतिशब्दस्य पूतीत्यादिप्रत्येकशब्देन सह योगः करणीयः। अत्र शरीरमिति कुरूपम्, अशुचि दुर्गन्धाश्रयम्, तृप्तिरहितम्, अन्तःसारहीनमिति पञ्चभिरभद्रैः समन्वितम्।[2] एवमिदं युवतिशरीरं सुनिपुणं निरीक्षणीयम्। अलङ्कृतमपि

---

[1] सिंहनादं नदि बुद्धः सिंहविक्रान्तविक्रमः ।
जितास्ते तीर्थिकाः सर्वे सिंहेन क्रोष्टुका यथा।। --समाधि.सू., १४/२०

[2] मारस्य गोचरो ह्येष प्रस्थिता येन दुर्गतिः।
आस्वादसंज्ञिनो गृद्धा मीढस्थाने यथा क्रिमिः।।

कीटकुम्भो यथा चित्रो यत्र यत्रैव दृश्यते।
पूर्णो मूत्रपुरीषेण दृतिर्वा वातपूरिता।।

अलङ्कारैः पृथक्कृत्य निभालयेत्। अनेन दर्शनविधिना कामाग्निं तावदुपशमयेत्। यदा अलङ्कारालङ्कृतशरीरम् अभिन्नं दृश्यते, तदा कामाग्निर्वर्धत एव। तेन त्वया मैवं द्रष्टव्यमित्यभिप्रायः।[१]

सिङ्घाणककफा लालाः श्लेष्मणि क्लिन्नमस्तकाः।
दौर्गन्ध्यं स्रवते कायाद् बालानां तद्यथा मधु।।

अस्थिपूर्णं मुखद्वारं मांसचर्मादिभिश्चित्तम्।
गण्डभूतो ह्ययं कायः कुत्सितो’ह्यामगन्धिकः।। --शि.समु., पृ. ४८, मि.सं.।

[१] न स्वीकरोषि हे मूढ काष्ठपुत्तलकं शुचिम्।
अमेध्यघटितं यन्त्रं कस्माद्रक्षसि पूतिकम्।।

हे मूढ, मोहविजृम्भितमेतद् भवतः। शुचिं पवित्रम्। अयं च अशुचिः। इदमेवाह-- अमेध्येति। पूतिकं शतनधर्मकम्। स्यादेतत्-- किमन्यस्मिन्नसन्नपि दोष उच्यते इत्यत्राह--

इमं चर्मपुटं तावत्स्वबुद्ध्यैव पृथक्कुरु।
अस्थिपञ्जरतो मांसं प्रज्ञाशस्त्रेण मोचय।।

अस्थीन्यपि पृथक्कृत्वा पश्य मज्जानमन्ततः।
किमत्रसारमस्तीति स्वयमेव विचारय ।।

चर्ममयं पुटम्। स्वमतिविशेषेण पृथक् कुरु स्वकायादपसारय। अस्थिघटितपञ्जराद् यन्त्रात् प्रज्ञात्मकेन शस्त्रेण मांसकर्तनेन। तदनन्तरमस्थीन्यपि खण्डशः पृथग् भिन्नानि कृत्वा मज्जानं पश्य अवलोकय। यदि अन्तरं कायः चतुर्महाभूतिकः मातापित्रशुचिकललसंभूतः दुःखमयः कृतघ्नश्चेति विस्तरेण प्रतिपादयिष्यतीति किमत्र सारमस्ति विज्ञप्रशस्तं न्याय्यं वा, इत्यात्मनैव विचारय।
--बो.च.पं., ५/६१-६३, पृ. ६५, मि.सं. ;

तूलगर्भैर्मृदुस्पर्शै रमन्ते नोपधानकै :।
दुर्गन्धं न स्रवन्तीति कामिनोऽमेध्यमोहिताः।।

यत्र च्छन्नेऽप्ययं रागस्तदच्छन्नं किमप्रियम्।
न चेत्प्रयोजनं तेन कस्माच्छन्नं विमृद्यते।।

यदि ते नाशुचौ रागः कस्मादालिङ्गसेऽपरम्।
मांसकर्दमसंलिप्तं स्नायुबद्धास्थिपञ्जरम्।।

मांसमेव कर्दम इव लेपनसाधर्म्यात्, तेन लिप्तमुपदिग्धम्। किमेवंभूतमिति चेत्, स्नायुबद्धास्थिपञ्जरम्, स्नाय्वाबद्धं सङ्गीकृतम्, आयत्तीकृतम् अस्थिपञ्जरम् अस्थिसंकलम्। अन्यथा खण्डशो विशकलितं स्यात्, इति विरागविषयतामस्य दर्शयति। अथ शुचौ राग इति द्वितीयो विकल्पः स्वीक्रियते, तत्राह-- स्वमेवेत्यादि। अथवा। अन्यथावतार्यते-- यदुक्तं परेण-- छन्ने चर्मादिना रागो भवति नाच्छन्ने। तत्राह--

अपि च, कामभोगतृप्त्यर्थं यदि कश्चिद् शरीरं सेवेत, तदा सहस्रकल्पपर्यन्तमपि कामसेवनेन तृप्तेरभावात् किं तावत् तत्सेवनेनेति प्रतिपादयितुमाह-

कृमिपीडितो हि कुष्ठी सुखलिप्सया च यथा वह्निमाश्रयते ।
पीडा न याति शान्तिं तथैव हि कामासक्तिरपि बोद्धव्या ।।२६।।

इति। यथा हि कुष्ठरोगी कृमिजनितां पीडां निराकर्तुम् अग्निं सेवते, तथापि सा नैवोपशान्ता भवति, तथैव बाला अपि कामपीडां निवारयितुं विषयान् सेवन्ते, तथापि तृप्तिं नानुभवन्ति, अपि तु भूयसा हानिरेव।[१] अयं तावत् कामरागपर्यवदानप्रयोग आख्यातः।

नैतावता सर्वस्य कामरागस्योपच्छेदः। सर्वमुन्मूलयितुकामेन मार्गोऽयं त्वया भावनीय इत्यावेदयितुमाह-

परमार्थं प्रतिवेत्तुं सर्वभावेषु सविधि मनसि निधायैव ।
स च खलु भावयितव्यो न हि तत्तुल्योऽपरो गुणयुतो धर्मः ।।२७।।

इति। **परमार्थस्**तावदविपरीतो धर्मस्वभावः।[२] **प्रतिवेत्तुमिति** तद्विषयकज्ञानोत्पादनायेत्यर्थः। **सर्वभावेषु सविधि मनसि निधायैव** इति रूपादिस्कन्धान् आलम्ब्य

यदीत्यादि। यदि तेन हेतुना चर्मादिना पिहितत्वादिति कृत्वा अशुचौ रागो भवति भवतः, तदा कस्मादालिङ्गसे परमन्यदीयं पञ्जरम्।

---बो.च.पं., ८/५०-५२, पृ. १४६-१४७, मि.सं. ;

एताः स्त्रियो हि छविमात्रकरूपरम्याः, स्नाय्वस्थियन्त्रमशुचीभि निरर्थकोऽहम्।
प्रस्राविणी रुधिरमूत्रशकृन्मलानां व्यक्तं श्मशानसदृशीषु कथं रमेयम् ।।

--राष्ट्र.परि.(म.सू.सं.), २५७का., पृ. १४७, मि.सं.।

[१] कच्छ्वाकण्डूयेन सौख्यं कच्छ्वाऽभावस्ततः सुखम्।
रागिलोके सुखं तद्वत् रागाभावस्ततः सुखम्।।

--रत्ना. (पुनरुद्धार), २/६९, ति.सं.।

[२] अपरप्रत्ययं शान्तं प्रपञ्चैरप्रपञ्चितम्।
निर्विकल्पमनानार्थमेतत् तत्त्वस्य लक्षणम्।।

योनिशो मनस्करणम्। अर्थात् परमार्थज्ञानोत्पादानुरूपं मनसि करणीयमित्यर्थः। अत्र योनिशो 'मनसिकार'-शब्देन चित्त-चैतसिकसमूहः संगृह्यते। अर्थादत्रायं प्रधानत्वेन देशितः। मनसि निधायैव **स च खलु भावयितव्यः** इति अविपरीतत्वेन पुनः पुनः अभिमुखीकृत्य समुद्गृह्णीयादिति। किमनया भावनयेति चेत्? न हि **तत्तुल्योऽपरो गुणयुतः** इत्यादिकमुक्तम्। परमार्थज्ञानमुत्पाद्य यः क्लेशोपशमक्रमेण सत्त्वान् निर्वाणसुखं प्रापयति, स गुणयुतो धर्मः। ईदृशोऽपरो धर्मो लोके कश्चिन्नास्त्यतोऽयमेव सर्वधर्मेषु गुणवत्तमः। योनिशो मनसिकारोऽपि निर्वेधभागीयावस्थायामनित्य-दुःखशून्यानात्मस्वभावो वेदयितव्यः, आर्यमार्गोत्पादानुकूलत्वात्।

सम्प्रति अस्याः प्रज्ञायाः माहात्म्यख्यापनार्थमाह-

सुकुलीनोऽपि न पूज्यो ज्ञानशीलविमुखो श्रुतिरूपवान् पुमान् ।
गुणद्वयैतद्युक्तः पूज्यते सोऽन्यगुणैर्हीनोऽपि सततम् ।।२८।।

इति। महाशालविटपवत् राजकुलादिसमुत्पन्नाः रूप-वर्ण-संस्थान-लक्षणसम्पन्नाः सर्वशास्त्रविशारदाः श्रुतवन्तो वा ये तेऽपि समुदीरितप्रज्ञाशीलविरहिताश्चेद् लोके नैव सत्करणीया न समादरणीयाः, नैव च विश्वसनीयाः। कुलादिगुणानामभावेऽपि यदि प्रज्ञावन्तः शीलवन्तश्च तदा ते पूजनीया एव। अत एतयोर्गुणयोराधाने यत्न आस्थेयः। कुलादिभिर्नैव मानो विधातव्य इत्यभिप्रायः।

तत्र नास्मिन् परप्रत्ययोऽस्तीति अपरप्रत्ययम्। परोपदेशागम्यम्। स्वयमेवाधिगन्तव्यमित्यर्थः। यथा हि तैमिरिका वितथं केशमशकमक्षिकादिरूपं पश्यन्तो वितिमिरोपदेशेनापि न शक्नुवन्ति केशानां यथावदवस्थितं स्वरूपदर्शनन्यायेन अधिगन्तव्यमतैमिरिका इवाधिगन्तुम्, किं तर्हि? अतैमिरिकोपदेशान्मिथ्यैतदित्येतावन्मात्रकमेव प्रतिपद्यन्ते। यदा तु तिमिरोपघात्यविपरीतशून्यतादर्शनाञ्जनाञ्जितबुद्धिनयनाः सन्तः समुत्पन्नतत्त्वज्ञाना भवन्ति, तदा तत् तत्त्वमनधिगमनयोगेन स्वयमधिगच्छन्तीति। एवमपरप्रत्ययं भावानां यत् स्वरूपं तत् तत्त्वम्। एतच्च शान्तस्वभावमतैमिरिककेशादर्शनवत् स्वभावविरहितमित्यर्थः। अत एव तत् प्रपञ्चैरप्रपञ्चितम्। प्रपञ्चो हि वाक्, प्रपञ्चयति अर्थानिति कृत्वा। प्रपञ्चैरप्रपञ्चितं वाग्भिरव्याहृतमित्यर्थः।

--म.शा.वृ., १८/९, पृ. १५८-१५९, बौ.भा.प्र., १९८३।

अष्टसु लोकधर्मेषु लोकवित् समतया प्रवर्तयेच्चित्तम् ।
हानिलाभयशोऽयशोऽनुशंसानिन्दासुखदुःखेष्वशोच्येषु ।।२९।।

इति। अनेन आर्यमार्गोत्पादानुरूपता प्रदर्श्यते। लोकधर्मावस्थितौ आर्यमार्गानुत्पादात्। अतोऽवश्यमेव लोकधर्मेषु समताऽवाप्यते। इमे लोकधर्मास्तु लाभालाभादिकमवलम्ब्य सौमनस्यदौर्मनस्यादयः, न तु लाभालाभादयः, आर्येष्वपि तेषां विद्यमानत्वात्। अत एवालम्बनवशतया अष्टौ लौकिकधर्माः वेदितव्याः।[१] तत्रापयशोनिन्दे तावत् परोक्षापरोक्षविशेषेण ज्ञातव्ये। एतेष्वष्टलोकधर्मेषु समता न विखण्डनीयेति तेषु सौमनस्यदौर्मनस्ये नोत्पादनीये इत्यर्थः। ते सन्ति अशोच्याः, यतो हि एतानाश्रित्य चित्तविक्षोभकाः क्लेशाः समुत्पद्यन्त इति लाभालाभादीनि वस्तूनि नैव विषयीकर्तव्यानीत्यर्थः।

पुनश्च, अधर्मोऽपि तावल्लोके धर्मवत् प्रसिध्यतीति तन्निवृत्त्यर्थमाह-

भवद्भिर्ब्राह्मणभिक्षुदेवातिथिमातापितृकुलमहिषीभ्यः ।
पापं नाचरणीयं यतः कतमोऽपि न नरकफलस्य भागी ।।३०।।

इति। नैव त्वया ब्राह्मण-भिक्षु-देवातिथिमात्रादीनां कृते पापमाचरणीयम् । तत्कस्य हेतोः? **कतमोऽपि न भागी नरकफलस्य**[२] इत्युक्तम्। एतेषां कृते विहितेन

---

[१] लाभ अथ अलाभे सौख्यदुःखे जिनस्य, अयशसि यश एवं निन्दशंसासु चैवम्।
जलरुहमिव तोयैः सर्वतो नोपलिप्तः एवमिह नृसिंहो नास्ति सत्त्वः समोऽस्य ।।
--रा.परि.सू.(म.सू.सं. भाग-१), पृ. १५१, मि.सं. ;

अपि च द्रष्टव्यम्-- धर्मसंग्रह(म.सू.सं. भाग-१), पृ. ३३२ ; महाव्युत्पत्ति, दे.तन. 'चो' पृ. ४५ ; समाधि.सू., पृ. ३७३ ; अभि.को., ४/४, पृ. ५८८, बौ.भा.प्र., १९८७।

[२] नेह मात्र न पिता न बान्धवा धारयन्ति यतमान दुर्गतिम्।
यत्कृतं हि मनुजैः शुभाशुभं तत्प्रयान्तमनुयाति पृष्ठतः ।।
--रा.परि.सू.(म.सू.सं भा-१), २३६का., पृ. १४३, मि.सं.।

पापेन केवलं भवत एव नरकदुःखेन योगः स्यात्।[1] मात्रादयस्ते नैव नरकदुःखभाजो भविष्यन्ति।

ब्रात्मणादीनां कृते आचरितस्य पापस्य विपाकमनिष्यमाणा यदि विचारयेयुर्यत् कथं तेषां विपाकोऽनन्तरमेव तत्क्षणं न भवतीति चेदाह-

न च कृन्तति पापकर्म तत्क्षणमस्त्रपातवत् कमपि पापिनम् ।
मृत्योर्हि समये किन्तु तत्कर्मणः फलमभिमुखीभवत्येव ।।३१।।

इति। यद्यपि यथोक्तेन पापकर्मणा न हि छिद्यते शस्त्रपातेनेव तत्क्षणमेव कश्चित्[2], अथापि समुपस्थितायां मरणावस्थायां तत्पापकर्मणः फलं

---

[१] अनेनैवं कृतं कर्म, कोऽन्यः प्रत्यनुभविष्यति? न हि भिक्षवः कृतोपचितानि कर्माणि पृथिवीधातौ विपच्यन्ते नाब्धातौ न तेजोधातौ न वायुधातौ। उपात्तेष्वेव स्कन्धधात्वायतनेषु इति विस्तरः।
--बो.च.प., पृ. २२०, मि.सं. ; त.सं.पं., भाग-१, पृ. २०८, बौ.भा.प्र. १९८१ ;

न प्रणश्यन्ति कर्माणि कल्पकोटिशतैरपि।
सामग्रीं प्राप्यकालं न फलन्ति खलु देहिनाम्।। --अवदानशतकम्, १३/२ ;

जन्मभूमौ जनेनाप्तं यद्यत्कर्म शुभाशुभम्।
तस्य तस्य स तद्रूपं भुङ्क्ते परिणतं फलम्।। --मुक्तालता, ८५ का., ति.सं., १९८९।

[२] यदि पापकर्मणो विपाकफलमनिष्टमेव तर्हि कथं तेषां विपाकोऽनन्तरमेव तत्क्षणं न भवतीत्यत्र त्रिविधं कर्म वेदितव्यम्। तद्यथा--
.... नियतं त्रिविधं पुनः।
दृष्टधर्मादिवेद्यत्वात् ....।।
दृष्टधर्मवेदनीयम्, उपपद्यवेदनीयम्, अपरपर्यायवेदनीयं च इत्येतत् त्रिविधं कर्म नियतमिति। .... तत्र दृष्टधर्मवेदनीयम्-- यत्र जन्मनि कृतं तत्रैव विपच्यते। उपपद्यवेदनीयम्-- द्वितीये जन्मनि। अपरपर्यायवेदनीयम्-- तस्मात् परेण।
--अभि.को.भा., ४/५०, पृ. ६५७, बौ.भा.प्र. १९८७ ;

कर्मप्रभेदः पुनस्त्रिविधः। दृष्टधर्मवेदनीयं कर्म उपपद्यवेदनीयं कर्म अपरपर्यायवेदनीयं कर्म च। दृष्टधर्मवेदनीयं कर्म कतमत्। तत्कर्म दृष्टे धर्मे यस्य विपाको विपच्यते। तच्च मैत्रीसमापत्तेरुच्चलितस्य परिहाणिं वृद्धिं वा कुर्वतः दृष्टे धर्मे विपाको लभ्यते। यथा मैत्रीसमापत्तेरुच्चलितस्य तथा अरणसमापत्तेरुच्चलितस्य निरोधसमापत्तेरुच्चलितस्य स्रोतापत्तिफलादुच्चलितस्य अर्हत्त्वफलादुच्चलितस्य च। बुद्धप्रमुखे संघे कुशलमकुशलं च कुर्वतः दृष्टे धर्मे विपाको लभ्यते। अन्येषां तीव्राशयप्रयोगेण कुशलाकुशलकर्मप्रतिपन्नानामपि दृष्टे धर्मे विपाको लभ्यते।। उपपद्यवेदनीयं

साक्षादुपतिष्ठत्येवेत्युक्तम्।[1] तस्मिन् खलु समये कृतानि कुशलाकुशलकर्माणि अभिमुखानि भवन्त्येव अपराह्णे पर्वतच्छायेव। तं मृत्युं दृष्ट्वा केचन स्मितमुखवर्णेन सह मृत्युं प्राप्नुवन्ति, अन्ये तु विवर्णमुखाः तमभिमुखीभवन्ति। तानि कर्माण्यालम्ब्य

कर्म कतमत्। तत्कर्म अनन्तरे जन्मनि यस्य विपाको विपच्यते। तद्यथा पञ्चानन्तर्यकर्माणि। अपि च यान्यन्यानि कुशलाकुशलानि कर्माणि येषामनन्तरे जन्मनि विपाको विपच्यते तत्सर्वमुच्यते उपपद्यवेदनीयं कर्म।। अपरपर्यायवेदनीयं कर्म कतमत्। तत्कर्म यस्यानन्तरजन्मनोऽपरपर्यायेषु विपाको विपच्यते। तदुच्यतेऽपरपर्यायवेदनीयं कर्म।।

--अभि.समु., पृ. ५८, वि.भा.प्र., १९५०।

[1] तुलनीयम्--

पापो पि पस्सति भद्रं याव पापं न पच्चति।
यदा च पच्चति पापं अथ पापो पापानि पस्सति।। --धम्मपद, ९/४ का. ;

इदं न प्राप्तमारब्धमिदमर्द्धकृतं स्थितम्।
अकस्मान्मृत्युरायातो हा हतोऽस्मीति चिन्तयन्।।

शोकवेगसमुच्छूनसाश्रुरक्तेक्षणाननान्।
बन्धून्निराशान् संपश्यन् यमदूतमुखानि च।।

स्वपापस्मृतिसंतप्तः श्रृण्वन्नादांश्च नारकान्।
त्रासोच्चारविलिप्ताङ्गो विह्वलः किं करिष्यसि।।

इदं यदनागते कर्तव्यतया मनसिकृतं तन्न प्राप्तम्। इदमारब्धं यत्कार्यमादित एव कर्तुमिष्टम्। इदमर्धकृतं स्थितम्, यत् कियन्निष्पन्नं कियदनिष्पन्नम्। इति कार्यपर्यन्तमगतस्यैव अकस्मान्मृत्युरागतो मम। अहो बत अतिकष्टम्, हतोऽस्मीति विचिन्तयन् विह्वलः किं करिष्यसीत्यनागतेन संबन्धः। शोकः प्रियविप्रयोगकृतश्चित्तपरितापः। तस्य वेगोऽनिवार्यप्रवृत्तिः। तेन संमुच्छूनानि समुन्नतानि साश्रूणि सवाष्पाणि रक्तानि ताम्रवर्णानि लोचनानि येषु आननेषु तानि तथा। तथाभूतानि आननानि मुखानि येषां बन्धूनां ते तथा। तान् संपश्यन् विलोकयन्। तत्राकर्मकाधिकारात् परस्मैपदं दृशः। किं भूतान्? निराशान्। क्व? प्रत्युज्जीवनं प्रति त्यक्ताशान्, तत्सानाथ्यविकलान् वा। मरणसमयोपस्थितकृतान्तानुचरमुखानि च सरोषपरुषभृकुटीनि संपश्यन् विह्वलः किं करिष्यसि? स्वयंकृतपापकर्मस्मरणेन मरणसमये किमित्येवं मया कृतमिति पश्चात्तापेन तापितः। नैतावन्मात्रमेव, किं तु श्रृण्वन्नादांश्च नारकान् तीव्रकारणानुभवनदुःखनिर्मुक्तान् विक्रोशितशब्दान् नरकसमुद्भूतान् अर्थान्तरकोपाणामेव। तच्छुत्वा ममाप्येवमेवावस्था इति संत्रासेन यः पुरीषोत्सर्गो विट्प्रवृत्तिः, तेनोपलिप्तगात्रः। विह्वलः अनायत्तकायवाक्चित्तप्रचारः। किं करिष्यसि सर्वक्रियासु निवृत्तव्यापारः।

---बो.च.पं., ७/८,९,१०, पृ. ११७-११८, मि.सं.।

च्युतिचित्तानन्तरं प्रतिसन्धिचित्तमुत्पद्यते। तदा कर्म विपच्यते इत्यर्थः। विपाक एव फलम्।

एवं लौकिकधर्मान् विहाय सम्प्रति आर्यधर्मानधिकृत्याह-

सप्तधनान्युक्तानि[1] श्रद्धाशीलत्यागामलश्रुतधियः ।
अपत्रपा ह्री मुनिना मुधैवापरधनानि हि साधारणानि ।।३२।।

इति। कर्म-फल-सत्य-रत्नेषु श्रद्धधानं हि **श्रद्धा**[2]। अकुशलप्रहाणार्थं सम्यक् कुशलोपादानं **शीलम्**, तदपि अष्टविधसंवरसमादानं वेदितव्यम्, तद्यथा- भिक्षुसंवरः, भिक्षुणीसंवरः, श्रामणेरसंवरः, श्रामणेरीसंवरः, शिक्षमाणासंवरः, उपासकसंवरः, उपासिकासंवरः, उपवसथसंवरश्च। पूजानुग्रहकामनया यत् किञ्चिद् दीयते स **त्यागः**। कुशलाशयेन मोक्षानुकूलधर्मश्रवणं धारणं चेति **श्रुतम्**। अमलोक्त्या श्रवणपरिशुद्धिः परिदीपिता। आत्मानमधिकृत्य अवद्येन लज्जा **ह्रीः**[3]। परानधिकृत्य अवद्येन भयदर्शिता

---

[1] सर्वामिषं परित्यज्य आर्यवित्तेन भूषयेत्।
श्रद्धाशीलधनञ्चापि त्वत्रपाह्रीधनं तथा।।

श्रुतत्यागधनं चापि प्रज्ञा सप्तधनानि हि।
धनान्येवंविधानीति सप्ताक्षयनिधिरिरयम् ।।

--बो.मण्या.(पुनरुद्धार), ७-८ का., ति.सं.।

[2] श्रद्धा चेतसः प्रसादः। सत्यरत्नकर्मफलाभिसम्प्रत्यय इत्यपरे।

--अभि.को.भा. पृ. १८८, बौ.भा.प्र. ;

श्रद्धा कतमा। अस्तित्वगुणवत्त्वशक्तत्वेष्वभिसंप्रत्ययः प्रसादोऽभिलाषः। च्छन्दसन्निश्रयदानकर्मिका।

--अभि.समु., पृ. ६ ;

तत्र श्रद्धा कर्म-फल-सत्य-रत्नेष्वभिसम्प्रत्ययः प्रसादश्चेतसोऽभिलाषः। श्रद्धा हि त्रिधा प्रवर्तते-- सति वस्तुनि गुणवत्यगुणवति वा सम्प्रत्ययाकारा, सति गुणवति च प्रसादाकारा, सति गुणवति च प्राप्तुमुत्पादयितुं वा शक्येऽभिलाषाकारा। चेतसः प्रसाद इति-- श्रद्धा हि चित्तकालुष्यवैरोधिकीत्यतस्तत्सम्प्रयोगे क्लेशोपक्लेशमलकालुष्यविगमात् चित्तं प्रसीदतीति चेतसः प्रसाद उच्यते। सा पुनश्छन्दसंनिश्रयदानकर्मिका। --वि.मा.सि., पृ. १९०, सं.सं.वि.वि., १९७२।

[3] गुरुत्व ह्रीः ...।
गौरवं हि नाम सप्रतीशता। तत्पूर्विका च लज्जा ह्रीः। अतो न गौरवमेव ह्रीरित्यपरे।

--अभि.को.भा., २/३२, पृ. २०३ ;

अपत्राप्यम्[1] । धर्माणां विभागेन स्व-सामान्यलक्षणविभावनं धीः **प्रज्ञा**[2] वा। इमानि सप्त आर्यधनानि उक्तानि मुनिना बुद्धेन, अनास्रवसुखहेतुत्वादसाधारणत्वाच्च। लोकप्रसिद्धानि स्वर्णरजताख्यान्यन्यधनानि तु निरर्थकानि सारहीनानि तुच्छानि च क्लेशोपशमस्य अहेतुत्वात् साधारणत्वाच्च।

एवमार्यधनानां संग्रहमुक्त्वा तेषामविप्रणाशोपायप्रदर्शनार्थमाह-

द्यूतक्रीडा कौतुकदर्शनालस्यकुमित्रसङ्गमदिराश्च ।
निशाविहरणं षडिमे त्याज्या दुर्गतिदा यशोविनाशकाश्च ।।३३।।

इति। द्यूतक्रीडा हि पणैः पाशैश्च द्यूतक्रीडनाद्यनेकरूपा। **कौतुकदर्शनं** तावद् उत्सवादिषु जनसंमर्दजिगमिषा। **आलस्यं** हि कुशलकर्मण्यनुत्साहः। यस्य

ह्रीः कतमा। स्वयमवद्येन लज्जना। दुश्चरितसंयमसन्निश्रयदानकर्मिका।
--अभि.समु., पृ. ६ ;

ह्रीरात्मानं धर्मं वाधिपतिं कृत्वावद्येन लज्जा। सद्भिर्गर्हिततत्वाद् अनिष्टविपाकत्वाच्च पापमेवावद्यम्। तेनावद्येन कृतेनाकृतेन वा या चित्तस्यावलीनता लज्जा सा ह्रीः। इयं च दुश्चरितसंयमसंनिश्रयदानकर्मिका।
--वि.मा.सि., पृ. १९१।

[1] अवद्येष्वभयदर्शिता अपत्राप्यम्। --अभि.को.भा., पृ. २०२ ;

अपत्राप्यं कतमत्। परतोऽवद्येन लज्जना। तत्कर्मकमेव। --अभि.समु., पृ. ६ ;

अपत्राप्यं लोकमधिपतिं कृत्वावद्येन लज्जा। 'लोके ह्येतद् गर्हितम्, मां चैवंकर्माणं विदित्वा गर्हिष्यति'--इत्यश्लोकादिभयाद् येन लज्जते। इदमपि दुश्चरितसंयमसंनिश्रयदानकर्मकम्।
--वि.मा.सि., पृ. १९२।

[2] प्रज्ञा कतमा। उपपरीक्ष्य एव वस्तुनि धर्माणां प्रविचयः। संशयव्यावर्त्तनकर्मिका।
--अभि.समु., पृ. ६ ;

धीः प्रज्ञा। साऽप्युपरीक्ष्य एव वस्तुनि प्रविचयो योगायोगविहितोऽन्यथा वेति। प्रविचिनोतीति प्रविचयः, यः सम्यक् मिथ्या वा सङ्कीर्णस्वसामान्यलक्षणेष्विव धर्मेषु विवेकावबोधः। युक्तिर्योगः, स पुनराप्तोपदेशोऽनुमानं प्रत्यक्षं च। तेन त्रिप्रकारेण योगेन यो जनितः, स योगविहितः। स पुनः श्रुतमयश्चिन्तामयो भावनामयश्च। तत्राप्तवचनप्रामाण्याद् योऽवबोधः स श्रुतमयः, युक्तिनिध्यानजश्चिन्तामयः, समाधिजो भावनामयः।
--वि.मा.सि., पृ. १८८, सं.सं.वि.वि.प्र., १९७२।

पुरुषस्याश्रयेण न हि कुशलेऽपितु अकुशले प्रवृत्तिः स **कुमित्रम्** (पापमित्रम्)। अन्नास्रवं द्रव्यास्रवं चेति मद्यं द्विविधम्। अस्तंगते सूर्ये गृहान्तरं ग्रामान्तरं वा गमनं **निशाविहरणम्**। षडेते धर्मा एव दुर्गतयः। एतेषामाश्रयेण सम्पत्तेर्जीवनस्य कुशलधर्माणां च परिहाणिर्जायते। दुर्गतिहेतुरपि दुर्गतिरित्युच्यते, यथा- औषधिर्वै जीवनमिति। तथा सूत्रे चोक्तम्- **"गृहपतिपुत्र, एते षड् दुर्गतिद्वाराः"**। इति। तत्र हेत्वर्थः सुस्पष्टमेव ज्ञायते। **यशोविनाशकः** इत्यनेन अन्ये दोषाः परिदीप्यन्ते। यस्मादेवं तस्मात् तदधीनचर्यां परिजिहीर्षता ते परिहर्त्तव्याः।

पुनश्च, बाह्यधनानां प्रतिपक्षत्वेन अपरान् संक्लेशशमोपायान् दर्शयितुमाह-

सनरामरशासकेन सन्तोषः सर्वधनप्रधानमुक्तम् ।
सन्तोषोऽनुष्ठेयः धनं विनैव स धनिकः सति सन्तोषे ।।३४।।

इति । सुवर्णादिसर्वबाह्यधनेभ्यः सन्तोषधनं परमोत्कृष्टं विशिष्टत्वात् । केनोच्यत इति? देवमनुष्याणां शासकेन बुद्धेन भगवतेति। यस्माद् भगवतैवोक्तं तस्माद् भगवद्वचनानुयायिना त्वया सन्तोष आचरणीय इत्यभिप्रायः। के तावत्तत्र सन्तोषे गुणा इति चेद्? **सति सन्तोषे धनं विनैव स धनिकः** इत्युक्तम्। सतीति यस्मादित्यर्थः। धनं विनैवेति सुवर्णादिधनाभावेऽपीति। सन्तोषेणैव हि वस्तुतो धनिकः, धनफलत्वात् सन्तोषस्य। धनाभावेऽपि यदि सन्तोषस्तदा दारिद्र्येऽपि धनवान् एव स वेदितव्यः। कस्तावत् सन्तोषः? अतीतं प्रतीत्य नैव दुःखम्, अनागते नाभिकाङ्क्षा, प्रत्युत्पन्ने नैव अध्यासक्तिः, एवंविधो धर्मः सन्तोष इत्युच्यते।[१]

---

[१] दशाशुभान् परित्यज्य श्रद्धां च दृढयेत् सदा।
अल्पैषी चाथ सन्तृप्तः कृतवेदी कृतेष च ।।
--बो.मण्या.(पुनरुद्धार), ५ का. ति.सं., १९९९ ;

आरोग्य परमा लाभा सन्तुट्ठिपरमं धनं।
विस्सासपरमा ञाति निर्वाणं परमं सुखम्।। --धम्मपद, १५/८

इत्येवं सन्तोषगुणानभिधाय असन्तुष्टिदोषदर्शनार्थमाह-

यथा समृद्धाः पुरुषा दुःखिनो भवन्ति नैव तथाऽल्पेच्छुकाः ।
यावत्यः सन्ति फणा आर्य, दुःखकराः नागस्य तावत्यः ।।३५।।

इति। **आर्य** इति सम्बोधनम्। भाण्डोपभोगोपकरणानि बहूनि यथा रक्ष्यन्ते, गोप्यन्ते च, तेषां पुनर्विनाशे दुःखमनुभूयते, न तथा येषां सविधे अल्पकानि भोगोपकरणानि ते दुःखमनुभवन्ति।[१] तत् कथं ज्ञायते? **यावत्यः सन्ति फणा नागस्य** इत्याद्युक्तम्। यथा नागराजस्य सप्त शिरांसि, तेभ्यः समुद्भूतानि दुःखान्यपि तावन्ति विद्यन्त एव। यस्मिन् पुनस्त्रीणि तस्य ततोऽल्पकानि भवन्ति। यस्य तु एकमेव तस्मिन् अल्पतरमेव, तथैव उपकरणादिविशेषेण दुःखविशेषो ज्ञातव्यः।

गृहस्थानां स्त्रीपरिग्रहणं नैव विरुद्धम्, अतस्तासां गुणदोषपरीक्षया असंक्लिष्टोपायं प्रदर्शयितुमाह--

पत्नी त्याज्या त्रिविधा प्रकृत्या रिपुसम्बद्धा स्वघातिकेव ।
पत्युरपमानकर्त्री स्वैरा लघुवस्तुचौर्यरता स्तेयीव ।।३६।।

इति। **प्रकृत्या रिपुसम्बद्धे**ति स्वभावेन रिपुणा सह प्रतिबद्धा युक्तेत्यर्थः। तादृशी भार्या वधिकसदृशा, अतः सा परित्याज्यैव। यः खलु तस्याः पतिं हन्तुकामः,

---

[१] अर्जनरक्षणनाशविषादैरर्थमनर्थमनन्तमवेहि।
व्यग्रतया धनसक्तमतीनां नावसरो भवदुःखविमुक्तेः।।
अर्जनमनुत्पन्नस्योत्पादनं दुःखम्। उपार्जितस्यापि जलानलादिभ्यः पञ्चप्रत्यवायेभ्यः परिपालनं कष्टतरम्। तथा रक्षितस्यापि कथंचित् तस्करादिभिर्नाशाद् विषादो दौर्मनस्यं परितापहेतुरनर्थः। तदेवमनर्थपरंपरानिदानत्वात् कारणे कार्योपचारादर्थ एवानर्थ उक्तः। इत्येवमर्जनादिभिः सर्वदा व्याकुलत्वात् धनासक्तचेतसां क्षणमपि समाधानानवकाशत्वात् नावसरः संसाराश्रितजात्यादिदुःखनिर्मोक्षाय सदा तद्गतमनसिकारैरेव आयुःराणां क्षपणात्।
--बो.च.पं., ८/७९, पृ. १५३, मि.सं.।

स प्रकृत्या रिपुः। या स्वपतिम् अवमानयति सा स्वैरिणीव भार्या नूनं परिहर्तव्यैव। या काचित् स्त्री प्रायः क्षुद्र- क्षुद्रकाणि वस्तूनि चोरयति सा स्तेनसदृशा परिहर्तव्यैव ।[1]

कीदृशी पुनः स्त्री परिगृहीतव्येति चेद्? आह--

भगिनीसमानुकूला मित्रवद्हृदयङ्गमा च सेवनीया।
मातेवोपकारिणी पूज्या सेविकेवाज्ञाकृद् देवीव ।।३७।।

इति। यथा भगिनी भ्रातुः अनुकूलमाचरति, तद्वचनं नातिक्रमति तथैव या स्त्री पतिमनुसरति सा नूनं सत्करणीयेति योजनीयम्। यथा प्रेयस्यै स्वकीयः प्रियः हृदयङ्गमो भवति, तं विशेषेण सत्कृत्य हृदयतोषमनुभवति, तथा या पत्नी पत्युः हृदयाभिरामा साऽपि निश्चयेन सत्करणीयैव। यथा तावन्माता पुत्रस्य कायं चित्तं च निर्व्यथं कामयते तस्य हितं सुखं चाभिलषते, तथैव या पत्नी पत्युः हितकामा साऽपि सत्करणीयैव। यथा दासी स्वमिनो वशे तिष्ठति, तदिच्छानुरूपं च कार्यं करोति, तथैव या पत्नी दासीव स्वपत्युः वशे तिष्ठति, साऽपि ध्रुवं सत्करणीयैव। एताश्चतस्रः स्त्रियः कुलदेवीत्युच्यन्ते, वंशानुपच्छेदहेतुत्वात्।

एतदनन्तरम् एकाग्रतासम्प्रयुक्तो ध्यानयोगः प्रदर्श्यते। धर्मद्वयं तावद् ध्यानानुरूपम्, यथा- भोजने परिमाणज्ञता जागरणे चोत्साहप्रियता। तत्र भोजनपरिमाणमधिकृत्याह--

विहाय रागद्वेषौ भोजनमौषधिवदवगत्य सेवेत ।
कायस्थित्यै नितरां न च सौन्दर्यगर्वमानार्थं सेव्यम् ।।३८।।

---

[1] तुलनीयम्--
बोधिसत्त्वेन स्वभार्याया अन्तिके तिस्रः संज्ञा उत्पादयितव्याः। कतमास्तिस्रः? रतिक्रीडासहायिकैषा नैषा परलोकसहायिका। अन्नपानसहायिकैषा नैषा कर्मविपाकानुभवसहायिका। सुखसहायिकैषा नैषा दुःखसहायिका। यावदपरास्तिस्रः-- शीलान्तरायसंज्ञा ध्यानान्तरायसंज्ञा प्रज्ञान्तरायसंज्ञा। अपरास्तिस्रः-- चोरसंज्ञा वधकसंज्ञा नरकपालसंज्ञा इति।

--शि.समु., पृ. ४७, मि.सं.।

इति। कायस्तावद् व्रणमिव, तत्र यथौषधं नात्यल्पं नात्यधिकं हितकरं भवति, तथैव भोजनमपि नात्यल्पं नात्यधिकं मात्रया सेवनीयम्।[1] एवं सति कायस्यापि पोषणं भवति, न च कायः सन्तप्यते। अयमेवार्थः **औषधिवदवगत्य** इत्यादिना कथितः। **विहाय रागद्वेषौ सेवेत** इत्यनेन मात्रया यद् भुक्तं तदपि रागद्वेषनैरपेक्ष्येण भोक्तव्यम्। तत् कथं सेवनीयम्? **न च सौन्दर्यगर्वमानार्थम्** इत्याद्युक्तम्। दर्पशीलः कश्चित् मानं गर्वं सौन्दर्यं चाधिकृत्य भोजनं करोति तद् रागप्रभावितमिति। यस्तावद् मानार्थं भुङ्क्ते तद् परापकारफलत्वाद् द्वेषप्रभावितमिति। तत्र दर्पस्तावद् रागहेतुः कायचित्तविकार

---

[1] विनिपातगतानाथव्रतस्थान् संविभज्य च।
भुञ्जीत मध्यमां मात्रां त्रिचीवरबहिस्त्यजेत्।।

भैषज्यवसनादिभिरात्मभावो हि परिपालनीयः परार्थोपयोगित्वात्। यथोक्तं प्राक्-- तत्र द्विविधं भैषज्यं सततभैषज्यं ग्लानप्रत्ययभैषज्यं च। तत्र सततभैषज्यमोदनादि। तदर्थं पिण्डाय गोचरे चरता ग्रामप्रवेशे यथोक्तशिक्षायां स्मृतिमाधाय चरितव्यम्। ततो लब्धात् पिण्डपातात् चतुर्थभागविभक्तात् विनिपातगताननाथव्रतस्थान् संविभागिनः कुर्यात्। एकं प्रत्यङ्गं विनिपातिनाम्। द्वितीयमनाथानाम्। तृतीयं सब्रह्मचारिणां दत्वा चतुर्थमात्मना परिभुञ्जीत। स परिभुञ्जानो न रक्तः परिभुङ्क्ते असक्तः, अगृद्धः, अनध्यवसितः, अन्यत्र यावदेवास्य कायस्य स्थितये यापनायै। मध्यमां मात्राम्। तथा च परिभुङ्क्ते यथा नातिसंलिखितो भवति, नातिगुरुकायः। तत्कस्य हेतोः? अतिसंलिखितो हि कुशलपक्षपराङ्मुखो भवति, अतिगुरुकायो मिद्धावष्टब्धो भवति। तेन तं पिण्डपातं परिभुज्य कुशलपक्षाभिमुखेन भवितव्यम्। इति आर्यरत्नमेघेऽभिहितम्।

--बो.च.पं., ५/८५, पृ. ७०, मि.सं. ;

यथोक्तं चन्द्रप्रदीपसूत्रे--
ते भोजनं स्वादुरसं प्रणीतं लब्ध्वा च भुञ्जन्ति अयुक्तयोगाः ।
तेषां स आहारु वधाय भोति यथ हस्तिपोतान बिसा अधौतकाः।। समाधि.सू., ९/२९ ;

तुलनीयम्-- तथा बोधिसत्त्वप्रातिमोक्षेऽप्यप्रसादपरिहार उक्तः-- न पुरतो दन्तकाष्ठं खादितव्यं न पुरतः खेलो निक्षिप्तव्य इति। एष च गौरवलज्जाविधिः सर्वद्रष्टव्यो न ब्रह्मचारिष्वेव। अत्र तु सूत्रे ब्रह्मचार्यधिकारः तेषु गुरुतरापत्तिभयसंदर्शनार्थम्। यथा अत्रैवाह-- नोच्चैर्भाषिणा भवितव्यमिति। न चायं विधिः प्रादेशिकः। तथा ब्रह्मपरिपृच्छायामप्युक्तम्-- न च वधकसदृशेन बोधिसत्त्वेन भवितव्यमिति। तथा प्रातिमोक्षादपि लोकाप्रसादकरमन्वेष्य वर्जनीयम्। तत्र तावत्--
मुखपूरं न भुञ्जीत सशब्दं प्रसृताननः ।
प्रलम्बपादं नासीत न बाहुं मर्दयेत्समम्।। --शि.समु., पृ. ७०, मि.सं.।

एव। गर्वस्तु अङ्ग-प्रत्यङ्गविकासः, सौन्दर्यं हि रसजातीयं बलम्। एतेषामभावत्वेन कायस्थितिमात्रार्थम् अर्थात् जीवितेन्द्रियपरिहरणार्थं भोजनं कुर्यादित्यर्थः।

जागरणे चोत्साहप्रियतामधिकृत्य धीमन्नित्याद्याह--

दिनमखिलं शुभकार्ये यापयेद् रात्रेराद्यन्तौ यामौ च ।
धीमन्, मध्ये यामे शयीत यतो हि न भवेद् विफला निद्रा ।।३९।।

इति। तत्र **धीमन्** इति कुशले कर्मणि चोत्साहवानित्युच्यते। कुशलसम्प्रयुक्तेन चेतसा समस्तं दिनम् अतिक्रमणीयं व्यत्येतव्यमित्यर्थः। यथोक्तं भगवता-- **"दिवसे चङ्क्रमण-निषण्णाभ्यां आवरणधर्मेभ्यश्चित्तस्य शोधनं करोति, परिशोध्य"** इति। **रात्रेराद्यन्तौ यामौ** इत्यनेन धीमन्, त्वया न केवलं दिवस एव व्यत्येतव्यः, तदा किमिति चेत्? धीमन्, त्वया रात्रेरपि प्रथमान्तौ यामावपि (शुभकार्ये) यापनीयौ। यथोक्तं भगवता-- **"रात्रेः प्रथमे प्रहरे चङ्क्रमण-निषण्णाभ्यां चित्तपरिशोधनं करोति, परिशोध्य मध्यमे प्रहरे विहाराद् बहिः पादौ प्रक्षाल्य विहारे च प्रविश्य कायस्य दक्षिणपार्श्वेन पादस्योपरि पादं संस्थाप्य स्मृतिमभिमुखीं कृत्वा सम्प्रजानन् सिंहशयनवद् शयीत। पश्चिमे प्रहरे लघुसमुत्थाय चङ्क्रमण-निषण्णाभ्याम् आवरणधर्मेभ्यश्चित्तपरिशोधनं करोति"** इति।[१] **मध्ये यामे शयीत** इति प्रथमान्तयोरन्तराले मध्यमे प्रहरे निद्रां कुर्यात्, तत्रापि स्वच्छन्दतया (निर्विशङ्केन) न शयितव्यम्, अपितु शीघ्रमुत्थाय कुशलं कर्म करिष्य इति स्मृतिमान्

---

[१] तुलनीयम्--
नाथनिर्वाणशय्यावच्छयीतेप्सितया दिशा।
संप्रजानंल्लघूत्थानः प्रागवश्यं नियोगतः ।।
भगवतो महानिर्वाणशय्यामिव शय्यां परिकल्पयेत्। अभिमतया दिशा शिरो विधाय, दक्षिणेन पार्श्वेन, पादस्योपरि पादमाधाय, दक्षिणं बाहुमुपधानं कृत्वा, वामं च प्रसार्य जङ्घोपरि निवेश्य, चीवरैः सुसंवृतकायः, स्मृतः, संप्रजानानः, उत्थानसंज्ञी, आलोकसंज्ञी, शयितः, नाचित्तकमिद्धावष्टब्धः। न च निद्रासुखमास्वादयेत्, न च पार्श्वसुखम् अन्यत्र यावदेवैषां महाभूतानां स्थितये यापनायै इति। लघूत्थानः शीघ्रमेवोत्तिष्ठेत्। न तु जृम्भिकां गात्रमोटनं कुर्वन्नालस्योपहितश्चिरेण।
--बो.च.पं., ५/९६, पृ. ७४-७५, मि.सं.।

सन् (निद्रां सेवेत)। तादृशीं स्मृतिमुपस्थाय शयीतेत्यर्थः। कस्मादिति चेत्? **यतो हि निद्रा न भवेद् विफला** इत्युक्तम्।

एवं कायं कुशले कर्मणि प्रयोज्य पुनः जागरित्वा कुशलं करिष्य इत्येवंविधेन शयनेन कुशलचित्तपूर्वङ्गमेन निद्रावस्थायामपि निरन्तरं कुशलमेवोत्पद्यते, अतः सा शयनावस्थाऽपि निष्फला न स्यादित्युक्तम्।

एवं कायं चित्तं च कर्मण्यं कृत्वा ध्यानयोगोऽनुष्ठेय इत्यादर्शयितुमाह--

मैत्रीकरुणोपेक्षामुदिताश्च[1] सदा सम्यग् भावयितव्याः ।

---

[1] तत्र व्यापादबहुलानां तत्प्रहाणाय मैत्री प्रतिपक्षः। विहिंसाबहुलानां तत्प्रहाणाय करुणा। अरतिबहुलानां तत्प्रहाणाय मुदिता। कामरागव्यापादबहुलानां तत्प्रहाणायोपेक्षेति। ...... 'सुखिता वत सन्तु सत्त्वाः' इति मनसिकुर्वन् मैत्री समापद्यते। 'दुःखिता वत सत्त्वाः' इति मनसिकुर्वन् करुणाम्। 'मोदन्तां वत सत्त्वाः' इति मनसिकुर्वन् मुदिताम्। 'सत्त्वाः' इत्येव तु मनसिकुर्वन्नुपेक्षां सम्पद्यते।

--अ.वि.सू.नि., पृ. १९६, के.पी.जा.सं., १९७१ ;

एतासु हि मेत्ताकरुणामुदिताउपेक्खासु अत्थतो ताव, मेज्जती ति मेत्ता। सिनिय्हती ति अत्थो। मित्ते वा भवा, मित्तस्स वा एसा पवत्ती ति पि मेत्ता। परदुक्खे सति साधूनं हदयकम्पनं करोती ति करुणा। किणाति वा परदुक्खं, हिंसति विनासेती ति करुणा। दुक्खितेसु फरणवसेन पसारियती ति करुणा। मोदन्ति ताय तंसमङ्गिनो, सयं वा मोदति, मोदनमत्तमेव वा तं ति मुदिता। 'अवेरा होन्तू' ति आदिव्यापारपहानेन मज्झत्तभावूपगमनेन च उपेक्खती ति उपेक्खा।

--वि.मग्ग, ९/९२ ;

अप्रमाणानि कतमानि। चत्वारि अप्रमाणानि। मैत्री कतमा। ध्यानं निश्रित्य सत्त्वाः सुखेन संप्रयुज्येरन्निति विहारसमृद्धौ समाधिः प्रज्ञा तत्संप्रयुक्ताश्च चित्तचैतसिका धर्माः। करुणा कतमा। ध्यानं निश्रित्य सत्त्वा दुःखेन वियुज्येरन्निति विहारसमृद्धौ समाधिः प्रज्ञा शेषं पूर्ववत्। मुदिता कतमा। ध्यानं निश्रित्य सत्त्वाः सुखेन न वियुज्येरन्निति विहारसमृद्धौ समाधिः प्रज्ञा शेषं पूर्ववत्। उपेक्षा कतमा। ध्यानं निश्रित्य सत्त्वा हितं लभेरन्निति विहारसमृद्धौ समाधिः प्रज्ञा शेषं पूर्ववत्।

--अभि.समु., पृ. ९४, वि.भा.प्र., १९५० ;

अप्रमाणानि चत्वारि, व्यापादादिविपक्षतः ।
मैत्र्यद्वेषोऽपि करुणा मुदिता सुमनस्कता ।।

उपेक्षाऽलोभः आकारः सुखिता दुःखिता वत।
मोदन्तामिति सत्त्वाश्च, ... ।।
मैत्री, करुणा, मुदिता, उपेक्षा च; अप्रमाणसत्त्वालम्बनत्वात्। किमर्थं चत्वार्येव?

अलब्धेऽनुत्तरपदे ध्रुवमेव ब्रह्मलोके सुखावाप्तिः ।।४०।।

इति। मैत्र्यादीनां ध्याने योगः, तासां भावनया प्रथमध्यानादीनामुत्पादः। तत्र वात्सल्यभावना **मैत्री**, स्नेहं करोतीत्यर्थः। करुणायति दुःखवियोगमभिलषत इति **करुणा**। मोदत इति **मुदिता**, हृष्यतीत्यर्थः। सम्यग्दर्शन**मुपेक्षा** पक्षेऽपतित्वा पश्यतीत्यर्थः। का तावन्मैत्री? मैत्री सत्त्वानां सुखार्थं कामयते। करुणा (सत्त्वानां) दुःखवैकल्यकामना। सुखितसत्त्वानां मा भवेत् सुखवियोग इति कामना मुदिता। माध्यस्थ्यावस्थितिरुपेक्षा। मैत्र्यादीनां चतसृणां सदैव भावना कर्तव्या ।

पतित्वा
१

तत्र मैत्रीभावनाभिलाषुकः शीलं परिशोध्य विविक्तदेशं सेवमानः बुद्धादिगुणानामनुस्मृत्या भद्रचित्तमुत्पादयति। सत्करणीयं गुरुस्थानीयं गुणवन्तं पुद्गलं प्रति श्रद्धामुत्पाद्य **'सुखी भवेदयं महापुरुषः'** इति मनसिकारं तं प्रति मृदुचित्तोत्पादपर्यन्तं प्रवर्तयति । ततः प्रियपुद्गलं प्रति चित्तं प्रहिणोति। तत्रापि पूर्वोक्तपुद्गलेन समं चित्तं नोत्पद्यते तावत्तत्र चित्तं प्रवर्तयति। ततोऽधमपुरुषमालम्बयति। यावदुपर्युक्तपुद्गलद्वयेन समं चित्तं नोत्पद्यते तावत् चित्तं प्रवर्तयति। तदनन्तरम् अप्रियपुद्गलं (शत्रुं) प्रति चित्तं प्रेषयति। तत्रापि तावच्चित्तमर्पयति यावत् प्रत्येकं शत्रुं प्रति **'अयं सुखी भवेद्'** इति चित्तं नोत्पद्यते। यदा तत्रापि पूर्वोक्तपुद्गलसमं चित्तमुत्पद्यते तदा भावना निष्पद्यते। इयता मात्रेण मैत्रीचित्तेन विमुक्तः विविधा सीमिता च भावना निर्दिष्टा ।

व्यापादविहिंसाऽरतिकामरागव्यापादबहुलानां तत्प्रहाणाय चत्वारि यथासंख्यम्। अशुभोपेक्षयोः कामरागप्रतिपक्षत्वे को विशेषः? वर्णरागस्याशुभा मैथुनरागस्योपेक्षेति वैभाषिकाः। एवं तु युज्यते-- मैथुनरागस्याशुभा, मातापितृपुत्रज्ञातिरागस्योपेक्षेति। ... तत्र अद्वेषस्वभावा मैत्री। .... करुणाप्येवम्। ... सौमनस्यस्वभावा मुदिता। .... अलोभात्मिकोपेक्षा। कथं व्यापादप्रतिपक्षः? तस्य लोभाकृष्टत्वात्। उभयस्वभावा त्वसौ युज्यते। एषां तु मैत्र्यादीनाम्। .... 'सुखिता बत सत्त्वाः' इति मनसिकुर्वन् मैत्रीं समापद्यते। 'दुःखिता बत सत्त्वाः' इति करुणाम्, 'मोदन्तां बत सत्त्वाः' इति मुदिताम्, 'सत्त्वाः' इत्येव मनसि कुर्वन्नुपेक्षां समापद्यते, माध्यस्थ्यात्।

--अभि.को.भा., ८/२९-३०, पृ. ११७०-११७१, बौ.भा.प्र. ९१८७।

अतः परं दिग्व्याप्यधिकारेण मनसिकारो वेदितव्यः। यथोक्तं भगवता-- **"न केवलं मैत्रीयुक्तेनैवापितु अद्वयेन एकां दिशं समधिमुच्य स्फुरित्वा उपसम्पद्य विहरति, (स्फुरित्वेति व्याप्नोतीत्यर्थः)।"**

करुणेति दुःखिनम् अनाथम् अशरणं पुद्गलमालम्ब्य पूर्वोक्तेनैव क्रमेण प्रवर्तनम्। मुदिता तावन्मुदितसत्त्वमालम्ब्य एतेनैव क्रमेण प्रवर्तनम्। उपेक्षा तु पूर्वमधमपुरुषमालम्ब्य ततः परं क्रमेण सर्वसत्त्वेषु प्रवर्तनम्। एवं सर्वदैव मैत्रीकरुणामुदितोपेक्षा भावनीयाः । मैत्र्यादीनामासां भावनायाः किं फलमिति चेद्? **अनुत्तरपदे** इत्याद्युक्तम्। तथोक्तया मैत्र्यादीनां भावनया निर्वाणमधिगम्यते । अथ कदाचिन्निर्वाणं नाधिगम्येत, तथापि निश्चयेन ब्रह्मलोकसुखमवाप्यते। रूपधातौ कामक्रोधादिसन्तापरहितं शान्तं निर्मलं च ध्यानमनुभूयत इत्युक्तम्।

मैत्र्यादीनां परिनिष्पादनेन चत्वारि ध्यानान्यधिगम्यन्त इति दर्शयितुमाह--

कामान् प्रीतिविचारौ सुखञ्च दुःखञ्च विहाय चतुर्भिरेव ।
ध्यानैर्ब्रह्माभास्वरशुभकृत्स्नबृहत्फलभागिनश्च भवन्ति ।।४१।।

इति। **विहाय** इति शब्देन परिवर्जनमित्युक्तम्, कामपरिवर्जनं विचार-परिवर्जनं प्रीतिपरिवर्जनं सुखदुःखपरिवर्जनं चेति प्रत्येकेन सह योज्यम्। तानि क्रमशः चत्वारि ध्यानानि।[1] तेषां चतुर्णां ध्यानानां किं फलमिति चेद्? विपाकफलं प्रदर्शयितुमुच्यते

---

[1] तत्र भिक्षवः कतमानि चत्वारि ध्यानानि?
१. इह भिक्षवो भिक्षुः विविक्तं कामैः विविक्तं पापकैरकुशलैर्धर्मैः सवितर्कं सविचारं विवेकजं प्रीतिसुखं प्रथमं ध्यानमुपसंपद्य विहरति। २. स वितर्कविचाराणां व्युपशमादध्यात्मसंप्रसादाच्चेतस एकोतीभावादवितर्कविचारं समाधिजं प्रीतिसुखं द्वितीयं ध्यानमुपसंपद्य विहरति। ३. स प्रीतिर्विरागादुपेक्षको विहरति, स्मृतः संप्रजानन् सुखं च कायेन प्रतिसंवेदयति, यत्तदार्या आचक्षते "उपेक्षकः स्मृतिमान् सुखविहारी" ति तृतीयं ध्यानमुपसंपद्य विहरति। ४. स सुखस्य च प्रहाणात् दुःखस्य च प्रहाणात् पूर्वमेव च सौमनस्यदौर्मनस्ययोरस्तङ्गमाददुःखासुखमुपेक्षास्मृतिपरिशुद्धं चतुर्थं ध्यानमुपसंपद्य विहरति। इमानि भिक्षवश्चत्वारि ध्यानानि।
---अ.वि.सू., पृ. १७, को.पी.जा.प्र. १९७१ ;

विचारप्रीतिसुखवत्, ...

ब्रह्माभास्वरेत्यादि।[1] प्रथमध्यानभावनया ब्रह्मकायिकदेवानां सभागतायामुत्पद्यते। द्वितीयेन आभास्वराणां तृतीयेन शुभकृत्स्नानां चतुर्थेन बृहत्फलदेवानां सभागतायामुत्पद्यते। तत्र प्रथमध्यानादिना कामादिपरिवर्जनं तु यथासूत्रं वेदितव्यम्।

विचारप्रीतिसुखसंयुक्तं कुशलमैकाग्र्यं तत् प्रथमं ध्यानम्। विचारवचनाद् वितर्कोऽप्युक्तो भवति, साहचर्याद् धूमाग्निवत्। न हि विचारो विना वितर्केणास्ति। शेषं पुनर्ध्यानत्रयम्।

.... पूर्वपूर्वाङ्गवर्जितम्।

'शुभैकाग्र्यम्' वर्तते। विचारविवर्जितं प्रीतिसुखवत् द्वितीयम्, विचारप्रीतिवर्जितं तृतीयम्, विचारप्रीतिसुखवर्जितं चतुर्थमिति।

---अभि.को.भा., ८/२, पृ. ११२९, बौ.भा.प्र. ;

पुनश्च द्रष्टव्यम्--

पञ्चाद्ये तर्कचारौ च प्रीतिसौख्यसमाधयः ।
प्रीत्यादयः प्रसादश्च द्वितीयेऽङ्गचतुष्टयम्।।

तृतीये पञ्च तूपेक्षा स्मृतिः प्रज्ञा सुखं स्थितिः।
चत्वार्यन्तेऽसुखादुःखोपेक्षास्मृतिसमाधयः ।।

प्रथमे भागे पञ्चाङ्गानि। वितर्कः, विचारः, प्रीतिः, सुखम्, चित्तैकाग्रता च -- इत्येतानि पञ्चाङ्गानि। समाधिः किलाङ्गं ध्यानं च। शेषाण्यङ्गानीति। यथा तु चतुरङ्गसेना, एवं पञ्चाङ्गध्यानम्।

द्वितीये ध्यानं चत्वार्यङ्गानि-- अध्यात्मसम्प्रसादः, प्रीतिः, सुखम्, चित्तैकाग्रता च।

तृतीये तु ध्याने पञ्चाङ्गानि-- उपेक्षा, स्मृतिः, सम्प्रज्ञानम्, सुखम्, चित्तैकाग्रता च।

चतुर्थध्यानमन्त्यम्। तत्र चत्वार्यङ्गानि-- अदुःखासुखा वेदना, उपेक्षापरिशुद्धिः, स्मृतिपरिशुद्धिः, समाधिश्च।

---अभि.को.भा., ८/७-८, पृ. ११४०-११४१, बौ.भा.प्र. १९८७ ;

प्रथमं ध्यानं पञ्चाङ्गम्। पञ्चाङ्गानि वितर्को विचारः प्रीतिः सुखं चित्तैकाग्रता च। द्वितीयं ध्यानं चतुरङ्गम्। चत्वार्यङ्गानि अध्यात्मसंप्रसादः प्रीतिः सुखं चित्तैकाग्रता च। तृतीयं ध्यानं पञ्चाङ्गम्। पञ्चाङ्गानि उपेक्षा स्मृतिः संप्रजन्यं सुखं चित्तैकाग्रता च। चतुर्थं ध्यानं चतुरङ्गम्। चत्वार्यङ्गानि उपेक्षापरिशुद्धिः स्मृतिपरिशुद्धिः अदुःखासुखा वेदना चित्तैकाग्रता च।

--अभि.समु., पृ. ६८, वि.भा.प्र. १९५०।

[1] .... महाब्रह्मफलं च तत्।

तां हि ध्यानान्तरिकां भावयित्वा महाब्रह्मा भवति। पुनः सर्वसमाधीन् सङ्कलय्य त्रयः समाधयः उक्ताः सूत्रे-- १. सवितर्कः सविचारः समाधिः, २. अवितर्को विचारमात्रः, ३. अवितर्कोऽविचार इति।

--अभि.को.भा. ८/२३, पृ. ११६३, बौ.भा.प्र. ।

विचारपरिवर्जनं तु निर्विकल्पत्वमित्युच्यते। यत्र नास्ति विचारस्तत्र नियमेन विकल्पाभावः। सुखदुःखपरिवर्जनेन तावन्नैव सुखा नैव दुःखा वेदना निदर्श्यते।

सम्प्रति कामादिषु कुशलाकुशलयोः गुरुत्वलघुत्वविशेषं दर्शयितुमाह--

कुशलाकुशलं च कर्म सदाभिनिवेशाप्रतिपक्षवस्तुगुणैः ।
पञ्चभिश्चोत्पद्यते तस्माद् यतनीयं कुशलचर्यायाम् ।।४२।।

इति। तत्र कर्मगुरुत्वं तावच्चतुर्भिः हेतुविशेषैरुक्तम्, यथा-- प्रयोगविशेषः, आशयविशेषः प्रतिपक्षविशेषः वस्तुविशेषश्च। तत्र प्रयोगविशेषस्तु लघुकर्मार्थमपि निरवधिकालव्यापृतत्वम्। अल्पकालनिष्पाद्येऽपि कर्मणि गाढक्लेशेन अत्यन्तासक्त्या च युक्तेन आशयविशेषेण कर्मगुरुत्वं भवति। कृतमपि कर्म प्रतिपक्षबलेन योगे सति दुर्बलं पराभूतं च जायते, तदेव कर्म प्रतिपक्षबलरहितं सत् सबलं भवति। द्विविधः खलु वस्तुविशेषः -- गुणवांश्च सानुशंसश्च। तत्र गुणवान् वस्तुविशेषस्तावत् त्रीणि रत्नानि, निरोधादुत्थितः पुद्गलविशेषश्च। सानुशंसो वस्तुविशेषस्तु माता-पितरौ अन्ये चोपकारिणः सत्त्वाः, यथा-- ऋक्षहरिणवानरादयः। एवमेभिः पञ्चभिः कुशलाकुशलानि कर्माणि नियतफलत्वाद् बहुफलत्वाच्च महद्गतानि चोच्यन्ते। अत एव त्वया सर्वाण्यकुशलानि परित्यज्य कुशलाचरणेषु यत्न आस्थेयः।

यथाल्पक्षारनीरं परिवर्तयत्यल्पजलरसं न गाङ्गम् ।
पापं तथैव चाल्पं नाशयत्यल्पकुशलं न पूर्णकुशलम् ।।४३।।

इति। लघुकर्मणस्तु बलवता कर्मणा पराभवो भवतीत्यादर्शितम्। संक्षेपार्थस्तु तस्मात्त्वया अल्पकुशलं वा अकुशलाधिक्यं वा कृत्वा नैव निर्भयेन भाव्यम्। एवमेव कुशलाधिक्यम् अल्पम् अकुशलं च कृत्वाऽपि त्वयि मा भवेद् अत्यधिकः सन्त्रासः। सुगमोऽवयवार्थः।

औद्धत्यं कौकृत्यं व्यापादः स्त्यानमिद्धे च कामेच्छा ।
विचिकित्सेति पञ्चैव कुशलधनहारकाणीमानि ज्ञेयानि ।।४४।।

इत्यनेनेदानीं ध्यानविमोक्षविरुद्धा धर्माः प्रदर्श्यन्ते। ते सायासं प्रहातव्याः । **औद्धत्य-कौकृत्ये**[१] तावत् प्रथम् नीवरणम्, **व्यापादो** हि द्वितीयम्, **स्त्यानमिद्धे**[२] तु तृतीयम्, **कामाध्यवसानं** खलु चतुर्थम्, **विचिकित्सा**[३] च पञ्चमम्। एतानि हि पञ्च नीवरणानि, ध्यान-विमोक्षमार्गावरोधकत्वात्। तत्र औद्धत्यं चित्तस्य अप्रशमः, संसारं प्रति चित्ताविरागः। कौकृत्यं कुकृतमालम्ब्य चित्तविलेखः। कुकृतं प्रति चित्तपरिखेद इत्यर्थः। व्यापादो हि द्वेषः नव वस्तून्यालम्ब्य चित्ताघातः । एतानि नव वस्तूनि चित्तविघातस्य, यथा-- 'अनेन ममापकारः कृतः क्रियते करिष्यत इति प्रथमं त्रिकम्; ये मम प्रियाः हितकामाः, तेषामनेनापकारः कृतः, क्रियते करिष्यत इति द्वितीयं त्रिकम्; ये मम अप्रिया अहितकामाः अनुपकारकास्तेषामनेन उपकारः कृतः क्रियते करिष्यत इति

---

[१] औद्धत्यं कतमत्। शुभनिमित्तमनुसरतो रागांशिकश्चेतसोऽव्युपशमः। शमथपरिपन्थकर्मकम्। कौकृत्यं कतमत्। यदभिप्रेतानभिप्रेतं कारणाकारणमागम्य मोहांशिकश्चेतसो विप्रतिसारः। कुशलमकुशलमव्याकृतं काले अकाले युक्तमयुक्तञ्च। चित्तस्थितिपरिपन्थकर्मकः।

--अभि.समु., पृ. ९-१०, वि.भा.प्र. ;

औद्धत्यं चित्तस्याव्युपशमः। व्युपशमो हि शमथः, तद्विरुद्धोऽव्युपशमः। स पुनरेष रागानुकूलपूर्वहसितरसितक्रीडिताद्यनुस्मरतश्चेतसोऽव्युपशमहेतुः, शमथपरिपन्थकर्मकः। कौकृत्यं चेतसो विप्रतिसारः। कुत्सितं कृतमिति कुकृतम्, तद्भावः कौकृत्यम्। इह तु कुकृतविषयश्चेतसो विलेखः कौकृत्यम्, चैतसिकाधिकारात्। एतच्च चित्तस्थितिपरिपन्थकर्मकम्।

--वि.मा.सि., पृ. २२७, २३३, सं.सं.वि.वि.प्र.।

[२] स्त्यानं चित्तस्याकर्मण्यता स्तैमित्यम् स्तिमितस्य भावः स्तैमित्यम्, यद्योगात् चित्तं जडीभवति, स्तिमितं भवति, नालम्बनं प्रतिपत्तुं समुत्सहते। एतच्च सर्वक्लेशोपक्लेशसाहाय्यदानकर्मकम्। मोहांशे प्रज्ञप्तत्वाच्च मोहांशिकमेव, न पृथग् विद्यते। मिद्धम् अस्वतन्त्रवृत्तिचेतसोऽभिसंक्षेपः। वृत्तिरालम्बने प्रवृत्तिः। साऽस्वतन्त्रा चेतसो यतो भवति, तन्मिद्धम्। कायचित्तसन्धारणासमर्था वा वृत्तिश्चेतसोऽस्वतन्त्रा सा यतो भवति, तन्मिद्धम्। अभिसंक्षेपश्चेतसश्चक्षुरादीन्द्रियद्वारेणाप्रवृत्तिः। एतच्च मोहांशे प्रज्ञपनात् मोहांशिकम्, कृत्यातिपत्तिसंनिश्रयदानकर्मकं च।

--वि.मा.सि., पृ. २२६, २३४, सं.सं.वि.वि.प्र.।

[३] विचिकित्सा कतमा। सत्येषु विमतिः। कुशलपक्षाप्रवृत्तिसन्निश्रयदानकर्मिका। --अभि.समु., पृ. ७ ; विचिकित्सा कर्मफलसत्यरत्नेषु विमतिः। विविधा मतिर्विमतिः 'स्यान्न स्याद्' इति। प्रज्ञातश्चेयं जात्यन्तरमेवोक्ता।

--वि.मा.सि., पृ. २१३, सं.सं.वि.वि.प्र. ।

तृतीयं त्रिकम्। दशमं वस्तु 'अस्थाने कोपः' इत्युच्यते। तच्चाघातचित्तं तावत् पूर्ववैरानुबद्धं वेदितव्यम्।

कायचित्तयोरकर्मण्यता स्त्यानम्। मिद्धमिति तन्द्रा। कामाध्यवसानं (कामासक्तिः) कामच्छन्द इति, तृष्णा अभिकाङ्क्षेति पर्यायाः। मोक्षे मोक्षमार्गे च संशयो विचिकित्सा। एतानि पञ्च नीवरणानि[१] कुशलधनहारकाणीति कृत्वा चौराणीत्युच्यन्ते।

कथं द्वौ द्वौ धर्मौ एकावरणमिति? शाठ्यमूढ्यनुरूपत्वात्। औद्धत्यकौकृत्ये द्वे अपि शाठ्यम्, स्त्यानमिह मूढिः।[२]

एतावता आनन्तर्यधर्मान् देशयित्वा निर्वाणानुकूलधर्मान् देशयितुमाह--

उत्तमाः पञ्चधर्माः श्रद्धावीर्ये स्मृतिसमाधिप्रज्ञाश्च ।
बलेन्द्रियाणि चाग्र्याणि कथ्यन्ते यतनीयमेतेषु तस्माद् ।।४५।।

---

[१] यानि सूत्रे पञ्च निवरणानि उक्तानि-- कामच्छन्दः, व्यापादः, स्त्यानमिद्धम्, औद्धत्यकौकृत्यम्, विचिकित्सा च। किं त्रैधातुक्यः स्त्यानौद्धत्यविचिकित्सा गृह्यन्ते? अथ कामप्रतिसंयुक्ता एव? "केवलोऽयं परिपूर्णोऽकुशलराशिर्यदुत पञ्च निवरणानि" इत्येकान्ताः, कुशलत्ववचनात् सूत्रे।
--अभि.को.भा., पृ. ८५१, बौ.भा.प्र. ;

निवरणानि पञ्च। कामच्छन्दनिवरणम् व्यापादनिवरणम् स्त्यानमिद्धनिवरणम् औद्धत्यकौकृत्यनिवरणम् विचिकित्सानिवरणं च। कुशलपक्षस्यासंप्रख्यानं निवरणं द्रष्टव्यम्। तच्च प्रव्रज्यायामभिरतौ चोदनायां प्रतिपत्तौ शमथे प्रग्रहे उपेक्षायां च। --अभि.समु., पृ. ४८, वि.भा.प्र. १९५०।

[२] कामे निवरणानि एक विपक्षाहारकृत्यतः।
द्व्येकता .... ।।
द्वयोरेकता द्व्येकता। विपक्षः प्रतिपक्षोऽनाहार इत्येकोऽर्थः। स्त्यानमिद्धयोरेक आहारः सूत्रे, आनाहारश्च। कः स्त्यानमिद्धनिवरणस्याहारः? पञ्च धर्माः- तन्द्रा, अरति, विजृम्भिका, भक्तेऽसमता, चेतसो लीनत्वमिति। अथ स्त्यानमिद्धनिवरणस्यानाहारः? आलोकसंज्ञेति। कृत्यमनयोरप्येकम्। उभे अपि ह्येते चित्तं लयं चोदयतः। औद्धत्यकौकृत्ययोरप्येक आहार उक्तः, एकोऽनाहारः। कश्चौद्धत्यकौकृत्यनिवरणस्याहारः? चत्वारो धर्माः-- ज्ञातिवितर्कः, जनपदवितर्कः, अमरवितर्कः, पौराणस्य च हसितक्रीडितरमितपरिभावितस्यानुस्मर्ता भवतीति। कश्चौद्धत्यकौकृत्यनिवरणस्यानाहारः? शमथ इति। कृत्यमप्यनयोरेकम्। उभे अपि ह्येते चित्तमव्युपशान्तं वर्तयतः। अत एकविपक्षाहारकृत्यत्वात् द्वयोरप्येकत्वमुक्तम्।
--अभि.को.भा., ५/५९, पृ. ८५२, बौ.भा.प्र.।

इति। यथा निर्वाणविरोधिनः पञ्च धर्मास्तथैव निर्वाणानुकूला अपि पञ्च धर्माः[1] सन्ति। एतेषां श्रद्धादीनामनन्तरम् आर्यमार्ग उत्पद्यते, अतोऽवस्थान्तरे उत्तमधर्मा इत्यप्युच्यन्ते, न तु उत्तमधर्मेत्येव नामोपलभ्यते। तदा किमिति चेद्? बलानि इन्द्रियाणि

---

१ तत्र भिक्षवः कतमानि पञ्च बलानि? यदुत-- श्रद्धाबलम्, वीर्यबलम्, स्मृतिबलम्, समाधिबलम्, प्रज्ञाबलम्।

यस्मात्तद्विपक्षैरश्रद्धाकौसीद्यमुषितस्मृतिविक्षेपासम्प्रजन्यैरन्तरासमुदाचाराभावात् तानि नावमृद्यन्ते, तस्माद् बलान्युच्यन्ते। --अ.वि.सू., पृ. २२६, के.पी.जा.प्र. १९७१ ;

बुद्धाद्यालम्बना श्रद्धा वीर्यं दानादिगोचरम्।
स्मृतिराशयसम्पत्तिः समाधिरविकल्पना।।

धर्मेषु सर्वैराकारैर्ज्ञानं प्रज्ञेति पञ्चधा।
तीक्ष्णैः सुबोधा सम्बोधिर्दुर्बोधा मृदुभिर्मता।।

इति। अनिन्द्रियस्वभावाः श्रद्धावीर्यस्मृतिसमाधिविशिष्टप्रज्ञाः यथासंख्यं बुद्ध-दान-आशयसम्पत्ति-अविकल्प-सर्वधर्मसर्वाकारपरिज्ञादिषु पञ्चविधविषयेषु कौशलम्। एवमपि न सर्वैरनुत्तरा सम्यक्सम्बोधिः प्राप्या। धर्मतेयं यतोऽधिमात्रैः श्रद्धादिभिः सम्यक्सम्बोधिः सुबोधा, मृदुभिस्तैरेव दुर्बोधेत्यर्थादिदमाक्षिप्तम्। मध्यैः प्रत्येकबुद्धबोधिर्मृदुभिः श्रावकबोधिश्चाधिगम्यत इति।
--अ.अ.स्फु., ४/३३-३४, पृ. ५४, ति.सं., १९७७ ;

श्रद्धा कतमा। अस्तित्वगुणवत्त्वशक्तत्वेष्वभिसंप्रत्ययः प्रसादोऽभिलाषः। छन्दसन्निश्रयदानकर्मिका। वीर्यं कतमत्। कुशले चेतसोऽभ्युत्साहः सन्नाहे वा प्रयोगे वा अलीनत्वे वा अव्यावृत्तौ वा असन्तुष्टौ वा। कुशलपक्षपरिपूरणपरिनिष्पादनकर्मकम्। स्मृतिः कतमा। संस्मृते वस्तुनि चेतसः असंप्रमोषोऽविक्षेपकर्मिका। समाधिः कतमः। उपपरीक्ष्ये वस्तुनि चित्तस्यैकाग्रता। ज्ञानसन्निश्रयदानकर्मकः। प्रज्ञा कतमा। उपपरीक्ष्य एव वस्तुनि धर्माणां प्रविचयः। संशयव्यावर्त्तनकर्मिका। .....

पञ्चेन्द्रियाणामालम्बनं कतमत्। चत्वार्यार्यसत्यानि। स्वभाव कतमः। श्रद्धा वीर्यं स्मृतिः समाधिः प्रज्ञा च। सहायः कतमः। तत्संप्रयुक्ताश्चित्तचैतसिका धर्माः। भावना कतमा। यत् श्रद्धेन्द्रियेण सत्येषु अभिसंप्रत्यसमुत्थानं प्रयोगभावना। वीर्येन्द्रियेण सत्येषु उत्पन्नाभिसंप्रत्ययस्याभिसंबोध्यर्थं व्यायामसमुत्थानप्रयोगभावना। स्मृतीन्द्रियेण सत्येषु आरब्धवीर्यस्य स्मृतिसंप्रयोगार्थमसंमोषसमुत्थानप्रयोगभावना। समधीन्द्रियेण सत्येषु संप्रयुक्तस्मृतेः चित्तैकाग्रतासमुत्थानप्रयोगभावना। प्रज्ञेन्द्रियेण सत्येषु समाहितचित्तस्य प्रविचयसमुत्थानप्रयोगभावना। भावनाफलं कतमत्। सत्याभिसमयसमुत्थानतः ऊष्मगतमूर्धपरिकर्मतश्च क्षान्तिलौकिकाग्रधर्मनिर्हारः। यथा पञ्चेन्द्रियाणि तथा पञ्च बलानि। एषां विशेषः तैः विपक्षान्तरायनिर्ल्लेखोऽनवमृद्यतेति बलानीत्युच्यन्ते। --अभि.समु., पृ. ६, ७४, वि.भा.प्र. १९५०।

अग्राण्यपि प्राप्यन्त इति। क्षान्त्यवस्थायां बलानि। ऊष्मावस्थायाम् इन्द्रियाणि। ऊष्मानन्तरं मूर्धावस्था उत्पद्यते।

मानप्रहाणपूर्वकाणि पञ्चेन्द्रियाणि, अतस्तत्प्रहाणार्थमाह--

व्याधिजरामरणप्रियवियोगवच्च कर्मपरायणाः सर्वे ।
पुनः पुनस्तु चिन्तया प्रतिपक्षेणैवं प्रहीयते मानः ।।४६।।

इति। यथा नाहं व्याधिजरामरणेभ्यस्त्रिभिः धर्मैः विरहितः, तथैव प्रियवियोगादिभिः कर्मस्वकतया च विरहितो नास्मि। इत्थं तावन्मुहुर्मुहुश्चिन्तनं प्रतिपक्षः। अनेन प्रतिपक्षेण नियतं मानस्य विनाशः सम्पद्यत इत्यर्थः। तत्र यथाकर्म सुखदुःखोत्पादस्तावत् कर्मस्वकता। शेषार्थाः सुगमत्वात्परिज्ञेयाः।

स्वर्गं मोक्षं चेच्छेत् सम्यग्दृष्टिस्तावद् भावनीयैव ।
कृतानि मिथ्यादृष्ट्या पुरुषैः सुचरितान्यपि विषमविपाकानि ।।४७।।

इति। अनेन तावद् श्रद्धादीन्द्रियाणामुत्पादको हेतुर्निर्दिष्टः। **सम्यग्दृष्टिस्तावद् भावनीयैव** पूर्वजन्मनि कृतानां सुकृतदुष्कृतानां कर्मणां फलविपाकोऽस्त्येवेति विश्वासः सम्यग्दृष्टिः। अस्ति परलोक इति विश्वास इत्यर्थः।[१] यद्येतादृशी सम्यग्दृष्टिर्न स्यात्तदा यानि तावद् दानादीनि सुचरितानि समाचरितानि विषमविपाकानि स्युरिति, अनिष्टविपाकानि भविष्यन्तीत्यर्थः। अत एव सम्यग्दृष्टिर्नियतं सर्वकुशलमूलोत्पादहेतुर्निर्दिष्टा।

---

[१] प्राग्धर्माभ्युदयो यत्र पश्चान्नैःश्रेयसोदयः ।
संप्राप्याभ्युदयं यस्मादेति नैःश्रेयसं क्रमात्।।

सुखमभ्युदयस्तत्र मोक्षो नैःश्रेयसो मतः ।
अस्य साधनसंक्षेपः श्रद्धाप्रज्ञे समासतः ।।

--रत्नावलि, १/३-४ ।

अनात्माऽशुचिर्दुःखी पुद्गलोऽनित्यश्च[1] सम्यग्विज्ञेयः ।
स्मृत्युपस्थानरहिता विनश्यन्ते च विपर्यासैश्चतुर्भिः ।।४८।।

इति। अनेन तावदुद्वेगहेतुर्निर्दिष्टः । **दुःखीति** असुखीत्यर्थः। **अनित्य** इति क्षणिक इत्यर्थः। **अनात्मेति** अन्तःपुरुषविरहित इति। **अशुचिरिति** पूतिकः। सम्यक्प्रज्ञया परीक्षणेन एतादृश एव मनुष्यः। ये स्मृतिं नोपस्थापयन्ति ते विपरीतग्राहिणः। तत्र को दोष इति चेत्?

स्मृत्युपस्थानरहिता विनश्यन्ते च विपर्यासैश्चतुर्भिरित्युक्तम्। चत्वारो विपर्यासाः[2] -- दुःखे सुखमिति संज्ञाविपर्यासः चित्तविपर्यासो दृष्टिविपर्यासश्च। तथैव अनित्ये

---

[1] स धर्मस्मृत्युपस्थाने समस्तालम्बने स्थितः।
अनित्यदुःखतः शून्यानात्मतस्तान् विपश्यति।।
सम्भिन्नालम्बने धर्मस्मृत्युपस्थाने स्थितस्तान् कायादीन् सर्वानभिसमस्य चतुर्भिराकारैः पश्यति-- अनित्यतः, दुःखतः, शून्यतः, अनात्मतश्च।
--अभि.को.भा., ६/१६, पृ. ९०७, बौ.भा.प्र., ९९८७।

[2] चत्वारो विपर्यासाः -- अनित्ये नित्यमिति, दुःखे सुखमिति, अशुचौ शुचीति, अनात्मन्यात्मेति। अथैतद् विपर्यासचतुष्कं किंस्वभावम्?
दृष्टित्रयाद् विपर्यासचतुष्कम् ....।
अन्तग्राहदृष्टेः शाश्वतदृष्टिर्नित्यविपर्यासः। दृष्टिपरामर्शात् सुखशुचिविपर्यासौ। सत्कायदृष्टेरात्मविपर्यासः।
--अभि.को.भा., ५/९, पृ. ७७७, बौ.भा.प्र. ;

अनित्ये नित्यमित्येवं यदि ग्राहो विपर्ययः।
नानित्यं विद्यते शून्ये कुतो ग्राहो विपर्ययः।।
इह चत्वारो विपर्यासा उच्यन्ते। तद्यथा-- अनित्ये प्रतिक्षणविनाशिनि स्कन्धपञ्चके यो नित्यमिति ग्राहः, स विपर्यासः। तथा--
अनित्यस्य ध्रुवा पीडा पीडा यस्य न तत् सुखम्।
तस्मादनित्यं यत् सर्वं दुःखं तदिति जायते।।
इत्यमुना न्यायेन यदनित्यं तद् दुःखम्, सर्वसंस्काराश्च अनित्याः तस्माद् दुःखात्मके स्कन्धपञ्चके यः सुखमिति विपरीतो ग्राहः सोऽपरो विपर्यासः। तथा--
शुक्रशोणितसम्पर्कबीजं विण्मूत्रवर्धितम्।
अमेध्यरूपमाजानन् रज्यसेऽत्र कयेच्छया।।

अमेध्यपुञ्जप्रच्छन्ने तत्क्लेदार्द्रेण चर्मणा ।

नित्यमिति अनात्मन्यात्मेति अशुचौ शुचिरिति संज्ञाविपर्यासः चित्तविपर्यासः दृष्टिविपर्यासश्च। विपर्यस्ता दृष्टिस्तावद् दुर्गतेः संसारस्य च हेतुः, अतस्ते विनश्यन्त एव। अत एव च पुद्गलो दुःखित्वादिभिर्विज्ञेयः।

यदि पुद्गलोऽप्रियोऽनित्योऽशुचिश्च तदा नैव शक्यते अनात्मता अधिगन्तुम्। यदि न स्यादेक आत्मपदार्थस्तदा कः परिभुङ्क्ते कुशलाकुशलकर्मणां फलविपाकम्? एवं विचार्यमाणे सति आचार्य आह--

उक्तं रूपं नात्मा रूपवांश्च नात्मा रूपे नैवात्मा ।
न चात्मन्यस्ति रूपं शून्यमेवं स्कन्धचतुष्कमपि ज्ञेयम् ।।४९।।

इति। एवमुच्यते-- यद्येकः स्यादात्मा तदा स रूपादिभिरेकस्वभावः, ततो वा भिन्नः? नैव हि रूपादिस्वभाव इत्यादर्शयितुमाह-- रूपं नैव आत्मा यावद् विज्ञानं नात्मेति।[1] रूपादिस्वभावे त्वात्मनि आगमबाधा। काऽत्र युक्तिबाधा। नात्मनः रूपादिस्वभावता, तथा सति रूपादिवद् अनित्यस्वभावप्रसङ्गः।[2] रूपादिभ्यो

यः शयीत स नारीणां शयीत जघनोदरे।। इत्यादि।
एवमिदं शरीरं सर्वात्मना सततमशुचिस्वभावम्। तत्र यो मोहाच्छुचित्वेन ग्राहोऽभिनिवेशः, स विपर्यासः। तथा पञ्चस्कन्धकमात्मलक्षणविलक्षणमस्थिरत्वादुदयव्ययधर्मित्वाच्च निरात्मकमात्मस्वभावशून्यम्, तस्मिन् य आत्मग्राहोऽभिनिवेशः, स विपर्यासः। इत्येते चत्वारो विपर्यासाः सम्मोहस्य हेतुभूताः।
---म.शा.वृ., २३/१३, पृ. २०१, बौ.भा.प्र. १९८३।

[1] स्कन्धेष्वात्मा विद्यते नैव चामी सन्ति स्कन्धा आत्मनीतीह यस्मात्।
सत्यन्यत्वे स्यादियं कल्पना वै तच्चान्यत्वं नास्त्यतः कल्पनैषा ।।

इष्टो नात्मा रूपवान्नास्ति यस्मादात्मा वत्त्वार्थोपयोगो हि नातः।
भेदे गोमान् रूपवानप्यभेदे तत्त्वान्यत्वेऽरूपतो नात्मनः स्तः ।।
--म.अ., ६/१४२, १४३ (म.शा.वृ., पृ. १८८) ; अपि च द्रष्टव्यम्-- वज्र.टीका.(पुनरुद्धार), पृ. ११८-११९, ति.सं. १९९४।

[2] स्कन्धा आत्मा चेदतस्तद्बहुत्वात् आत्मानः स्युस्तेऽपि भूयांस एव।
द्रव्यं चात्मा प्राप्नुयात् तादृशश्च द्रव्ये वृत्तौ वैपरीत्यं च न स्यात् ।।

आत्मोपच्छेदो निर्वृतौ स्यादवश्यं नाशोत्पादौ निर्वृतेः प्राक् क्षणेषु ।
कर्तुर्नाशात् तत्फलाभाव एव भुञ्जीतान्येनार्जितं कर्म चान्यः ।।

भिन्नस्वभाव इति चेद्? त्रयोऽत्र भेदाः - गोमान् देवदत्त इव रूपवान् सः, अथवा कटे देवदत्त इव रूपादिषु स्थितः, अथवा भूम्याश्रितलतागुल्मादिवत् रूपादय आत्माश्रिताः स्युरिति। एतेषां पक्षाणां समाधानाय **रूपवांश्च नात्मे**त्याद्यागमः। युक्तिरिदानीमुच्यते- आद्ये तावदात्मनि किमस्ति वशिता रूपादीनामुपरि? यथाऽस्ति देवदत्तस्य कर्मवशिता गवां दोहादिषु तथा नात्मनः स्वेच्छया रूपादीनां हेयोपादेयता। इच्छामृतेऽपि रूपादीनां विनाशो दृश्यते। तत्कथं रूपवान् आत्मेति वक्तुं युज्यते।

द्वितीयेऽपि पक्षे कथमात्मा रूपाद्याश्रितः? अरूपिणस्तावद् धर्मस्य (आत्मनः) कटे स्थितस्य देवदत्तस्येव प्रतिपादनं नैव युज्यते, येन तस्य रूपाद्याश्रयणं प्रतीयेत। तत्र (रूपादिषु) स्थितोऽपि नात्मा रूपादीन् किञ्चिदुपकरोति, नापि रूपादिभिरपि आत्मा कथञ्चिदुपक्रियते। अथापि रूपादीनारुह्य आत्मा तानि प्रवर्तयति, यथा अश्वमारुह्य अश्ववदिति चेत्? तदपि नैव युज्यते, अनीप्सयाऽपि प्रवृत्तिर्निवृत्तिर्वा दृश्यते। नात्मा स्वेच्छया रूपादीन् प्रवर्तयति निवर्तयति वा।

तृतीये तावत् पक्षे यथा लतागुल्मादयो भूमिमाश्रिता एव। तामेवाश्रित्य यथा रूपादीनामुत्पादः स्थितिः वृद्धिश्च दृश्यन्ते तथा रूपादीनामुत्पादादयो नैव आत्मप्रतिबद्धाः। आत्मनोऽभावेऽपि बाह्यरूपादीनाम् उत्पादवृद्ध्यादयो दृश्यन्ते। सप्राणा वृक्षादय इति येषामभिमतं तत्तु लवणादिभिरनैकान्तिकम्। एवमेव पञ्चसु

--म.अ., ६/१२७-१२८ (म.शा.वृ., पृ. १४६) बौ.भा.प्र. १९८३ ;

एवं तावत् स्कन्धा आत्मा न भवति। स्कन्धव्यतिरिक्तोऽपि न युज्यते। यदि हि स्कन्धेभ्योऽन्य आत्मा भवेत्, अस्कन्धलक्षणो भवेत्। यथा हि गोरन्योऽश्वः न गोलक्षणो भवति, एवमात्मापि स्कन्धव्यतिरिक्तः परिकल्प्यमानः अस्कन्धलक्षणो भवेत्। तत्र स्कन्धाः संस्कृतत्वाद् हेतुप्रत्ययसम्भूता उत्पादस्थितिभङ्गलक्षणाः। तत्र अस्कन्धलक्षण आत्मा भवन् भवन्मतेन उत्पादस्थितिभङ्गलक्षणायुक्तः स्यात्। यश्चैवं भवति, सः अविद्यमानत्वादसंस्कृतत्वाद्वा खपुष्पवन्निर्वाणवद्वा नैव आत्मव्यपदेशं प्रतिलभते, नाप्यहंकारविषयत्वेन युज्यते, इति स्कन्धव्यतिरिक्तोऽप्यात्मा न युज्यते।

--म.शा.वृ. पृ. १४६, बौ.भा.प्र.।

स्कन्धेषु प्रत्येकं स्कन्धे चतुर्भिर्भेदैः विंशतिः सत्कायदृष्टिभेदा[१] व्याख्यायमाना दृश्यन्ते। विंशत्युन्नतशिखरसत्कायदृष्टिशैलं ज्ञानवज्रेण विदीर्य स्रोत-आपत्तिफलमवाप्यते।

सम्प्रति विषमहेतुमहेतुं वा निराकृत्य भावानां सम्यगुत्पादहेतुं दर्शयितुमाह--

स्कन्धा न हि जायन्ते यदृच्छया न प्रकृतीश्वरकालेभ्यः ।
नाहेतोः स्वभावतो ज्ञेया अज्ञानेन तृष्णया जाताः ।।५०।।

इति। **यदृच्छेति** आकाशपातसदृशा। काल इति कालवादिभिः सर्वधर्मोत्पादविनाशहेतुक एको नित्यो विभुश्च धर्मः परिकल्प्यते, यथोक्तम्--

कालः पचति भूतानि कालः संहरते प्रजाः ।
कालः सुप्तेषु जागर्ति कालो हि दुरतिक्रमः ।।[२]

इति। प्रकृतिरपि सांख्यैः सर्वधर्मोत्पादहेतुभूता सत्त्वरजस्तमःस्वभावा एका नित्या विभुश्च कल्प्यते। स्वभावो हि धर्मस्यात्मभावः स्व-स्वभाव इत्यर्थः। ईश्वरोऽपि तावत् इत्येवं- गुणगणविशिष्टः परिकल्प्यते। भावा हि तेभ्यो नितरां नोत्पद्यन्त इत्यनेन तावद् विषमहेतुवादिनो निषिध्यन्ते। **नाहेतोः** इत्यनेन अहेतुवादी निषिद्धः। शेषांशेन भावानामविपरीतहेतुः निर्दिश्यते।

तत्र कथं ज्ञायते **'न हि जायन्ते यदृच्छया'** भावा इति? पुरुषव्यापारसाफल्यस्य दृष्टत्वात्। ननु फलाभावोऽपि तावन्नैव दृश्यत इति? सत्यं दृश्यते, किन्तु स हेतुसाकल्यविकलत्वादिति। यावद्भिः हेतुभिर्भावा उत्पद्यन्ते तेषां साकल्ये (सामग्र्ये) अपि यदि नोत्पद्यन्ते भावास्तदा यदृच्छया जाता इति ज्ञातव्यम्।

कालोऽपि सर्वेषां (भावानां) उत्पादहेतुः। अन्वयेन व्यतिरेकेण चानुपलभ्यमानत्वात्तस्य खपुष्पवदिति। अन्यच्च, नित्यत्वात् कालस्य नोत्पत्तुं शक्यन्ते

---

[१] रूपं नात्मा रूपवान्नापि चात्मा रूपे नात्मा नात्मनि रूपं ....। एवं यावत् विज्ञानं नात्मा, विज्ञानवान्नात्मा विज्ञाने नात्मा नात्मंनि विज्ञानम् इति। तथा-- अनात्मानः सर्वधर्मा इति।
--म.शा.वृ., पृ. १५१, बौ.भा.प्र. १९८३।

[२] म.शा.वृ. (उद्धृत), पृ. १६५, बौ.भा.प्र. ९१८३।

तस्मात् क्रमेण भावाः। हेतुविकलत्वान्न तस्माद् भावानामुत्पादः सम्भवी। युगपदुत्पादविनाशप्रसङ्गोऽपि दुर्निवारः स्याद् अविशिष्टत्वाद् हेतोः। अथ विशिष्टो हेतुरुत्पादविनाशावस्थायामिति चेत्? न नित्यत्वं तस्य स्यात्। हेतौ नित्यत्वस्य कथञ्चिदप्यदर्शनात् काले सर्वथा हेतुत्वाभावः। न हि विनाशः सहेतुकः, अभावत्वाद् अत्यन्ताभाववदिति।

प्रकृतिरपि एवमेव यथायोग्यं निषिध्यत इति ज्ञातव्यम्। प्रकृतिर्न विपरिणामधर्मिणी, नित्यत्वात् पुरुषवत्। पुरुषार्थमपि प्रकृतिर्नैव विपरिणमते, नित्यत्वात्, प्रकृत्यर्थं पुरुषवत्। प्रकृतिर्नास्ति उपभोग्या नित्यत्वात् पुरुषवदेव। पुरुषोऽपि नास्ति उपभोक्ता, नित्यत्वात् प्रकृतिवदेव। न च प्रकृतिर्बीजाधारः सर्वधर्माणाम्, नित्यत्वात्, पुरुषवत्। नापि प्रकृतिः सत्त्वरजस्तमःस्वभावा, नित्यत्वात्, पुरुषवदेव। अपि च, यदि प्रकृतिर्विपरिणामधर्मिणी तदा किं तावत् सा सर्वात्मना विपरिणमते, आहोस्विद् एकदेशेन? यदि सर्वात्मना तदा तत्स्वभावोच्छेद एव स्यात्। अथ एकदेशेन तदा अनित्यत्वं प्रसज्येत। स्वभावेनापि नोत्पद्यन्ते भावाः, विद्यमानत्वात्, उत्पन्नवत्।

ईश्वरोऽपि नास्ति हेतुः, पृथिव्यादिशरीरत्वात्, पृथिव्यादिवत्। नैकस्वभावोऽपि स युज्यते, परस्परविरोधात्। न चानेकात्मकोऽपि, पृथिव्यादिष्वनेकत्वस्यासम्भवात्। अत्यन्तं सूक्ष्मोऽपि नास्ति, उत्पन्नानां मूर्तत्वाद्, अतः (सोऽपि) तथैव (मूर्तः) स्यादिति।[1] नास्ति स सर्ववित् (सर्वज्ञः), अत्यन्तं प्रतनुत्वात् मुक्तात्मवत्। नास्ति च सर्वकर्ताऽपि सूक्ष्मत्वात् परमाणुवत्। न चायं नित्यः पृथिव्यादिमूर्तित्वात्

---

[1] यथोक्तम् तर्कज्वालायाम्--

सूक्ष्मोऽचिन्त्यतनूकरश्च निखिलज्ञाता च सर्वङ्करः
योगाभ्यासलभः सुधीश्च विषयो ध्यानस्य च ध्यायिनाम्।

चन्द्रार्कावनिवारिवह्निपवनाकाशकायस्तथा
शान्त्यानन्दसुखेप्सुभिस्तु सततं सम्भावितव्यो हरः।।

--ध.धा.द.गी.(पुनरुद्धार), १३३ का., ति.सं.।

पृथिव्यादिवत्। नैव तावदीश्वरः सर्वधर्माणामुत्पादहेतुः युगपदुत्पादाभावात्, कुम्भकारवत्। नास्ति रूपादीनामीश्वरेणोत्पादः सत्त्वाद् ईश्वरवत्। नास्ति सर्वकर्तृत्वमीश्वरस्य अनात्मकत्वाद् घटवत्, यद्येकः स्यादात्मरूपस्तदा बद्धपुरुषवदनीश्वरत्वं प्रसज्येत। अहेतुवादिनस्तु लोकेनैव निराक्रियन्त इति तत्र न किञ्चिदपि वक्ष्यते।

अथ कथमुत्पद्यन्ते भावा इति चेद्? **अज्ञानेन तृष्णया जाताः** इत्युक्तम्। यथा अनुपहतबीजं खाद्यादिसहायम् उदकेन चार्द्रीकृतम् अङ्कुरमभिनिर्वर्तयति तथैव अज्ञानेनावृतं कर्म तृष्णोदकेनार्दीकृतं भवाङ्कुरमभिनिर्वर्तयति। तत्राज्ञानं सत्येषु सम्मोहः, अविद्या अन्धकारोऽदर्शनं चेति पर्यायाः। अविद्यान्धभूतो हि बालः इह अमुत्र च सुखावाप्तये कुशलाकुशलं कर्म करोति। इदमेव तावदस्य अविद्याप्रत्ययाः संस्काराः।

त्रिविधं हि कर्म-कुशलम्, अकुशलम्, आनेञ्ज्यं च। रूपारूपावचरं कुशलं कर्म आनेञ्ज्यम्।[1] इमानि त्रीण्यपि कर्माणि अविद्याप्रत्ययजनितानि त्रैधातुकतृष्णया आर्द्रीकृतानि पुनः पुनर्भवाङ्कुरमभिनिष्पादयन्तीति वेदितव्यम्।

आत्मनि मिथ्यादृष्टिः[2] शीलव्रतपरामर्शो विचिकित्सा च ।
मुक्तिपुरद्वाराणां बाधकं संयोजनत्रयमवगच्छेत्[3] ।।५१।।

---

[1] यदुक्तं सूत्रे-- त्रिविधं कर्म पुण्यकर्म अपुण्यकर्म आनिंज्यकर्म च। पुण्यकर्म कतमत्। कामप्रतिसंयुक्तं कुशलं कर्म। अपुण्यकर्म कतमत्। अकुशलं कर्म। आनिंज्यकर्म कतमत्। रूपारूप्यप्रतिसंयुक्तं कुशलं कर्म।। यदुक्तं सूत्रे अविद्यालम्बनाः संस्काराः पुण्यानिंज्या अपुण्यानिंज्याश्चेति। कतमे पुण्यानिंज्या अविद्यालम्बनाः संस्काराः उत्पद्यन्ते। द्विविधः संमूढः। फलविपाकसंमूढः तत्त्वार्थसंमूढश्च। फलविपाकसंमूढस्यापुण्याः संस्काराः। तत्त्वार्थसंमूढस्य पुण्यानिंज्याः संस्काराः।

--अभि.समु., पृ. ५४, वि.भा.प्र. १९५०।

[2] सत्कायदृष्टिप्रभवानशेषान् क्लेशांश्च दोषांश्च धिया विपश्यन्।
आत्मानमस्या विषयं च ज्ञात्वा योगी करोत्यात्मनिषेधमेव।।

--म.अ., ६/१२० (म.शा.वृ., पृ. १४५)

[3] त्रयमेवाह-- सत्कायदृष्टिं शीलव्रतपरामर्शं विचिकित्सां च। ......अपरे पुनराहुः --
अगन्तुकामता मार्गविभ्रमो मार्गसंशयः।

Nepal Sanskrit University, Baluwatar

इत्यन्तराया मोक्षस्य गमनेऽतस्त्रिदेशना।।

त्रयोऽन्तराया देशान्तरगमने भवन्ति-- अगन्तुकामता, मार्गविभ्रमोऽन्यमार्गसंश्रयणात्, मार्गसंशयश्च। एवं मोक्षगमनेऽप्येत एव त्रयोऽन्तरायाः। तत्र सत्कायदृष्ट्या मोक्षादुत्त्रासमापन्नस्यागन्तुकामता भवति। शीलव्रतपरामर्शेनान्यमार्गसंश्रयणान्मोक्षविभ्रमः। विचिकित्सया मार्गसंशयः। एषां मोक्षगमनान्तरायाणां प्रहाणं द्योतयन् भगवान् क्लेशत्रयस्यैव प्रहाणं देशितवान्।

--अभि.को.भा., पृ. ८४२, ;

त्रयमेवाहेति। सत्कायदृष्टि-शीलव्रतपरामर्श-विचिकित्सात्रयमेवाह। क आह? भगवान्। तथा हि सूत्रे पठ्यते-- "कियता भदन्त स्रोतापन्नो भवति? यतश्च महानामन् आर्यश्रावकः 'इदं दुःखमार्यसत्यम्' इति यथाभूतं प्रजानाति, 'अयं दुःखसमुदय...', 'अयं दुःखनिरोधः....', 'इयं दुःखनिरोधगामिनी प्रतिपदा आर्यसत्यम्' इति यथाभूतं प्रजानाति, त्रीणि चास्य संयोजनानि प्रहीणानि भवन्ति, प्रज्ञातानि, तद्यथा-- सत्कायदृष्टिः, शीलव्रतपरामर्शः, विचिकित्सा च। स एषां त्रयाणां संयोजनानां प्रहाणात् स्रोतापन्नो भवति अविनिपातधर्मा सम्बोधिपरायणः सप्तकृद्भवपरमः सप्तकृत्वो देवाँश्च मनुष्याँश्च संसृत्य सन्धाव्य दुःखस्यान्तं करिष्यति" इति।

---अभि.को.स्फु., पृ. ८४१, बौ.भा.प्र. ;

संयोजनानि कति कथं संयोजनं कुत्र संयोजनम्। संयोजनानि नव। अनुनयसंयोजनम् प्रतिघसंयोजनम् मानसंयोजनम् अविद्यासंयोजनम् दृष्टिसंयोजनम् परामर्शसंयोजनम् विचिकित्सासंयोजनम् ईर्ष्यासंयोजनम् मात्सर्यसंयोजनं च।

अनुनयसंयोजनं कतमत्। त्रैधातुको रागः। अनुनयसंप्रयोजनेन संप्रयुक्तः त्रैधातुकं नोद्वेजयति। अनुद्वेगेन अकुशलसमुदाचारः कुशलासमुदाचारश्च। तेन आयत्यां दुःखाभिनिवृत्तौ दुःखेन संयुज्यते। प्रतिघसंयोजनं कतमत्। सत्त्वेषु दुःखे दुःखस्थानीयेषु च धर्मेषु चित्तस्य विहिंसा। प्रतिघसंयोजनेन संप्रयुक्तो प्रतिघनिमित्तेषु चित्तं नोपेक्षते। अनुपेक्षया च अकुशलसमुदाचारः कुशलासमुदाचारश्च। तेन आयत्यां लौकिकदुःखाभिनिवृत्तौ दुःखेन संयुज्यते। मानसंयोजनं कतमत्। सप्त मानः। मानोऽतिमानो मानातिमानोऽस्मिमानोऽभिमान् ऊनमानो मिथ्यामानश्च। .... मानसंयोजनेन संप्रयुक्त आत्मात्मीयौ न संजानाति। असंज्ञानात् आत्मात्मीयग्रहः अकुशलसमुदाचारः कुशलासमुदाचारश्च। तेन आयत्यां दुःखाभिनिवृत्तौ दुःखेन संयुज्यते। अविद्यासंयोजनं कतमत्। त्रैधातुकमज्ञानम्। अविद्यासंयोजनेन संप्रयुक्तो दुःखधर्मान् समुदयधर्मान् नाध्यवस्यति। अनध्यवसायेन अकुशलसमुदाचारः कुशलासमुदाचारश्च। तेन आयत्यां लौकिकदुःखाभिनिवृत्तौ दुःखेन संयुज्यते। दृष्टिसंयोजनं कतमत्। तिस्रो दृष्टयः। सत्कायदृष्टिरन्तग्राहदृष्टिर्मिथ्यादृष्टिश्च। दृष्टिसंयोजनेन संप्रयुक्तो मिथ्यानिःसरणं परिकल्पितविप्रतिसारं पर्येषते अभिनिविशते। मिथ्यानिःसरणाभिनिवेशेनाकुशलसमुदाचारः कुशलासमुदाचारश्च। तेन आयत्यां लौकिकदुःखाभिनिवृत्तौ दुःखेन संयुज्यते। परामर्शसंयोजनं कतमत्। दृष्टिपरामर्शः शीलव्रतपरामर्शश्च। परामर्शसंयोजनेन संप्रयुक्तो मिथ्यनिःसरणोपायं कल्पयत्यभिनिविशते। मिथ्यानिःसरणोपायाभिनिवेशेनाकुशलसमुदाचारः कुशलासमुदाचारश्च। तेन आयत्यां लौकिकदुःखाभिनिवृत्तौ दुःखेन संयुज्यते। विचिकित्सासंयोजनं कतमत्। सत्येषु विमतिः। विचिकित्सासंयोजनेन संप्रयुक्तो बुद्धधर्मसंघेषु रत्नेषु विचिकित्सते रत्नत्रयं न समुदाचरति।

(सुगममेतत्) इति। एवंविधेभ्यः स्कन्धेभ्यो विमोक्षार्थं को हि नाम सहायक इति चेत्?

(सुगममेतत्) एवं हि सति तादृशेभ्यः स्कन्धेभ्यो विमोक्षार्थं को हि नाम सहायकः स्यादिति चेदाह--

आत्मापेक्षो मोक्षः परस्मान्न लभ्यते किमपि साहाय्यम् ।
चत्वार्यार्यसत्यानि वृत्तस्थः श्रुतचिन्ताभिरभ्यस्येच्च ।।५२।।

इति। मोक्षस्तावत् निजचित्तनिर्भर इति न मोक्षाधिगतिः सहायकोपकारनिर्भरा।[1] तदा क उपाय इति चेद्? **वृत्तस्थः श्रुतचिन्ताभिः**[2]

रत्नत्रयासमुदाचारेणाकुशलसमुदाचारः कुशलासमुदाचारश्च। तेन आयत्यां लौकिकदुःखाभिनिवृत्तौ दुःखेन संयुज्यते। ईर्ष्यासंयोजनं कतमत्। लाभसत्काराध्यवसितस्य परसंपत्तावमर्षकृतः चेतसो व्यारोषः। ईर्ष्यासंयोजनेन संप्रयुक्तो लाभसत्कारान् अनुनयति धर्मं न गुरूकरोति। लाभसत्कारगुरुकारेणाकुशलसमुदाचारः कुशलासमुदाचारश्च। तेन आयत्यां लौकिकदुःखाभिनिवृत्तौ दुःखेन संयुज्यते। मात्सर्यसंयोजनं कतमत्। लाभसत्काराध्यवसितस्य परिष्कारेषु चेतस आग्रहः। मात्सर्यसंयोजनेन संप्रयुक्त उपचयमनुनयति तद्वर्जनतां च न सत्करोति। उपचयानुनयेनाकुशलसमुदाचारः कुशलासमुदाचारश्च। तेन आयत्यां लौकिकदुःखाभिनिवृत्तौ दुःखेन संयुज्यते।

---अभि.समु., पृ. ४५-४६, वि.भा.प्र. ;

तद्यथा-- संयोजनत्रयप्रहाणे सति षोडशे मार्गे अन्वयज्ञानक्षणे यत् क्लेशप्रहाणं तत् स्रोतआपत्तिफलम्।

--म.शा.वृ., पृ. २१०, बौ.भा.प्र. ;

सब्बसंयोजनं छेत्वा यो वे न परितस्सति।
सङ्गातिगं विसंयुत्तं तमहं ब्रूमि ब्राह्मणं।। --धम्मपद, २६/१५ ।

[1] अत्ता हि अत्तनो नाथो को हि नाथो परो सिया।
अत्तना हि सुदन्तेन नाथं लभति दुल्लभं।।

अत्ता हि अत्तनो नाथो अत्ता हि अत्तनो गति।
तस्मा संयमयत्तानं अस्सं भद्दं व वाणिजो।।

तुम्हेहि किच्चं आतप्पं अक्खातारो तथागता।

--धम्मपद, १२/४, २५/२१, २०/४ ;

देशितो वो मया मार्गस्तृष्णाशल्यस्य कर्त्तनः।
युष्माभिरेव कर्त्तव्यमाख्यातारस्तथागतः।। --हेवज्र.पं.मुक्तावलि, पृ. ९१, ति.सं.सं. २०००।

[2] वृत्तस्थः श्रुतचिन्तावान् भावनायां प्रयुज्यते।

इत्याद्युक्तम्। श्रुतिस्तावद् युक्तियुक्ता अनुरूपा च वेदितव्या। शीलं (वृत्तं) हि अनुपहतत्वादियुक्तम्। चिन्ता तावत् निर्वेधभागीयपक्षा ज्ञेया। इत्येवं वृत्तश्रुतचिन्तान्वितो भूत्वा चतुरार्यसत्येष्वभ्यासो विधेयः। इत्थं निर्वाणमधिगतं भविष्यतीत्यभिप्रायः।

अधिशीलचित्तप्रज्ञास्तिस्त्रोऽपि शिक्षाः सदैव शिक्षणीयाः ।
एतास्वन्तर्भूतानि शतमेकपञ्चाशच्च शिक्षापदानि ।।५३।।

इति। **अधिशीलेत्यादिना** निर्वाणगामिनी प्रतिपदा निर्दिश्यते। अकुशलेभ्यो विरतिः निर्वाणपरिणामना चेत्यधिशीलम्। आर्यमार्गोत्पादहेतुभूतानि चत्वारि ध्यानान्यधिचित्तम्। निर्वेधभागीयानुरूप्येणाधिप्रज्ञा वेदितव्या। एतासु तिसृषु शिक्षासु सर्वाः शिक्षाः संगृह्यन्त इति दर्शयितुमाह-- अत्र **चान्तर्भूतानि शतमेकपञ्चाशच्च शिक्षापदानि**[1] एतासु तिसृषु सर्वेषामेकपञ्चाशदुत्तरैकशतशिक्षापदानामन्तर्गृहीतत्वादत्रैव

सत्यानि हि द्रष्टुकाम आदित एव शीलं पालयति। ततः सत्यदर्शनस्यानुलोमं श्रुतमुद्गृह्णाति, अर्थं वा श्रृणोति। श्रुत्वा चिन्तयति। अविपरीतं चिन्तयित्वा भावनायां प्रयुज्यते। समाधौ तस्य श्रुतमयीं प्रज्ञां निश्रित्य चिन्तामयी जायते। चिन्तामयीं निश्रित्य भावनामयी जायते।

--अभि.को.भा., ६/५, पृ. ८९१ ।

[1] द्रष्टव्यम् -- प्रतिमोक्षसूत्रम्, पृ. ५, गंगानाथ झा शोध संस्थानम्, इलाहाबाद, १९५६ ; विनयसूत्र, सिंधी जैन ग्रन्थमाला, ग्रन्याङ्कः-७४, भारतीय विद्या भवन, बम्बई, १९८१ ;

तुलनीयम्-- तत्रिमे चत्तारो पाराजिका धम्मा उद्देसं आगच्छन्ति- मैथुनपरिसेवने, अदिन्नादाने, जीविता वोरोपने, उत्तरिमनुस्सधम्मालापने ; इमे को पनायस्मन्तो तेरस सङ्घादिसेस धम्मा उद्देसं आगच्छन्ति- सुक्कविस्सट्ठियं, कायसंसग्गे, दुट्ठुल्लवाचायं, अत्तकामपारिचरियायं, सञ्चरित्तापज्ञने, कुटिमापने, बिहारमापने, अमूलकाधिकरणे, अञ्ञभागियाधिकरणे, संघभेदे, संघभेदकानुवत्तने, दुब्बचभूते, कुलदूसने ; इमे खो पनायस्मन्तो द्वे अनियता धम्मा उद्देसं आगच्छन्ति- पटिच्छन्ने एको एकाय निसज्ञने, एको एकाय निसज्ञने ; इमे खो पनायस्मन्तो तिंस निस्सग्गिया पाचित्तिया धम्मा उद्देसं आगच्छन्ति- अतिरेकचीवरधारणे, तिचीवरविप्पवासे, अकालुप्पन्नचीवरनिक्खिपने, पुराणचीवरधोबापने, अञ्ञातिकाय चीवरपटिग्गहे, अञ्ञातकं चीवरविञ्ञापने, बहुचीवरविञ्ञापने, अप्पवारितचीवरविकप्पापज्ञने, अप्पवारित- चीवरविकप्पापज्ञने, वेय्यावच्चकरस्स चीवरचेतापनदाने, कोसियमिस्सकसन्थतधारणे, सुद्धकाळकसन्थतधारणे, सुद्धकाळकसन्थतधारणे, नवसन्थतकारापने, निसीदनसन्थतकारापने, एळकलोमहरणे, एळकलोमधोबापने, जातरूपरजतसादने, रूपियसंबोहारसमापज्ञने, कयविक्कये, अनिसेकपत्तधारणे, ऊनपञ्चबन्धनपत्तधारणे, भेसज्ञसन्निधिकरणे, वस्सिकसाटिकचीवरपरियेसने, सामं दत्वा चीवर अच्छिन्दने, सुत्तं विज्ञापेत्वा चीवरवायापने,

शिक्षासु सायासमभ्यसनीयमिति। एतानि एकपञ्चाशदधिकैकशतं शिक्षापदानि प्रातिमोक्षसूत्रेणावगन्तव्यानि।

राजन्, बुद्धेनोक्तः कायगता स्मृतिश्चैकायनो मार्गः ।

चीवरविनने विकप्पापज्ञने, अञ्ञेकचीवरनिक्खिपने, अन्तरघरे चीवरनिक्खिपने, सङ्घिकलाभं अत्तनो परिणामने ; इमे खो पनायस्मन्तो द्वेनवुति पाचित्तिया धम्मा उद्देसं आगच्छन्ति- मुसावादे, ओमसवादे, पेसुञ्ञे, पदसो धम्मवाचने, सहसेय्ये, सहसेय्ये, मातुगामस्स धम्मदेसने, अनुपसम्पन्नस्स भूतुत्तरिमनुस्सधम्मालपने, अनूपसम्पन्नस्स दुट्ठुल्लापत्तिरोचने, पथवीखणने, भूतगामपातव्ये, अञ्ञेनञ्ञं पटिचरणे, भिक्खु उज्झापने, सेनासननुद्धरणे, सन्थरित्वा सेय्ये अनुद्धरिते, अनुपखज्ञसेय्यकप्पने, भिक्खुनिक्कड्ढने, आहञ्च पादके मञ्चे अभिनिसीदने, महल्लकं विहारं कारयमाने, सप्पाणक उदक सिञ्चने, भिक्खुनोवादकसम्पन्ने, अत्थङ्गते सुरिये ओवादने, भिक्खुनुपस्सयुपसङ्कमने, भिक्खुनोवादकथेरानुधंसने, अञ्ञातिकाय भिक्खुनिया चीवरदाने, भिक्खुनिया चीवरसिञ्चने, भिक्खुनीहि एकतो अद्धानमग्गप्पटिपन्नो, भिक्खुनिया एकतो नावाभिरुहने, भिक्खुनिपरिपाचितभोजने, भिक्खुनिया रहो निसज्ञने, आवसथपिण्डभोजने, गणभोजने, परस्परभोजने, पूवमन्थपटिग्गहणे, पावारिते पुन खादने, भुत्ताविं पुन पवारणे, विकालभोजने, सन्निधिकारे, पणीतभोजनविञ्ञापने, दन्तपोनखादने, अञ्ञतित्थियानं भोजनदाने, भिक्खू उय्योजने, कुले अनुपखज्ञ निसज्ञने, एको एकाय रहो निसज्ञने, कुलानि पयिरुपासने, पच्चयपवारणासादियने, उय्युत्तसेनादस्सने, सेनाय वासे, उय्योधिकगमने, सुरापाने, अङ्गुलिपतोदके, उदके हसधम्मे, अनादरिये, भिसापने, जोतिविसिब्बने, नहाने, दुब्बण्णकारणे, चीवरविकप्पने, चीवरअपनिधाने, सञ्चिच्च पाणं जीविता वोरोपने, सप्पाणक उदकपाने, अधिकरणउक्कोटने, दुट्ठुल्लापत्तिपटिच्छादने, ऊनवीसतिवस्स उपसम्पादने, थेय्यसत्तेन मग्गपटिपज्ञने, मातुगामेन मग्गपटिपज्ञने, मिच्छादिट्ठियं, उक्खित्तसम्भोगे, नासित्तकसामणेरसम्भोगे, नासित्तक सामणेरसम्भोगे, सिक्खापदविवण्णके, मोहनके, पहारदाने, तलसत्तिकउग्गिरणे, कुक्कुच्च उपदहने, उपस्सुतिट्ठाने, कम्मपटिबाहने, छन्दं अदत्वा गते, चीवरं दिन्ने खिय्यने, सङ्घिकलाभपरिणामने, राजन्ते पुरप्पवेसने, रतन उग्गहणने, विकालगामप्पविसने, सूचिघरकारापने, मञ्चपीठकारापने, तूलोनद्धामञ्चपीठकारापने, निसीदनकारापने, कण्डुप्पटिच्छादिकारापने, वस्सिकसाटिककारापने, सुगतचीवरप्पमाण चीवर कारापने ; इमे खो पनायस्मन्तो चत्तारो पाटिदेसनीया धम्मा उद्देसं आगच्छन्ति- भिक्खुनिहत्थतो खादनीयगहणे, भिक्खुनी-वोसासने, सहत्थाखादनीयपटिग्गहणे, अप्पसंविदितखादनीयपटिग्गहणे ; इमे खो पनायस्मन्तो सेखिया धम्मा उद्देसं आगच्छन्ति- दसपरिमण्डलवग्गो, दसउज्ञग्घिकवग्गो, दसखम्भकवग्गो, दससक्कच्चवग्गो, दसकबळवग्गो, दससुरुसुरुवग्गो, पन्नरपादुकावग्गो ; इमे खो पनास्मन्ते सत्त अधिकरणसमथा धम्मा उद्देसं आगच्छन्ति- उप्पन्नुपपन्नानं अधिकरणानं समथाय वूपसमाय सम्मुखाविनयो दातब्बो, सतिविनयो दातब्बो, अमूळ्हविनयो दातब्बो, परिञ्ञाय कारेतब्बं, येभुय्यसिका, तस्सपापियसिका, तिणवत्थारको ।
--पातिमोक्ख(पालि), आलोक प्रकाशन, नागपुर।

रक्षेदिमं सयत्नं स्मृतिनाशाच्च सर्वधर्मप्रध्वंसः ।।५४।।

इति। अनेन तावन्निर्वाणगामिनमेकमात्रमार्गं तथागतो निर्दिष्टवान्। कायगतेति कायोपलम्भनम्। सा तावत् कायस्योत्थानोपवेशनगमनशयनावस्थाम् ईर्यापथाख्यां प्रत्यवेक्षते।[1] सा हि कायगता स्मृतिः[2] सुगतेन एकायनमार्गत्वेनोपदिष्टा। यथोक्तम्-- **"भिक्षवः, अयं हि सत्त्वानां विशोधकः दुःखदौर्मनस्याद्यतिक्रान्तः प्रतिपत्तिधर्मावगमकः निर्वाणसाक्षात्कारी एकायनो मार्गः, तद्यथा कायगता**

---

[1] द्रष्टव्यम्-

एतदेव समासेन संप्रजन्यस्य लक्षणम्।
यत्कायचित्तावस्थायाः प्रत्यवेक्षा मुहुर्मुहुः।। --बो.च., ५/१०८

[2] इह भिक्षवो भिक्षुरिति। इहेति कामधातौ। अध्यात्मकाये प्रत्यात्मकाये कायानुदर्शीति। अनुदर्शनं प्रज्ञा। तद्यस्यास्ति सोऽनुदर्शी पुद्गलः। दण्डिवत्। ततः सप्तमीतत्पुरुषः। कायेऽनुदर्शी कायानुदर्शी। स्वसामान्यलक्षणोपलक्षणया। आतापीति वीर्यवान्। स्मृतिमानिति। स्मृतीन्द्रियवानित्यर्थः। संप्रजानन्निति। प्रज्ञासमन्वित इत्यर्थः। विनीय लोकेऽभिध्यादौर्मनस्ये इति। अपनीयेत्यर्थः।

--अ.वि.सू.नि., पृ. २०८-२०९, के.पी.जा.प्र. १९७१ ;

का पुनरनुपश्यना? प्रज्ञा। तया हि तद्वाननुपश्यः क्रियते। यतश्चोक्तम् 'अध्यात्मं काये कायानुपश्यी विहरति' इति। अनुपश्यमस्यास्ति दर्शनमित्यनुपश्यी, कायेऽनुपश्यी। ...(अभि.को.भा., पृ. ९०४) तया हि प्रज्ञया तद्वान् प्रज्ञावान्। अनुपश्यः क्रियत इति। अनुपश्यतीत्यनुपश्यः। "पाघ्राध्माधेट्दृशः शः" (पा.सू. ३.१.१३७) इति शप्रत्ययः। अनुपश्यं पुद्गले करोतीत्यनुपश्यति। प्रज्ञास्वभावे त्वेवं विग्रहः -- अनुपश्यस्य करणमनुपश्यनेति। तया हि प्रज्ञया तद्वान् प्रज्ञावाननुपश्यः क्रियते। यथा प्रज्ञायोगात् प्राज्ञः पुद्गल उच्यते, एवमनुपश्यनायोगादनुपश्य इत्यतोऽनुपश्यना प्रज्ञेति सिद्धम्। यतश्चोक्तं भगवता-- अध्यात्मं प्रत्यात्मं काये कायानुपश्यी कायानुदर्शी विहरतीति। तेनापि ज्ञायतेऽनुपश्यना प्रज्ञेति। कथमिति? साधयति-- अनुपस्यमस्यास्ति। किं तद्? दर्शनम्। दर्शनलक्षणं ह्यनुपश्यम्। अतोऽनुपश्यी पुद्गलः, दण्डिवत्। ततः सप्तमीतत्पुरुषः -- कायेऽनुपश्यी कायानुपश्यीति। कायमनुपश्यितुं शीलमस्येति कायानुपश्यीति णिनिरपि (पा.सू.३.२.७८) यदि विधीयेत, तथाप्येतद्रूपं सिद्ध्यतीति पश्यामः। ....

शुचिविपर्यासस्य प्रतिपक्षेण कायस्मृत्युपस्थानम्। सुखविपर्यासस्य प्रतिपक्षेण वेदनास्मृत्युपस्थानम्। यत्किञ्चिद् वेदितमिदमत्र दुःखस्येति। नित्यविपर्यासस्य प्रतिपक्षेण चित्तस्मृत्युपस्थानम्। चित्तस्य लघुपरिवर्तित्वात्। आत्मविपर्यासस्य प्रतिपक्षेण धर्मस्मृत्युपस्थानम्।

--अभि.को.स्फु., पृ. ९०४, ९०६ बौ.भा.प्र. १९८७।

स्मृतिरिति विस्तरः''।[1] तत्रैकायनमार्गत्वं नाम नैयत्येन ऋजुतया शैघ्र्येण च प्रापकंत्वम्। अत एव **एकायनः** इति मार्गानुशंसावचनः। एकेनैव अयत इति एकायनमार्गः, द्वयाकाराभावाद् एकस्वभावावस्थानाच्चेत्युक्तम्। **रक्षेदिमं सयत्नम्** इति तादृशी तावत् स्मृतिः प्रयोजनबाहुल्यात् त्वया प्रयत्नेन संरक्षणीयेति। तस्या उपघाते सति सर्वान्य(कुशल)धर्माणां विघातः, किमुत निर्वाणाधिगमः। एतद् दर्शयितुमाह-- 'स्मृतिनाशाच्च सर्वधर्मप्रध्वंसः'[2] इति। इत ऊर्ध्वम्

बहुबाधं तु जीवनं वायूद्भूतजलबुद्बुदवदनित्यं च।
आश्चर्यं जागर्तेः क्षणमिदं निःश्वासोच्छ्वासनिद्राभ्यः ।।५५।।

बहुबाधं तु जीवनम्[3] इत्यादिना मोक्षाधिगमहेतुः संवेगोत्पादिका मरणानुस्मृतिस्तावत् प्रस्तूयते। विघ्नबहुलमायुस्तु **वायूद्भूतजलबुद्बुदवदनित्यम्** इत्यनेन एकक्षणत्वेनायुर्निर्दिष्टम्।

आश्चर्यं जागर्तेः क्षणमिदं निःश्वासोच्छ्वासनिद्राभ्यः इत्यत अनेकानर्थमूलमायुरेकक्षणात्मकमेव। पुरुषस्य आश्वासस्ततः प्रश्वासः ततश्च स्वप्ननिद्रादितो यज्जागरणं

---

[1] तुलनीयम्--

यथोक्तम्-- तत्र अल्पदुःखाभ्यासपूर्वकं कष्टकष्टतराभ्यासः सिध्यति। यथा च अभ्यासवशात् सत्त्वानां दुःखसुखसंज्ञा, तया सर्वदुःखोत्पादेषु सुखसंज्ञाप्रत्युपस्थानाभ्यासात् सुखसंज्ञैव प्रत्युपतिष्ठते। एवं निष्पन्दफलं च सर्वधर्मसुखाक्रान्तं नाम समाधिं प्रतिलभते।

--बो.च.पं., पृ. ८४-८५, मि.सं.।

[2] बद्धश्चेच्चित्तमातङ्गः स्मृतिरज्वा समन्ततः।
भयमस्तंगतं सर्वं कृत्स्नं कल्याणमागतम्।।

यदि बद्धः कथंचिद् भवेद्। स्मृतिर्वक्ष्यमाणलक्षणा। सैव रज्जुर्बन्धनोपायत्वात्। समन्ततः सर्वथा असत्पक्षे प्रचारनिरोधात्। तदा भयमस्तंगतं प्रत्यस्तमितं सर्वमशेषम्। सर्वं कल्याणमभ्युदयनिःश्रेयसलक्षणम्। आगतं संप्राप्तम्। देवश्चेद् वृष्टो निष्पन्नाः शालय इति यथा।

--बो.च.पं., ५/३, पृ. ५०, मि.सं.।

[3] अध्रुवं त्रिभवं शरदभ्रनिभं नटरङ्गसमा जगि जन्मच्युतिः।
गिरिनद्यसमं लघुशीघ्रजवं व्रजतायु जगे यथ विद्यु नभे ।।

--शि.समु., पृ. ११३, मि.सं.।

तन्महदाश्चर्यकरम्।[1] द्विविधौ तावदनर्थौ। बाह्यास्तु वायु-सूर्य-सरीसृपादयः, आभ्यन्तरास्तु वाय्वादीनां प्रकोपात् समुत्थिता ज्वरादिव्याधयः।

विशरणगलनः पूतिः शोषासारशुचिस्वभावः कायः ।
रजःसधर्मी चान्ते सदा वियोगशीलो नश्वरो ज्ञेयः ।।५६।।

इत्यादिना काये सारबुद्धिप्रहाणाय प्रवर्त्यते। अथवा मरणानुस्मृतिं प्रति प्रेर्यत एव। **कायः रजःसधर्मी चान्ते** इत्यादीनामर्थस्तावत् सूत्रगतानां पञ्चपदानामानुरूप्येण बोद्धव्यः। यथोक्तं भगवता-- **"मृतः कालातीतो वा कायः सम्बन्धिभिरग्निना दग्धीक्रियते, जले वा विसर्ज्यते भूमौ वा निधीयते अथवा स वायुसूर्याभ्यां शुष्कीक्रियते, आहोस्वित् तिर्यग्योनिगतैर्नाना जन्तुभिर्भुज्यते"** इति। तत्र वियुज्यमानस्वभावात्मकः कायः **रजः** इत्यादिना अग्निना दग्धीभवतीत्यर्थः। **शोषः** इति भूमौ निधानेन अथवा वायुना सूर्येण वा शुष्यतीति पदद्वयार्थः। **पूतिः** इति जले उत्सर्जनेनेत्यर्थः। **अशुचिः** इति तिर्यग्योनिगतैर्नाना-जन्तुभिर्भक्ष्यते। कथं सारहीन इति चेद्? **विशरणगलनो वियोगशीलो नश्वरो ज्ञेयः** इत्यादिभिः नश्वरादिभिः साररहितत्वं[2] निर्दिश्यते। तत्र तावत् **नश्वरः** इत्यग्निना दाहात् वायुसूर्यादिभिः शोषाच्च विशरण-गलन-धर्मी, जलेन पूतित्वाद् वा विशरणशीलः। जन्तुभिः कवलीकरणेन विनाशाद् वा वियोगशील इति **ज्ञेयः** अवगन्तव्य इत्यर्थः।

पृथ्वीमेरुसमुद्राः सप्तार्कज्वालैर्नावशिष्यन्ते ।

---

[1] प्रश्वसित्ययमन्वक्षं यदुच्छ्वसिति मानवः ।
अवगच्छ तदाश्चर्यमविश्वास्यं हि जीवितं ।।

इदमाश्चर्यमपरं यत्सुप्तः प्रतिबुध्यते ।
स्वपित्युत्थाय वा भूयो बह्वमित्रा हि देहिनः।।

--सौन्दरनन्दम्, १५/५७-५८।

[2] न खादितव्यमशुचि त्वया पेयं न शोणितम्।
नान्त्राणि चूषितव्यानि किं कायेन करिष्यसि।।

--बो.च., ५/६५

धूलिमात्रं हि मूर्ताः का कथा दुर्बलवपुषां मानवानाम् ।।५७।।

पृथ्वीमेरुसमुद्राः इत्यादिना सुदृढानामप्येषाम् अनित्यतादर्शनात् स्वकायं प्रति सारहीनत्वं बुद्धौ समर्प्यते। अत एव पृथ्वीसुमेरुसमुद्रादयः पदेऽत्र संगृहीताः। ते च **सप्तार्कज्वालैर्नावशिष्यन्ते**[१] इति सप्तानां सूर्याणामुदयात् प्रज्वलनमभिहितम्। येषु

---

[१] संवर्तन्यः पुनस्तिस्रो भवन्त्यग्न्यम्बुवायुभिः।
एकत्र ध्याने सत्त्वाः समं संवर्तन्ते एतस्यामिति संवर्तनी। १. सप्तभिः सूर्यैस्तेजःसंवर्तनी भवति। २. वर्षोदकेनाप्संवर्तनी। ३. वायुप्रकोपाद् वायुसंवर्तनी। ताभिश्च भाजनानां सूक्ष्मोऽप्यवयवो नावशिष्यते।

--अभि.को.भा., ३/१००, पृ. ५५७-५५८, बौ.भा.प्र. ;

केन पुनः क्रमेणैताः संवर्तन्यो भवन्ति? **सप्ताग्निना**, सप्त संवर्तन्यस्तेजसा भवन्ति। ततः -- **अद्भिरेका**, सप्तानां तेजःसंवर्तनीनामनन्तरमद्भिः संवर्तनी भवति। **एवं गतेऽद्भिः सप्तके पुनः। तेजसा सप्तकः**, एतेन क्रमेणाप्संवर्तनीनां गते सप्तके पुनः तेजःसंवर्तनीनां सप्तको भवति। **पश्चाद् वायुसंवर्तनी ततः।। १०२।।** पश्चादेका वायुसंवर्तनी भवति। किं कारणम्? यथैव हि तेषां सत्त्वानां समापत्तिविशेषादात्मभावानां स्थितिविशेषः, तथा भाजनानामपामिति ता एता भवन्ति। एवं च कृत्वा-- षट्पञ्चाशत् तेजःसंवर्तन्यः, सप्त अप्संवर्त्तन्यः, एकावायुसंवर्तनी।

--अभि.को.भा. ३/१०२, पृ. ५६५-५६६, बौ.भा.प्र. ;

तेषां तथा सुचिरं महानिरयान्महानिरयं संक्रामतां तेजःसंवर्तनी प्रादुर्भविष्यति। तेजःसंवर्तन्यां प्रादुर्भूतायां येऽन्येषु लोकधातुषु महानिरयाः, तत्र ते क्षेप्स्यन्ते। ते तेषु महानिरयेषु उपपत्स्यन्ते। ते तत्र विक्षिप्तास्तेषु महानिरयेषूपपन्नाः समानास्तत्रापि महानिरयान्महानिरयं संक्रमिष्यन्ति। तेषां तत्रापि महानिरयान्महानिरयं संक्रामतां तत्रापि पुनरेव तथैव तेजःसंवर्तनी प्रादुर्भविष्यति। ते तस्यां तेजःसंवर्तन्यां प्रादुर्भूतायां ततश्च्युताः समानाः पुनरेव तथैव महानिरयान्महानिरयं संक्रमिष्यन्ति। तेषां तत्रापि सुचिरं महानिरयान्महानिरयं संक्रामतां तत्रापि तथैव तेजःसंवर्तनी प्रादुर्भविष्यति। ते तस्यां तेजःसंवर्तन्यां प्रादुर्भूतायां पुनरेव ततश्च्युतास्तेनैव अक्षीणेन सावशेषेण कर्मणा इहैव लोकधातौ पुनः क्षेप्स्यन्ते। क्षिप्ताः सन्तो महानिरयेषूपपत्स्यन्ते। ते पुनरेव तानि महानिरयेषु महान्ति महानिरयदुःखानि प्रत्यनुभविष्यन्ति। तावत्प्रत्यनुभविष्यन्ति, यावत्पुनरेव तेजःसंवर्तनी प्रादुर्भविष्यति। एवं ते बहुदुःखवेदनीयं कर्म प्रत्यनुभविष्यन्ति। --अ.प्र.सू., पृ. ९०-९१, मि.सं. ;

तेजःसंवर्तनी इति नरकगतिमुपादाय यावद्ब्रह्मलोके कश्चित् सत्त्वो नावशिष्टो भवति, तदा शून्यभाजने सप्तसूर्याः प्रादुर्भूय क्रमेण अप्मण्डलमारभ्य यावत् प्रथमं ध्यानं दहन्ति। अन्येषु लोकधातुषु इति त्रिसाहस्रमहासाहस्रेषु।। --आलोकः, पृ. ४०१, मि.सं. ;

सः पुनः संवर्तस्त्रिविधो वेदितव्यः। तेजःसंवर्तन्यवीचिमुपादाय यावद्ब्रह्मलोकात्संवर्तते। अप्संवर्तनी सकलं द्वितीयं ध्यानं संवर्तते। यावत्सकलं तृतीयं ध्यानं संवर्तते। चतुर्थे पुनर्ध्याने तेषां

तैर्दह्यमानकायो विद्यते, अतस्ते मूर्ताः कथिताः। तेऽपि पृथिव्यादयो मूर्तपदार्थाः सप्तानां सूर्याणामुदयेन दग्धीक्रियन्ते। तथा सति **धूलिमात्रं हि मूर्ताः का कथा दुर्बलवपुषां मानवानाम्** इति यदि दृढतराणामपि (महाभूतानां) तेषामीदृशी अवस्था जायते तदा किं पुनस्तावत् दुर्बलकायानां (मानवानां) कथा। तत्रानित्यत्वेन हन्तुमशक्या याऽवस्था, सा नास्त्येव। तत्र पृथिव्यादीनां सप्तसूर्योदयेन दहनं तु सूत्रानुसारेणावसेयम्, यथोक्तं भगवता--

भिक्षवः, कालो भविष्यति यदा चिरं वृष्टिर्न भविष्यति तदा महाभूमौ अस्यां ये बीजजातानि महाभूतजातानि कुनद्यश्च शोषमापत्स्यन्ते। भिक्षवः, चिरकालं यदा वृष्टिर्न भविष्यति तदा लोकेऽस्मिन् द्वितीयस्य सूर्यस्योदयो जायते। तस्योदयेऽस्यां महाभूमौ चतस्रो महानद्यो व्यतिरिच्यान्यासां सर्वासां नदीनामयं शोषकालो भवति। लोके तृतीयेन सूर्योदयेन चतस्रो महानद्योऽनवतप्तादिमहाह्रदा अपि शोषमाप्नुवन्ति। लोके चतुर्थेन सूर्योदयेन महासमुद्रमारभ्य तालवृक्षपर्यन्तं सर्वं शुष्कं जायते। लोके पञ्चमेन सूर्योदयेन शतद्वययोजनपर्यन्त जलं शुष्यति। लोके षष्ठेन सूर्योदयेन एकोऽपि जलबिन्दुर्नावशिष्यते। इयं महापृथिवी पर्वतराजः सुमेरुश्चापि धूमायितो भवति, यथा-- तृणाच्छन्नेन तप्तायःपिण्डेन धूम उद्गतो भवति। सर्वत्र धूम एव धूमो दृश्यते। लोके सप्तमेन सूर्योदयेन सर्वोऽयं त्रिसाहस्रमहासाहस्रो लोकधातुः ज्वलिष्यति, प्रज्वलिष्यति, यथा दग्धे नवनीते सर्पिषि वा छारिकाऽपि नावशिष्यते, एवमेव अशेषान् संस्कृतधर्मान् दग्ध्वा स्वयमपि शान्तिमापद्यन्ते।[1]

चतुर्थध्यानभूमिकानां देवानां सहैव विमानैरुत्पत्तिः। सहैव विमानैः प्रच्युतिर्भवति। तस्मात्तेषां नास्ति संवर्तो। नास्ति संवर्तकारणम्। त्रीणि संवर्तनीशीर्षाणि। द्वितीयं ध्यानं तृतीयं ध्यानं चतुर्थं ध्यानम्।
--यो.भू., पृ. ३१, कलकत्ता विश्वविद्यालय, १९५७।

[१] तुलनीयम्-- यदा च पञ्चगतिके लोकसन्निवेश एकोऽपि सत्त्वो न प्रज्ञायते तदोपकरणसम्भवोऽपि न प्रज्ञायते। यदोपकरणसम्भवोऽपि न प्रज्ञायते तदा वृष्टिरपि न प्रज्ञायते। देवे खल्ववर्षति येऽस्यां महापृथिव्यां तृणौषधिवनस्पतयस्त उच्छुष्यन्ते। इदमेव च सूर्यमण्डलं सन्तापकतरं भवत्यकालवृष्टिपरिगृहीतं। षट्प्रकारदाह्यवस्त्वधिकारतश्चापरेषां सूर्यमण्डलानां प्रादुर्भावो भवति यदुत,

अस्यां तावत् तेजःसंवर्तन्यां पृथ्वीसुमेरुसमुद्रादीनां विलयो निदर्शितः। एतेषां सर्वेषां विलय अप्संवर्तन्यां वायुसंवर्तन्यामपि भवतीति वेदितव्यम्।[1] तत्रायं तावद् विशेषः- यथा (तेजःसंवर्तन्यां) द्वितीयस्य सूर्यस्योदयस्तथा अपसंवर्तन्यां क्षारजलवृष्टिः, वायुसंवर्तन्यां च विक्षेपको महावायुरुत्तिष्ठति।

इत्थं सर्वमनित्यं ह्यनात्मकमशरणमनाथमनिकेतम् ।
कदलीतरुरिव राजन् चित्तमपसारयासारसंसारात् ।।५८।।

इत्थं सर्वं इत्यादिना यथोक्तं सर्वमुपसंहृत्य अववादप्रदानं क्रियते। व्याख्यातमेव पूर्वमनित्यमनात्मं च। दुःखतस्त्रातुः कस्यचिदपि स्वामिनोऽभावाद् **अशरणम्**। तादृशस्य समूहस्य सामीप्याभावाद् **अनाथम्**। कुत्सितस्थानं विहाय कस्यचिदन्यस्य निवासस्याभावाद् **अनिकेतम्**। यस्मादेवं लोकश्चायमशरणस्तस्माद् हे नरश्रेष्ठ, त्वया कदलीतरोरिव निःसारात्[2] संसाराच्चित्तमुद्वेजनीयमिति।

सम्प्रति क्षणसम्पद्-रूपं दुर्लभमानवजीवनं दर्शयितुमाह--

सत्त्वानामेव संवर्तनीकर्माधिपत्यतः। तानि पुनः सूर्यमण्डलान्यस्मात्सूर्यमण्डलाच्चतुर्गुणसंतापानि प्रभावतः। ते पुनः सप्त भूत्वा सप्त गुणं तापयन्ति।

षड्वस्तूनि कतमानि। कु...(?) महा...द्रा(?) येषां द्वितीयेन सूर्यमण्डलेन शोषः। कुनद्यो महानद्यो यासां तृतीयेन सूर्यमण्डलेन शोषः। अनवतप्तं महासरो यस्य चतुर्थेन सूर्यमण्डलेन शोषः। महासमुद्रोऽस्य पञ्चमेन सूर्यमण्डलेन शोषः। षष्ठस्य चैकदेशेन शोषः। सुमेरुर्महापृथिवी च ययोः षष्ठेनैव सप्तमेन च सूर्यमण्डलेन सारतविग्रहतया दाहः। तत एव चार्चिर्वायुना प्रेरिता यावद् ब्रह्मलोकं दहन्ती परैति। --यो.भू. पृ. ३५, कल.वि., १९५७।

[1] अप्संवर्तनी कतमा। यतश्च सप्त तेजःसंवर्तन्यः समतिक्रान्ता भवन्ति ततो द्वितीये ध्याने सहजोऽब्धातुः सम्भवति यस्तं भाजनलोकं लवणमिवाब्धातुर्विलोपयति। स चाब्धातुस्तेनैव भाजनलोकेन सहान्तर्धीयते। अन्तर्हितश्च पुनस्तथैव विंशतिमन्तरकल्पांस्तिष्ठति।

वायुसंवर्तनी कतमा। यतश्च सप्ताप्संवर्तन्योऽतिवृत्ता भवन्ति ततः पुनरेका तेजःसंवर्तनी भवति। तदनन्तरं तृतीये ध्याने सहजो वायुधातुः सम्भवति। यस्तं भाजनलोकं वायुनेवाङ्गं शोषयन्नन्तर्धापयति। स च वायुस्तेनैव सहान्तर्धीयते। तथा हि दृश्यते। एकत्यस्य वायुधातौ प्रकुपिते यावदस्थ्यपि कार्श्यमापद्यते। संवृत्तश्च तथैव विंशतिमन्तरकल्पांस्तिष्ठति।

--यो.भू. पृ. ३६, कल.वि., १९५७।

[2] द्रष्टव्यम्-- बो.च.पं., ५/६१-६४, पृ. ६५, मि.सं.।

महार्णवयुगच्छिद्रे हि कूर्मग्रीवार्पणाच्च मानुषं जन्म[1] ।
तिर्यगादिसुदुर्लभं सफलीकुरु सद्धर्माभ्यासान्नरेन्द्र ।।५९।।

इति। एकस्मिन् सागरे निवसन् कच्छप एकसागरस्थितः कच्छप इत्युच्यते। सागरे स्थितः कच्छपो युगस्य छिद्रश्चेति महार्णवयुगच्छिद्र इति पदद्वयसंग्रहः। द्वयोरनयोः संयोगः कूर्मग्रीवार्पणमिति। मनुष्यत्वप्राप्तिस्तु ततोऽपि दुर्लभा। अर्थोऽयं सूत्रेषु विस्तरेण निर्दिष्टः, तथा हि- **''भिक्षवः, सागरगर्भे एकोऽन्धो दीर्घायुः कच्छपो निवसति। स शतवर्षानन्तरं सागरस्योपरितले सकृदागच्छति। तस्मिन् महासमुद्रे एकच्छिद्रको युगः प्लवति। स पूर्ववायुवेगेन पश्चिमे दिशि, पश्चिमवायुवेगेनेति विस्तरः। भिक्षवः, दिष्ट्या कदाचित् तस्य अन्धस्य कच्छपस्य उपरितलं समागच्छतो ग्रीवा तस्मिन् युगच्छिद्रे प्रविशति। तयोर्द्वयोः संयोगो नितरां दुर्लभः। भिक्षवः, मनुष्यजन्मप्राप्तिस्तु ततोऽपि दुर्लभेत्यहं कथयामीति।''**[2] **तिर्यगादि** इति तिर्यगादियोनितः अर्थात् ताभ्यो योनिभ्यो मनुष्यजन्मप्राप्तिस्तु सुदुर्लभा, अत्यन्तं मूढत्वात्। यस्मादेवं मानवजन्म दुर्लभं तस्मात् हे नरश्रेष्ठ , त्वया सद्धर्मचर्यया तन्मानुषं जन्म सफलीकरणीयम्।[3] अतश्चैवं त्वया न श्रवणमात्रेण सन्तोषो विधेयः, अपि तु सगौरवं यत्न आस्थेयः।

---

[1] अत एवाह भगवान् मानुष्यमतिदुर्लभम्।
महार्णवयुगच्छिद्रकूर्मग्रीवार्पणोपमम् ।।
--बो.च., ४/२०

[2] दे.क. २२६. आर्यकुसुमसञ्चयनाम महायानसूत्रम्, 'ह' पृ. ३०२, भो.सं. ; दे.क. ५६. आर्यबोधिसत्त्वपिटकनाम महायानसूत्रम्, 'ग' पृ. ७०, भो.सं. ; दे.क. ३२८. नन्दप्रव्रजितसूत्रम्, 'स' पृ. २५६, भो.सं.।

[3] तुलनीयम्--

सोऽहं प्राप्य मनुष्यत्वं ससद्धर्ममहोत्सवम् ।
महार्णवयुगच्छिद्रकूर्मग्रीवार्पणोपमम् ।।५।।

अनित्यताव्यनुसृतां कर्मच्छिद्रससंशयाम् ।
आत्तसारां करिष्यामि कथं नेमां सरस्वतीम्।। ६।।

--बुद्धस्तोत्रः शतपञ्चाशत्कः, लद्दाखरत्नश्रीदीपिका, १९९८ ;

केचिद् रत्नालङ्कृतकनकपात्रं च पूरयन्ति पुरीषेण ।
ततोऽप्यसावतिमूढो यश्च नृजन्म लब्ध्वापि पापमाचरति[1] ।।६०।।

'केचिद् रत्नालङ्कृतकनकपात्रम् इत्यादिना दुर्लभं मनुष्यभावं लब्ध्वाऽपि यः अकुशले कर्मणि प्रवर्तते तं विनिन्द्य कुशले कर्मणि नियोज्यते। रत्नैरलङ्कतं स्वर्णपात्रं न योग्यं पुरीषादिभिः पूरयितुम्, अतोऽस्थाने आचरणं हि लोके निन्दनीयमेव। मानुष्यं प्राप्यापि यः पापमाचरति स ततोऽप्यधिकं निन्दनीय एव, मनुष्यजीवनस्य रत्नपात्रादपि दुर्लभतरत्वात्।

प्रतिरूपदेशवासः सत्पुरुषसमाश्रयः शुभप्रणिधानं च ।
स्वकीयपूर्वकुशलं ह्येतच्चक्रचतुष्कं हि विद्यते त्वयि ।।६१।।

प्रतिरूपदेशवासः इत्यादिना राज्ञ आर्यमार्गस्यार्हत्त्वं दर्शितम्। तत्रानुकूलदेशवासः स यः समाध्यनुरूपः हिंसोपद्रवादिभिर्विकलत्वात्। **सत्पुरुषसमाश्रयः** कल्याणमित्राणां सम्यक् सेवनमिति। कल्याणमित्रम् हि आगमसम्पन्नो वा अधिगमसम्पन्नो वा, गुणैः समो विशिष्टो वा, मित्रं वा विश्वस्तो गुरुर्वा देशनाकुशलः, निरुक्तिक्षमः, गम्भीरार्थवक्ता, यः कश्चिद् अस्थाने न योजयतीति वा। अर्थात् यस्यानुसरणेन शील-श्रुत-त्याग-प्रज्ञादीनामभिवृद्धिर्भवेत्। तथाविधः स **सत्पुरुष** इत्युच्यते। स्वस्य सत्प्रणिधानं तु यथा विहितं तथा निष्पद्यते। **स्वकीयपूर्वकुशलम्** इत्यादिना सम्भार(पुण्य)- संचय एव दर्शितः। एतानि

अपि च--

अद्य मे सफलं जन्म सुलब्धो मानुषो भवः।
अद्य बुद्धकुले जातो बुद्धपुत्रोऽस्मि सांप्रतम्।।

तथाधुना मया कार्यं स्वकुलोचितकारिणाम्।
निर्मलस्य कुलस्यास्य कलङ्को न भवेद्यथा।। --बो.च., ३/२५-२६ ।

१ तुलनीयम्--
नातः परा वञ्चनास्ति न च मोहोऽस्त्यतः परः।
यदीदृशं क्षणं प्राप्य नाभ्यस्तं कुशलं मया।। --बो.च. ४/२३

चतुष्चक्रमित्युच्यन्ते[१], आर्यमार्गरथप्रवर्तनात्। त्वयि एतानि महाचक्राणि विद्यन्त इति संविद्यन्ते। तस्मादार्यमार्गमुत्पादयितुं यत्नो विधेय इत्यभिप्रायः।

कल्याणमित्रसेवा ब्रह्मचर्यपूर्तये देशिता मुनिना ।
सेव्यः सदा सुपुरुषः शमः प्राप्तो यतो जिनमपेक्ष्य बहुभिः।।६२।।

कल्याणमित्रसेवा इत्यादिना आर्यमार्गोत्पादनाय सत्पुरुषाणां सेवनं प्रधानमिति निर्दिष्टम्[२]। आर्यानन्दो भगवन्तमपृच्छत्। तद्यथा-- "कल्याणमित्रं यः

---

[१] सुलाभोऽथ स्वधिष्ठानः सुभूमिः सुसहायकः।
सुयोगो गुणवान् देशो यत्र धीमान् प्रपद्यते।।
चतुर्भिश्चक्रैरप्रमादक्रियां दर्शयति प्रतिरूपदेशवासादिभिः। तत्रानेन श्लोकेन प्रतिरूपदेशवासं दर्शयति। सुलाभश्चीवरपिण्डपातादीनां जीवितपरिष्काराणामकृच्छ्रेण लाभात्। स्वधिष्ठानो दुर्जनैर्दस्युप्रभृतिरनधिष्ठितत्वात्। सुभूमिरारोग्यभूमित्वात्। सुसहायकः सभागशीलदृष्टिसहायकत्वात्। सुयोगो दिवाल्पाकीर्णाभिलापकत्वात् रात्रौ चाल्पशब्दादिकत्वात्।
बहुश्रुतो दृष्टसत्यो वाग्मी समनुकम्पकः।
अखिन्नो बोधिसत्त्वश्च ज्ञेयः सत्पुरुषो महान्।।
अनेन द्वितीयेन सत्पुरुषं दर्शयति। आगमाधिगमवाक्करणनिरामिषचित्ताकिलासित्वगुणयोगात्।
स्वालम्बना मुसंभारा(सुसंस्तब्धा) सुभावनैव(सुपायाचैव) देशिता।
सुनिर्याणप्रयोगा च आत्मसम्यक्प्रधानता ।।
अनेन तृतीयेन योनिशोमनस्कारसंगृहीतामात्मनः सम्यक्प्रणिधानतां दर्शयति। सद्धर्मालम्बनतया सुसंभृतसंभारतया शमथादिनिमित्तानां कालेन कालं भावनया अल्पमात्रासंतुष्टितया सत्युत्तरकरणीये सातत्यसत्कृत्यप्रयोगतया च।
रतेः क्षणोपपत्तेश्च आरोग्यस्यापि कारणं।
समाधेर्विचयस्यापि पूर्वे हि कृतपुण्यता।।
अनेन चतुर्थेन पूर्वकृतपुण्यतां पञ्चविधेन हेतुत्वेन दर्शयति। रतिहेतुत्वेन यतः प्रतिरूपदेशवासेऽभिरमते। क्षणोपपत्तिहेतुत्वेन यतः सत्पुरुषायाश्रयं लभते। आरोग्यसमाधिप्रज्ञाहेतुत्वेन च यत आत्मनः सम्यक्प्रणिधानं सम्पद्यते। --म.सू., पृ. ८४-८५, मि.सं. १९७०।

[२] द्रष्टव्यम्--
न सज्जनाद् दूरचरः क्वचिद् भवेद् भजेत साधून् विनयक्रमानुगः।
स्पृशन्त्ययत्नेन हि तत्समीपगं विसर्पिणस्तद्गुणपुष्परेणवः।। --जा.मा., ३१/७२ ;

सदा कल्याणमित्रं च जीवितार्थेऽपि न त्यजेत्।
बोधिसत्त्वव्रतधरं महायानार्थकोविदम्।। --बो.च. ५/१०२ ;

कुशलसहायः स किमर्धब्रह्मचर्य इति?" भगवान् आह-- **"मा त्वम् आनन्द, अयं कल्याणमित्रं कुशलसहायश्च अर्धब्रह्मचर्य इति भाषेथाः। आनन्द, कल्याणमित्राणि[1] कुशलसहायाश्चेमे नितरां ब्रह्मचर्यस्य परिपूरयितारः। तत्कस्य हेतोः? उत्पत्तिमन्तः (प्राणिनः) कल्याणमित्रमाश्रित्य जन्मादितः परिमुक्ता**

मित्ते भजस्सु कल्याणे सुद्धाजीवे अतन्दिते।। --धम्मपद, २१/१६ ;

यो आदिकर्म स्थितु भूमिय बोधसत्त्वो अध्याशयेन वर प्रस्थित बुद्धबोधिम्।
तेही सुशिष्यगुरुगौरवसंप्रयुक्तो कल्याणमित्र सद सेवितव्य विज्ञैः ।।

किं कारणं ततु गुणागमु पण्डितानां प्रज्ञाय पारमित ते अनुशासयन्ति ।
एवं जिनो भणति सर्वगुणाग्रधारी कल्याणमित्रमुपनिश्रित बुद्धधर्माः ।।
--रत्न.सं.गा.(म.सू.सं.), १५/१-२, पृ. ३७१, मि.सं. ;

साहु दस्सनमरियानं सन्निवासो सदा सुखो।
अदस्सनेन बालानं निच्चमेव सुखी सिया।। -१५/१०

धीरं च पञ्ञं च बहुस्सुतं च, धोरय्हसीलं वतवन्तमारियं।
तं तादिसं सप्पुरिसं सुमेधं, भजेथ नक्खत्तपथं व चान्दिमा।। १५/१२ --धम्मपदम् ।

[1] द्रष्टव्यम्--

चित्तानवलीनत्वानुत्रासादिना उपाकौशल्येन यथाशयं "क्षितीशेष्टराज्ञीमरणनिवेदनन्यायेन" मात्सर्यादिधर्मवियुक्तः समस्तवस्तुनैरात्म्यादिदेशकः सुगतिफलादिप्रापकत्वेन कल्याणमित्रम्।
--आलोक, पृ. ३०५ ; ग.व्यू.सू., ५/३०, पृ. ३६४, मि.सं. ;

मित्रं श्रयेद्दान्तशमोपशान्तं गुणाधिकं सोद्यममागमाढ्यं।
प्रबुद्धतत्त्वं वचसाभ्युपेतं कृपात्मकं खेदविवर्जितं च।।
--म.सू., १७/१०, पृ. ११६, मि.सं. ;

कल्याणमित्रसंधारिताः कुलपुत्र बोधिसत्त्वा न पतन्ति दुर्गतिषु। कल्याणमित्रसमन्वाहृता नातिक्रामन्ति बोधिसत्त्वशिक्षाम्। कल्याणमित्रप्रतिच्छन्ना अभ्युद्गता भवन्ति लोकात्। कल्याणमित्रपर्युपासिता बोधिसत्त्वा असंप्रमोषचारिणो भवन्ति सर्वबोधिसत्त्वचर्यासु। कल्याणमित्रपरिगृहीता बोधिसत्त्वा दुर्धर्षा भवन्ति कर्मक्लेशैः। संबोधकाः कल्याणमित्रा अकरणीयानां संनिवारकाः प्रमादस्थानात्। निष्कासयितारः संसारपुरात्। तस्मात्तर्हि कुलपुत्र एवं मनसिकारात् प्रतिप्रश्रब्धेन कल्याणमित्राण्युपसंक्रमितव्यानि। ......अत एवं चतुर्धर्मकसूत्रेऽप्युक्तम्-- कल्याणमित्रं भिक्षवो बोधिसत्त्वेन यावज्जीवं न परित्यक्तव्यमपि जीवितहेतोरिति। तदेवम्- **कल्याणमित्रानुत्सर्गात्,** आत्मभावादीनां रक्षादिकं कार्यम्।
--शि.समु., पृ. २३, २६, मि.सं.।

भवन्तीति।'' यतो हि भगवता निर्दिष्टम्, अतः सत्पुरुषाः सेवितव्याः। पुनश्च सत्पुरुषाश्रयेण कथं तावत् ब्रह्मचर्यस्य पूर्णत्वं ज्ञायत इति चेद्?

शमः प्राप्तो जिनमपेक्ष्य बहुभिः इत्याह। तत्र ब्रह्मेति दुःखातीतं (निर्वाणं), तदर्थमाचरणं ब्रह्मचर्यम् अर्थात् मार्ग इति। तस्माद् परिपूर्णं **ब्रह्मचर्यं** हि समस्तदुःखानां प्रहाणस्य हेतुभूतम्, कल्याणमित्रं च आर्यमार्गस्य हेतुरित्यायातम्।

मिथ्यादृक् प्रत्यन्ते नरकप्रेततिर्यक्षूत्पद्यमानः ।
म्लेच्छो जडश्च सत्त्वो यो ह्युत्पन्नो बुद्धविरहिते ।६३।।

दीर्घायुषि देवकुले जनिलब्धश्चाष्टाक्षणा इमे दोषाः ।
एभी रहितो भूत्वा क्षणं लब्ध्वा जन्मनिवृत्तौ प्रयतेत ।।६४।।

मिथ्यादृग् इत्यादिना कुशलकर्मसु अपात्रत्वं प्रदर्शितम्। तत्र मिथ्यादृष्टिस्तावन्नास्ति परलोक इत्याकारो ग्राहः। तिर्यग्यौनावुत्पन्नस्तिर्यक्, प्रेतयोनावुत्पन्नः प्रेतः, नरकेषु चोत्पन्न नारक इति। बुद्धोत्पादविकलत्वाज्जिनोपदेशाभावः। प्रत्यन्तजनपदेषु म्लेच्छरूपोपपत्तिः। सत्यपि बुद्धोत्पादे जडो मूकस्तु हस्तसंचालनेन संकेतयति।

दीर्घायुषि देवकुले असंज्ञिदेवा अरूपिणो देवाश्च। एतेष्वष्टसु स्थानेषु कुशलं सम्पादयितुं क्षणाभावाद् **अक्षणाः** इमान्युंच्यन्ते[1], आदीनवाधिक्याद् दोषा अपि।

---

[1] नरकप्रेततिर्यञ्चो म्लेच्छा दीर्घायुषोऽमराः ।
मिथ्यादृग्बुद्धकान्तारो मूकताष्टाविहाक्षणाः ।।
--बो.च.पं., पृ. ५, मि.सं. ; द्रष्टव्यम् पुनश्च ध.सं.(म.सू.सं.), पृ. ३३९ ; म.व्यु., 'चो' पृ. ७ भो.सं. ; समाधि.सू., पृ. ३७१, मि.सं. ;

पुनश्च-- अक्षणावस्थायां धर्मप्रविचयस्य कर्तुमशक्यत्वात्, इत्यभिप्रायः। यथोक्तमार्यगण्डव्यूहसूत्रे आर्यजयोष्मायतनविमोक्षे--

दुर्लभा अष्टाक्षणविनिवृत्तिः। दुर्लभो मनुष्यभावप्रतिलम्भः। दुर्लभा क्षणसंपद्विशुद्धिः। दुर्लभो बुद्धोत्पादः। दुर्लभा अविकलेन्द्रियता। दुर्लभो बुद्धधर्मश्रवणः। दुर्लभं सत्पुरुषसमवधानम्। दुर्लभानि भूतकल्याणमित्राणि। दुर्लभो भूतनयानुशासन्युपसंहारः। दुर्लभं सम्यग्जीवितं मनुष्यलोके इति। (ग.व्यू.सू.-११६) इदमेवाभिसंधायोक्तम्--

अत एव अक्षणदोषाः कथ्यन्ते। तैर्विरहितं क्षणं (मानवजीवनं) प्राप्य पुनः जन्मनिवृत्तये यत्नः करणीयः। अनेन इतः प्रभृति अक्षणस्थानेषु जन्मनिवृत्यर्थं यत्न आस्थेय इत्यर्थः।

इष्टविघातव्याधिमृत्युजरादिदुःखावहः संसारः ।
विरज्य ततः शृणु तावद् दोषानेतस्यावगच्छन् नरदेव ।।६५।।

इष्टविघातेत्यादि यदुक्तं तेन सर्वलोकान् प्रति अनभिरतिसंज्ञाम् अभिनिर्वृत्य निर्वाणैकपरायणश्चित्तसन्ततिप्रवाहो विधीयते। दुःखमितिशब्दस्तु इष्टविघातमृत्युजरादिषु प्रत्येकेन सह योजनीयम्। इष्टविघातादयस्तावद् दुःखहेतुत्वेन दुःखमित्युक्ताः, न तु वेदनास्वभावत्वेन। **आदि** इत्यनेन शोक-परिदेवादयः संगृह्यन्ते। एवमनेकदुःखानामाश्रयस्य पञ्चोपादानस्कन्धस्वरूपत्वात् ततः खिद्यमानो मनसि संवेगमुत्पादयेदित्यर्थः[1]। संसारस्येमान् दोषान् खेदहेतुत्वं च परिजानन् अमुं (उपदेशं)

मानुष्यं दुर्लभं लोके बुद्धोत्पादोऽतिदुर्लभः ।
ततोऽपि श्रद्धाप्रव्रज्याप्रतिपत्तिः सुदुर्लभा ।।

बोधौ चित्तं दृढं सर्वसत्त्वानामनुकम्पया ।
सर्वदुःखप्रशान्त्यर्थं दुर्लभानां परम्परा ।। --बो.च.पं., पृ. ५, मि.सं.।

[1] तुलनीयम्-- साम्प्रतं संसारदोषोपलम्भसंदर्शनेन तत्रोत्पाद्योद्वेगार्थं कर्मप्रहाणोपायकथनकाम आह-
अस्य दुःखसमुद्रस्य सर्वशान्तो न विद्यते।
निमग्नस्येह बालस्य भीतास्ते किं न विद्यते।।
--चतु.श. ७/१, आलोक प्रकाशन, नागपुर, १९७१ ;
संसारमूलान् संस्कारानविद्वान् संस्करोत्यतः।
अविद्वान् कारकस्तस्मान्न विद्वांस्तत्त्वदर्शनात् ।।
तत्र संसारस्य विज्ञानादिप्रवृत्तिलक्षणस्य मूलं प्रधानं कारणं संस्काराः। ततश्च-- संसारमूलान् संस्कारानविद्वान् संस्करोति। "अविद्यानुगतो यः पुद्गलो भिक्षवः पुण्यानपि संस्कारानभिसंस्करोति, अपुण्यानपि संस्कारानभिसंस्करोति, आनेञ्ज्यानपि संस्कारानभिसंस्करोति।" इति भगवद्वचनात्। यतश्चैवमविद्वान् कारकः, तस्मादविद्वानेव पुद्गलः कारको भवति संस्काराणाम्, न विद्वांस्तत्त्वदर्शी प्रहीणाविद्यः। किं कारणम्? तत्त्वदर्शनात्। तत्त्वदर्शने हि सर्वपदार्थानामेवानुपलम्भात् नास्ति किञ्चिद् यदालम्ब्य कर्म कुर्यादिति। --म.शा.वृ. २६/१०, पृ. २४५, बौ.भा.प्र.।

श्रवणं कुरु । समग्राणां संसारदोषाणां दुरभिधानत्वादेकदेशेन तावन्निर्दिश्यते। सप्तप्रकारा हि संसारदोषाः, तथा हि-- अनियतत्वम्, अतृप्तिः, पुनः पुनः देहपरित्यागः, पुनः पुनश्च प्रतिसन्धिः, पुनः पुनरुन्नतावनतभावः, दुःसंगतिः, षड्गतिका नियतदुःखानुभूतिश्चेति[1]।

तत्र प्रथममनियतत्वदोषमधिकृत्याह--

मित्रत्वेन च शत्रुः पुत्रत्वेन पिताऽम्बा च भार्यात्वेन ।
परिवर्त्योत्पद्यन्ते तस्मान्न नियतं किमपीह संसारे ।।६६।।

इति। परिवर्त्येति पुत्रः पितृत्वेन[2], भार्या मातृत्वेन तथा मित्रं शत्रुत्वेन वा पुनर्जायन्ते। अतो नास्ति संसारे किञ्चिदपि नैयत्यम्।

अतृप्तिदोषमधिकृत्याह--

चतुःसमुद्रजलादपि जनैरधिकं जनन्याः स्तन्यं पीतम् ।
पृथग्जनाननुसृत्य हि पुनस्ततोऽप्यधिकञ्च पास्यन्ति लोकाः ।।६७।।

सुगम एव तावदस्या अर्थः।

पुनः पुनः देहपरित्यागदोषमधिकृत्याह--

आत्मनश्चास्थिपुञ्जं मेरुसमं ततोऽधिकमुच्चैर्जायेत ।

---

[1] तुलनीयम्--

तत्र मनुष्येषूपपन्नाः सत्त्वा एवंरूपं विघातदुःखं प्रत्यनुभवन्ति। सहजं तावत्क्षुत्पिपासाविघातदुःखं। इच्छाविघातिकं कदशनविघातदुःखं। औपक्रमिकं पर्येष्टिपरिश्रमादिविघातदुःखं ऋतुपरिणामिकं शीतोष्णविघातदुःखं पारिस्रविकमगाराद्य-नावरणकृतं विघातदुःखं। व्यवहारसमुच्छेदिकमन्धकाराद्यावरणकृतं विघातदुःखं। तथा परिभोगजरादुःखं व्याधिदुःखं मरणदुःखं। तथा हि नरकेषु मरणमेव सुखं मन्यते। अतस्तत्र तन् न दुःखं व्यवस्थाप्यते।

--यो.भू., पृ. ८८-८९, कल.वि., १९५७।

[2] तुलनीयम्--

पिता चेन्न विना पुत्रात्कुतः पुत्रस्य संभवः।
पुत्राभावे पिता नास्ति तथासत्त्वं तयोर्द्वयोः।। --बो.च. ९/११४

भूमिमृदा बदराणां गुलिकाभिर्न गणना सम्भवाऽम्बानाम् ।।६८।।

इत्यत्र **आत्मनश्चास्थिपुञ्जमिति** शरीररस्य अस्थिसञ्चय इत्यर्थः। पुनः पुनः प्रतिसन्धिदोषमधिकृत्याह-- **भूमिमृदा बदराणामित्यादि**। यथोक्तं भगवता-- **''यदि कश्चित् पुरुषो भिक्षवः, महापृथिव्याः मृत्तिकया बदरीफलतुल्या गुलिकाः कुर्यात्। एकैकां गुलिकां 'इयं मे माता' 'इयं मे मातुर्माता' इति गणनां कृत्वा निदध्यात्, तथापि भिक्षवः, महाभूमेरस्या मृत्तिका प्रागेव समाप्तिमियात् न तु तथैव मानवानां मातुः सन्ततिरित्यहं वदामि ।''**

पुनः पुनरुन्नतावनतभावदोषमधिकृत्याह--

लोकपूज्योऽपि शक्रः पतति च पुनः कर्मवशाद्धि संसारे[1] ।
तद्वच्च चक्रवर्ती राजाऽपि[2] पुनर्भवति हि दासो लोके ।।६९।।

---

[1] द्रष्टव्यम्--

भ्रमन्ति चक्रवन्मूढा लोकधर्मसमावृताः ।
परमार्थं न जानन्ति भवो यत्र निरुध्यते ।
वेष्टिता भवजालेन संसरन्ति पुनः पुनः ।।५।।....
शक्रत्वं चक्रवर्तित्वं संप्राप्य चोत्तमं पदम्।
तिर्यग्योनौ पुनर्जन्म तत्सर्वं संवृतेः फलम् ।। १०।।

--नैरा.परि.महा.सू.(म.सू.सं.), पृ. १७५, मि.सं.।

[2] चक्रवर्तिनां सप्तरत्नानि। तद्यथा- चक्ररत्नम्, अश्वरत्नम्, हस्तिरत्नम्, मणिरत्नम्, स्त्रीरत्नम्, खड्गरत्नम्, परिणायकरत्नं चेति। -- ध.सं. (म.सू.सं.), पृ. ३३५, मि.सं. ;

तत्र मनुष्येषु चक्रवर्तिसुखमग्र्यं श्रेष्ठं प्रणीतम्। चक्रवर्ती पुनर्लोक उत्पद्यमानः सप्तरत्नसमन्वागत उत्पद्यते। यस्येमान्येवंभूतानि सप्तरत्नानि भवन्ति। तद्यथा चक्ररत्नं हस्तिरत्नमश्वरत्नं मणिरत्नं स्त्रीरत्नं गृहपतिरत्नं परिणायकरत्नमेव सप्तमम्।।

--योगा.भूमि, पृ. ९१, कलकत्ता विश्वविद्यालय, १९५७ ;

चक्रवर्तिसमुत्पत्तिर्नाधोऽशीतिसहस्रकात्।
सुवर्णरूप्यताम्रायश्चक्रिणः तेऽधरक्रमात् ।।

एक-द्वि-त्रि-चतुर्द्वीपाः, न च सह द्वौ बुद्धवत्।
प्रत्युद्यानस्वयंयानकलहास्त्रजितोऽवधाः ।। --अभि.को., ३/९५-९६ ;

इति। लोकपूज्योऽपीत्यादि सुगमम्।

स्वर्गेऽप्सरसां सौख्यं कुचतटिस्पर्शजं चैव चिरमनुभूय ।
नरके दुःसहदुःखं पेषणछेदनभेदनयन्त्रैर्भुङ्क्ते[1] ।।७०।।

यस्य राज्ञः क्षत्रियस्य मूर्धाभिषिक्तस्य तदैव पोषधे पञ्चदश्यां शिरःस्नातस्योपोषधोपोषितस्योपरिप्रासादतलगतस्यामात्यगण-परिवृतस्य पूर्वस्यां दिशि चक्ररत्नं प्रादुर्भवति सहस्रारं सनाभिकं सनेमिकं सर्वाकारपरिपूर्णं शुभकर्मारकृतं दिव्यं सर्वसौवर्णम्, स राजा भवति चक्रवर्ती इति। ... सूत्र उक्तम्- अस्थानमनवकाशो यदपूर्वाचरमौ द्वौ तथागतावर्हन्तौ सम्यक्सम्बुद्धौ लोक उत्पद्येयाताम्। नेदं स्थानं विद्यते। स्थानमेतद् विद्यते यदेकस्तथागतः। यथा तथागत एवं चक्रवर्तिनौ इति। ..... सूत्र उक्तम्- राज्ञश्चक्रवर्तिनो लोके प्रादुर्भावात् सप्तानां रत्नानां लोके प्रादुर्भावो भवति। तद्यथा- चक्ररत्नस्य, हस्तिरत्नस्य, अश्वरत्नस्य, मणिरत्नस्य, स्त्रीरत्नस्य, गृहपतिरत्नस्य, परिणायकरत्नस्य इति। ... किमेष एवान्यराजभ्यश्चक्रवर्तिनां विशेषः? अन्योऽपि विशेषोऽस्ति; तद्यथा-- द्वात्रिंशन्महापुरुषलक्षणान्येषां भवन्ति, तद्यथा बुद्धानाम्।

---अभि.को.भा., पृ. ५५०-५५३, बौ.भा.प्र. ;

पुनश्च तुलनीयम्--

चक्रादिसप्तसाधर्म्यं बोध्यङ्गानां दर्शयति। **स्मृतिश्चरति सर्वत्र ज्ञेयाजितविनिर्जये।** अजितज्ञेयविनिर्जयाय। यथा चक्रवर्तिनश्चक्ररत्नमजितदेशविनिर्जयाय। **सर्वकल्पनिमित्तानां भङ्गाय विचयोऽस्य च।।** यथा हस्तिरत्नं प्रत्यर्थिकभङ्गाय। **आशु चाशेषबोधाय वीर्यस्य प्रवर्तते।** क्षिप्राभिज्ञतोत्पादनात्। यथाश्वरत्नमाशु समुद्रपर्यन्तमहापृथिवीगमनाय। **धर्मालोकविवृद्ध्या च प्रीत्या आपूर्यते ध्रुवम्।।** आरब्धवीर्यस्य बोधिसत्त्वस्य धर्मालोका विवर्धन्ते। ततः प्रीतिः सर्वं कार्यं सदा प्रीणयति। यथा मणिरत्नमालोकविशेषेण चक्रवर्तिनं प्रीणयति। **सर्वावरणनिर्मोक्षात् प्रश्रब्ध्या सुखमेति च।** सर्वदौष्ठुल्यसमुत्पादनात्। यथा स्त्रीरत्नेन चक्रवर्ती सुखमनुभवति। चिन्तितार्थसमृद्धिश्च समाधेरुपजायते।। यथा चक्रवर्तिनो गृहपतिरत्नात्।

उपेक्षया यथाकामं सर्वत्र विहरत्यसौ।

पृष्ठलब्धाविकल्पेन विकल्पेन सदोत्तमः।। ६१।। उपेक्षोच्यते निर्विकल्पं ज्ञानं तया बोधिसत्त्वः सर्वत्र यथाकामं विरहति। तत्पृष्ठलब्धेन च विहारेणान्यस्योपगमात्। अन्यस्यापगमात्। निर्विकल्पेन विहारेण तत्र निर्व्यापारतया वासकल्पनात्। यथा चक्रवर्तिनः परिणायकरत्नं चतुरङ्गबलकायमुपनेतव्यं चोपप्रणयति। अपनेतव्यं चापनयति। तत्र च गत्वा वासं कल्पयति यत्राखिन्नः चतुरङ्गो बलकायः परैति।

--म.सू., १८/५८-६१, पृ. १३८-१३९, मि.सं., १९७०।

[1] द्रष्टव्यम्--

स्वर्गस्थाने तु ये देवा गन्धर्वाप्सरसादयः।
च्युतिरस्ति च सर्वेषां तत्सवं संवृतेः फलम्।। ८।।

सिद्धा विद्याधरा यक्षाः किन्नराश्च महोरगाः।

इति। स्वर्गे अप्सरसस्तु देवकन्या इति। तासां कटितटस्य स्तनयोः स्पर्शनेन सुखस्यानुभव इति अनुभवतीत्यर्थः। **दुःसहदुःखं.....भुङ्क्ते** इति तत्संयोगेन अत्यन्तमसह्यं दुःखं सोढव्यं भवति। केषां संयोगेनेति चेत्? **पेषणछेदनयन्त्रै**रित्याद्युक्तम्। 'यन्त्र'-शब्दः प्रत्येकेन सह योजनीयः। तत्र पेषणयन्त्रं तद्यथा संघातनरके। छेदनयन्त्रं तावत् कालसूत्रनरकवत्। भेदनयन्त्रं तु तापननरके प्रतापननरके विद्यमानमिव ज्ञातव्यम्।

सुखदे सुमेरुशिखरे चिरमनुभवंश्चरंश्चरणस्पर्शसुखम् ।
चञ्चलकुक्कुलकुणपैर्गाढं दुःखं चिन्तयेत् सदा मनसा ।।७१।।

इति। **चरणस्पर्शसुखम्** इति पादयोरुत्पतननिपाताभ्यां सुखमनुभूयते, अतश्चरणस्पर्शसुखमित्युच्यते, अत एव तत् सुखयोग्यं सुखाधार इत्यर्थः। तस्मिन् सुमेरुशिखरे देववर्षसहस्राणि उषित्वाऽपि पुनः कुक्कूलनरके कुणपनरके चोत्पद्य असह्यदुःखमनुभूयते। तत्र जानुमात्रं कुक्कूलम्, यत्र पादनिधापने सति पादस्य त्वङ्मांसशोणितानि संशीर्यन्ते, पादोत्थापने सति पुनः त्वङ्मांसशोणितानि सञ्जायन्ते। कुणपं गूथमृत्तिकम्, यत्र न्युङ्कुटा नाम कृमयः प्रतिवसन्ति सर्वश्वेताः कृष्णशिरसः सूचीमुखाः, तत्र पादे निक्षिप्ते सत्त्वानां त्वङ्मांसशोणितानि सञ्छिद्यन्ते, भिद्यन्त इति यथासूत्रं विस्तरेण वेदितव्यम्।

देवाङ्गनासेविते नन्दने रम्ये चोपवने च विहृत्य ।
असिपत्रवने तेषां हस्तपादकर्णनासाश्च छिद्यन्ते ।।७२।।

देवाङ्गनासेविते इत्यादिना स्वर्गस्थदेवकन्याभिरुपसेवितमित्यर्थः। ताभिः सेविते नन्दनवने सुरम्ये ते ताभिः सह क्रीडन्ति। तत्र क्रीडां कृत्वा पुनः **असिपत्रवने तेषां हस्तपादकर्णनासाश्च छिद्यन्ते** इति असिसदृशपत्रवनमिति कुक्कूल-कुणप-

---

पुनस्ते नरकं यान्ति तत्सर्वं संवृतेः फलम्।। ९।।
--नैरा.परि.महा.सू.(म.सू.सं), पृ. १७५, मि.सं.।

क्षुरधारारचितस्य महापथस्य समनन्तरं नीलवनसदृशं प्रतीयते। तत्र ते सत्त्वाः लयनपर्येषणाय शरणगवेषणाय च विचरन्ति। तत्र स्थितेषु सत्त्वेषु कर्मजनितो वायुर्भृशं प्रकुप्यतीति विस्तरः।

सुवदनदेवसुताभिः स्वर्णोत्पलैर्युतायां मन्दाकिन्याम् ।
स्नात्वा पुनश्च नरके क्षारोष्णोदकवैतरण्यां हि पतन्ति ।।७३।।

इति। **मन्दाकिन्यामिति**[१] देवानां पुष्करिण्यामवगाह्येति। किमस्या विशेषणमिति चेत्? **सुवदने**त्याद्युक्तम्। यत्र सुन्दरमुखा देवकन्याः स्वर्णकमलानि च विद्यन्त इति तथा। पुनश्च (कर्मवशात्) वैतरण्यां नद्यां प्रविशन्ति। किमस्या विशेषणमिति? क्षारमुष्णं चोदकं यस्यामिति तथाविधायाम्। वैतरणी नदी तु असिपत्रवनानन्तरं नरकान् परितः परिखावत् संविद्यते। यत्र ते सत्त्वा लयनं पर्येष्टुं शरणं वा पर्येष्टुं विचरन्तीति यथासूत्रं विस्तरेण वेदितव्यम्। इमे चत्वार उत्सदा उच्यन्ते, तद्यथा-- कुक्कूलम्, कुणपम्, असिपत्रवनं वैतरणी नदी चेति। एते चत्वार उत्सदाः प्रतिनरकं चतुर्षु द्वारेषु क्रमशः स्थिता भवन्ति। अष्टौ महानरकाः, अत एव प्रतिनरकं षोडश उत्सदाः भवन्ति[२] ।

---

[१] पूर्णा अष्टाङ्गोपेतस्य पानीयस्य। तद्धि पानीयं शीतलं च स्वादु च लघु च मृदु चाच्छं च निष्प्रतिकं च, पिबतश्च कण्ठं न क्षिणोति, पीतं च कुक्षिं न व्याबाधते। --अभि.को.भा., पृ. ५१०,

अष्टाङ्गोपेतस्येति।

शीतलाच्छलघुस्वादुमृदुनिःपूतिगन्धकम् ।
पीतं न बाधते कुक्षिं न कण्ठं क्षिणोति तज्जलम्।।

--अभि.को.स्फु.(अष्टाङ्गसंग्रहश्लोकः), पृ. ५१०, बौ.भा.प्र.।

[२] ....सर्वेऽष्टौ षोडशोत्सदाः ।। ५८।।

उक्तं हि भगवता--

इत्येते नरका अष्टावाख्याता दुरतिक्रमाः।
रौद्रकर्मभिराकीर्णाः प्रत्येकं षोडशोत्सदाः।।

चतुस्कन्धाश्चतुर्द्वारा विभक्ता भागशोऽसिताः।
अयःप्राकारपर्यन्ता अयसा प्रतिकुब्जिताः ।।

तप्ता चैवायसी भूमिर्ज्वलिता तेजसा युता।
अनेकयोजनशता स्फुटा तिष्ठति अर्चिषा ।।

षोडशोत्सदाः कतमे?

कुकूलं कुणपं चाथ क्षुरमार्गादिकं नदी।
तेषां चतुर्दिशम्, ... ।। ५९।।

द्वारे द्वारे तेषां चत्वार उत्सदाः --

१. कुकूलं जानुमात्रम्। यत्र तेषां सत्त्वानां निक्षिप्ते संशीर्यते त्वङ्मांसशोणितम्, उत्क्षिप्ते पादे पुनरपि सञ्जायते त्वङ्मांसशोणितम्।

२. कुणपं गूथमृत्तिका। यत्र न्युङ्कुटा नाम प्राणिनः प्रतिवसन्ति सर्वश्वेताः कृष्णशिरसः सूचिमुखाः, तेषां सत्त्वानां यावदस्थीनि भिन्दन्ति।

३.(क) क्षुरधाराचितो महापथः। यत्र तेषां सत्त्वानामन्वाक्रामतां निक्षिप्ते पादे सञ्छिद्यते त्वङ्मांसशोणितमिति पूर्ववत्।

(ख) असिपत्रवनम्। यत्र तेषां सत्त्वानां तीक्ष्णा असयः सन्निपतन्ति, अङ्गप्रत्यङ्गान्यवकृन्तन्ति, श्यामलशबलाश्च श्वानो भक्षयन्ति।

(ग) अयःशाल्मलीवनं तीक्ष्णषोडशाङ्गुलकण्टकम्। तेषां सत्त्वानामभिरोहतां कण्टका अवाङ्मुखीभवन्तः कायं भिन्दन्ति, अवतरतां चोर्ध्वीभवन्तः। अयस्तुण्डाश्च वायसा अक्षीण्युत्पाट्योत्पाट्य भक्षयन्ति।

तदेतत् क्षुरमार्गादिकं त्रयं शस्त्राभिनिपातं सामान्यादेकीक्रियते।

४. चतुर्थ उत्सदो नदी वैतरणी पूर्णा। यस्यां ते सत्त्वा असिशक्तिप्रासहस्तैः पुरुषैरुभाभ्यां तीराभ्यां प्रतिवार्यमाणा ऊर्ध्वमपि गच्छन्तः स्विद्यन्ते पच्यन्ते, अधस्तिर्यगपि गच्छन्तः स्विद्यन्ते पच्यन्ते। तद्यथा--बहूदकायां स्थाल्यामग्नावधिश्रितायां तिलतण्डुलादयः। सा हि महानरकस्य परिखेवोत्पन्ना। त एते चत्वार उत्सदा दिग्भेदेन षोडशोच्यन्ते।

--अभि.को.भा., ३/५८-५९, पृ ५१४-५१६, बौ.भा.प्र. १९८७ ;

सामन्तनरकेषु पुनरेवं कारणादुःखं सत्त्वाः प्रत्यनुभवन्ति। सर्व एते महानरकाश्चतुर्दिशं चतुष्कन्धाश्चतुर्द्वारा आयसैः प्राकारैः परिवारिताः। तत्र च चतुर्दिशं चतुर्भिर्द्वारैर्निर्गत्यैकैकस्मिन्द्वारे चत्वार उत्सदा भवन्ति। तद्यथा। जानुमात्रं कुकूलं। यत्ते सत्त्वा लयनगवषिणोऽन्वाक्रामन्ति। ते तत्र प्रपतिताः सशिरःपादका निमग्नास्तिष्ठन्ति। तत्र च कुणपे गूथमृत्तिके कीटाः प्राणिनो ये तेषां सत्त्वानां त्वचमपि च्छिद्रयन्ति मांसमपि स्नाय्वस्थ्यपि भिन्दन्ति ततोऽस्थिमज्ञानमासाद्य विलिखन्ति।

तस्य खलु कुणपस्य गूथमृत्तिकस्य समनन्तरं सन्निहितमेव क्षुरधाराचितः पथो यं ते सत्त्वा लयनगवेषिणोऽन्वाक्रमन्ते। तत्र तेषां निक्षिप्ते पादे सञ्छिद्यते त्वङ्मांसशोणितं। पुनरुत्क्षिप्ते पादे सञ्जायते त्वङ्मांसशोणितं।

तस्य खलु क्षुरधाराचितस्य पथः समनन्तरं सन्निहितमेवासिपत्रवनं। तत्र ते सत्त्वा अभिगम्य लयनगवेषिणस्तच्छायामासेवन्ति। तत्र तेषामधस्तान्निषण्णानां वृक्षादसयः पतन्ति ये तेषां सत्त्वानामङ्गप्रत्यङ्गानि च्छिन्द्रयन्ति व्यतिभिन्दन्ति। तेषां तत्र पतितानां श्यामशबला नाम श्वान आगत्य पृष्ठीवंशानुत्पाट्योत्पाट्य भक्षयन्ति।

देवेषु कामसुखं च कामवीतरागसुखं ब्रह्मलोकेषु ।
प्राप्यावीचौ सततं लभ्यतेऽग्नेरिन्धनीभूय च दुःखम् ।।७४।।

देवेषु त्वित्यत्र त्रायस्त्रिंशेभ्य ऊर्ध्वं यामादयः कामदेवाः परिगण्यन्ते, तेषु यल्लभ्यं सुखं तत्प्राप्य। **सुखम्** इति कामसुखविशेषः, कामरागसुखविशेषो वा, सर्वसुखेभ्योऽधिकतरत्वात्। तदुपरि रूपधातौ तावद् ब्रह्मलोके ब्राह्मं कामवीतरागसुखमिति। वीतरागत्वं तु कामरागातिक्रान्तत्वं वेदितव्यम्। तथाविधमपि सुखं सम्प्राप्य अकुशलकर्मसंचयवशेन अन्यदा अपरपर्यायवेदनीयकर्माक्षेपेण पुनर्दुःखं नैरन्तर्येणानुभवतीति योजनीयम्। कुत्र तदुपभुज्यत इति चेद्? **अवीचौ** तन्नामके नरके। केन विधिनेति? **अग्नेरिन्धनीभूय** अर्थात् कायप्रज्वलनेनेत्यर्थः।

पदमवाप्य सूर्येन्द्वोः स्वकायप्रभया प्रदीप्य हि संसारम् ।

तस्य खल्वसिपत्रवनस्य समनन्तरं सन्निहितमेवायःशाल्मलीवनं यत्ते सत्त्वा लयनगवेषिणोऽभिगम्याभिरोहन्ति। तेषां तत्राभिरोहतामधोमुखीभवन्ति कण्टकाः। अवतरतामूर्ध्वीभवन्ति कण्टका ये तेषामङ्गप्रत्यङ्गानि च्छिद्रयन्ति व्यतिभिन्दन्ति। तत्र चायस्तुण्डानाम वायसा ये तेषां सत्त्वानामंसे वा शिरसि वाभिनिपत्य भित्त्वाक्षितारका उत्पाट्योत्पाट्य भक्षयन्ति।

तस्य खल्वयःशाल्मलीवनस्य समनन्तरं सन्निहितमेव वैतरणी नदी पूर्णा क्वथितस्य क्षारोदकस्य यत्र ते सत्त्वा लयनगवेषिणः प्रपतन्ति। त ऊर्ध्वमपि गच्छन्तः खिद्यन्ते पच्यन्ते। अधस्तिर्यगपि गच्छन्तः खिद्यन्ते पच्यन्ते। तद्यथा नाम मुद्ग वा माषा कोला वा कुलत्था वोदाराग्निसम्प्रदीप्तोदकायां स्थाल्यां प्रक्षिप्ताः। तस्याः खलु नद्या उभयतस्तीरे दण्डहस्ता बडिशहस्ता(जालहस्ता) सत्त्वा व्यवस्थिता ये तेषां सत्त्वानामुद्गन्तुमपि न प्रयच्छन्ति बडिशोद्धारिकया वा जालोद्धारिकया वा पुनरुद्धृत्योदाराग्निसनतप्तायां भूमावुत्तानकान्प्रतिष्ठाप्य पृच्छन्ति हम्भोः सत्त्वाः किमिच्छथ। त एवमाहुः। न जानीमो वयमपि न पश्यामः अपितु बुभुक्षिताः स्मः। ततस्ते सत्त्वास्तेषां सत्त्वानामयोमयेन विष्कम्भनेन मुखं विष्कम्भयित्वायोगुडानुदाराग्निसन्तप्तानास्ये प्रक्षिपन्ति पूर्ववत्। सचेत्पुनरेवं वदन्ति पिपासिताः स्मः। ततस्ते तथैव क्वथितं ताम्रमास्ये प्रक्षिपन्ति। ततोनिदानं च पुनर्दीर्घकालं दुःखं प्रत्यनुभवन्ति। यावत्तन्नरकवेदनीयं पापकमकुशलं कर्म सर्वेण सर्वं न परिक्षीणं भवति व्यन्तीकृतं।

तत्र यश्च क्षुरधाराचितः पथो यश्चासिपत्रवनं यश्चायःशाल्मलीवनं या च वैतरणी नदी अयमेक उत्सद इति कृत्वा चत्वार उत्सदा भवन्ति

---यो.भू., पृ. ८४-८६, कल.वि. १९९७।

दर्ता २८५६२

तमसि च घने प्रविष्टः प्रसारितमपि च स्वीयकरं न पश्यति[1] ।।७५।।

पदमवाप्य सूर्येन्द्वोः इति सौर्यं चान्द्रं च पदं प्राप्येत्यर्थः। **स्वकायप्रभया प्रदीप्य हि संसारम्** इति स्वशरीरकान्त्या अखिलं संसारं प्रकाशयतीत्यर्थः। लोकपरिपाट्येदमुक्तम्, वस्तुतो नास्ति तयोः शरीरे तादृशः प्रकाशः, अपितु तयोः रत्नविमानस्यायं प्रकाशः, आधाराधेययोर्भेदम् अकृत्वा तथोक्तमिति ज्ञेयम्। **तमसि च घने प्रविष्टः** इति अन्धतमसि प्रविश्येति योज्यम्। स (अन्धकारः) लोकपर्यन्तं विस्तृतः, तत्रोत्पद्य प्रसारितमपि स्वहस्तं नावलोक्यते।

दुःसङ्गतिदोषमधिकृत्याह--

एवं मृत्युं ज्ञात्वा ग्राह्यस्त्रिविधपुण्यमयदीपालोकः ।
अन्यथा रवीन्दुभ्याममर्दनीयेऽन्धतमसि प्रवेष्टव्यम् ।।७६।।

इति। **एवं** यथोक्तप्रकारेण मरणं भवति, अत एव त्रिविधपुण्यमयो दीपालोको धारणीयः, त्रिविधं पुण्यमेव दीपस्य प्रकाश इति कृत्वा **त्रिविधपुण्यमयदीपालोकः** इत्युक्तम्। त्रिविधं पुण्यमिति कायिकं वाचिकं मानसिकं चेति। अथवा दानमयं शीलमयं भावनामयं चेति त्रिविधं पुण्यम्। कथं पुनः दीपस्य प्रकाश उपादीयत इति चेद्? यतो हि एकाकी एव अनन्ते घोरान्धकारे प्रवेशो भवतीत्याद्युच्यते[2]। अनागते काले अविद्यान्धकारावरणेन अस्पष्टत्वाद् अपरिच्छिन्नत्वाच्च तत्त्वस्य **अन्धतमसि** इत्युक्तम्।

---

[1] द्रष्टव्यम्--

यथा चन्द्रश्च सूर्यश्च प्रत्यागच्छति गच्छति।
भवं च्युतिं तथा लोके पुनरायान्ति यान्ति च।।

--नैरा.परि.महा.सू.(म.सू.सं), पृ. १७५, मि.सं.।

[2] द्रष्टव्यम्--

न च संस्कृते सहाया न मित्रज्ञातीजनो च परिवाराः।
अन्यत्र कर्म सुकृतादनुवध्नाति पृष्ठतो याति ।।

(संस्कृत छाया)

न च संस्कृते सहायो न मित्रज्ञातिजनश्च परिवारः।
अन्यः कर्मणः सुकृत्तादनुबध्नाति पृष्ठतो याति।। --ल.वि. ४/६१।

तत्र एकाकी सहायं विनैव प्रवेष्टव्यं भवति, तदपि बहुविधदुःखभयान्वितम्, अतः तत्प्रतिपक्षत्वेन त्रिविधपुण्यमयदीपालोक उपादेय एवेति।

इतः परं गतिषु प्रवृत्तानां यानि नियतदुःखानि, तदनुभवदोषानधिकृत्य प्रवर्तते शास्त्रमिति वेदितव्यम्। तत्र प्रथमं तावन्नारकदुःखमधिकृत्याह--

दुष्टाचरणे लग्नाः सत्त्वाः संजीवकालसूत्रतपनेषु ।
रौरवावीच्यादौ हि संघाते चापि नरके सदा दुःखम् ।।७७।।

इति। अस्मिन् श्लोके अनुभवानुरूपं शब्दसंयोजनं निर्दिश्यते। तदनुरूपं नरकाणां नामनिर्देशः। तत्रायं तेषां क्रमः -- संजीवः, कालसूत्रः, संघातः, रौरवः, महारौरवः, तापनः, प्रतापनः, अवीचिः, इत्येते अष्टौ महानरकाः[1] । **आदि**-शब्देन अवशिष्टाः शीतनरकाः[2] सामन्तकनरकादयश्च संगृह्यन्ते। **सदा दुःखम्** इति सततं

---

[1] द्रष्टव्यम्-- अष्टौ महानरकाः - सञ्जीवः, कालसूत्रः, संघातः, रौरवः, महारौरवः, तापनः, प्रतापनः, अवीचिश्चेति। --अभि.को.भा. ३/९, पृ. ३८१, बौ.भा.प्र. १९८७ ; ध.सं.(म.सू.सं), पृ. ३३८, मि.सं. ; महा.व्यु., दे.तन. पृ. ७५ ; अ.वि.सू., पृ. १३५ ;

संजीवः, यत्र सत्त्वान् म्रियमाणान् वायवो जीवयन्ति। कालसूत्रः, यत्र कालसूत्राणि पातयित्वा सत्त्वास्तक्ष्यन्ते। संघातः, यत्र मेषाकृतयः पर्वतादय उभयत आपतन्तः सत्त्वान् पीडयन्ति। रौरवः, यत्र सत्त्वाः पात्यमानाः परमविकृतं रुदन्ति। यत्र तु विशेषेण स महारौरवः। तपनः, यत्राग्न्यादिभिस्तप्यन्ते सत्त्वाः। यत्र तु विशेषेण स प्रतापनः। अवीचिः, यत्रातिमात्राग्निज्वालालिङ्गितानां सत्त्वानां सुखवीचिरन्तरं नास्ति। --अभि.को.टी., पृ. ३८०-३८१, बौ.भा.प्र. १९८७ ;

दुःखनिरन्तरत्वादवीचिः। अन्येषु सान्तरं दुःखम्। तद्यथा-- सञ्जीवे च्छिन्नावभिन्नसम्पिष्टशरीराणां शीतला वायवो वान्ति, पुनरपि तान् सत्त्वान् सञ्जीवयन्ति। अत एव सञ्जीवः। ...तस्मादवीचेरूर्ध्वं सप्त नरकाः उपर्युपरि सन्निविष्टाः --प्रतापनः, तापनः, महारौरवः, रौरवः, सङ्घातः, कालसूत्रः, सञ्जीवश्च।
--अभि.को.भा., पृ. ५१४, बौ.भा.प्र.।

[2] तत्र शीतनरकेषूपपन्नाः सत्त्वा एवंरूपं शीतदुःखं प्रत्यनुभवन्ति। अर्बुदोपपन्नाः सत्त्वास्तद्भूमिकेनोदारेण शीतेन स्पृष्टा अर्बुदवत्सर्वाश्रयेण सङ्कोचमापद्यन्ते। तस्माच्च स नरकोऽर्बुद इत्युच्यते। तत्र निरर्बुदेऽयं विशेषः। अर्बुदनिर्गतमिवार्बुदं सङ्कोचमापद्यते। तस्माच्च नरको निरर्बुद इत्युच्यते। तत्राटटो हहवो वागभिलापकृतमेतत्तेषां सत्त्वानां नामव्यवस्थानं। उत्पले पुनः शीतनरके तद्भूमिकेनोदारेण शीतेन स्पृष्टा व्यानीलायमानाः पञ्चधा षड्धा त्वचां स्फोटमापद्यन्ते। तस्माच्च स नरक उत्पल इत्युच्यते। तत्र पद्मेऽयं विशेषः। नीलतां समतिक्रम्य व्यालोहितायमाना दशधा वा भूयो वा त्वचां स्फोटमापद्यन्ते। तस्माच्च स

निरन्तरं तत्र दुःखं भवतीति। केषु सत्त्वेषु इमानि सततं नारकीयदुःखानि भवन्तीति चेत्? **दुष्टाचरणे लग्नाः** इत्याद्युक्तम्, ये कायवाक्चित्तैः दुश्चरितान्याचरन्ति तेषु भवन्तीति। आर्यजनगर्हितान्याचरणानि दुश्चरितान्युच्यन्ते। तानि यथोक्तानि कायिकादीनि दश अकुशलकर्माणि।

तत्र संजीवनरके सत्त्वाः कर्मजनितैः विविधैः आयुधप्रहारैरन्योऽन्यं अङ्गप्रत्यङ्गानि छिन्दन्ति घातयन्ति च। तेन च मूर्च्छिताः पृथिव्यां प्रपतन्ति। तत आकाशाच्छब्दो निश्चरति- 'संजीवन्तु सत्त्वाः' इति। स नरकः **संजीवः**[1] इत्युच्यते।

कालसूत्रे तावत् तत्रस्थैः यातनापुरुषैः नानाविधपर्वतानां मध्ये निक्षिप्य कालेन सूत्रेण सत्त्वा माप्यन्ते। ततश्च काष्ठवत् खन्यन्ते तक्ष्यन्ते च। तस्मात् स नरकः **कालसूत्रम्**[2] इत्युच्यते।

नरकः पद्म इत्युच्यते। तत्र महापद्मोऽयं विशेषः। भृशतरं व्यालोहितायमाना शतधा वा भूयो वा त्वचां स्फोटमापद्यन्ते। तस्माच्च स महानरको महापद्म इत्युच्यते।

--यो.भू., पृ. ८६-८७, कल.वि., १९५७ ;

.... शीता अन्येऽष्टावर्बुदादयः।।

अन्ये शीतनरका अष्टौ। तद्यथा-- अर्बुदः, निरर्बुदः, अठठः, हहवः, हुहुवः, उत्पलः, पद्मः, महापद्मश्च। तेषां सत्त्वानां तीव्रशीताभिहितानां कायशब्दविकारानुरूपाण्येतानि नामानि।

--अभि.को.भा. ३/५९, पृ. ५१७, बौ.भा.प्र.।

[1] तत्र सञ्जीवे महानरके एवंरूपं कारणादुःखं प्रत्यनुभवति बाहुल्येन। तत्र ते सत्त्वा अन्योन्यं सङ्गम्य कर्माधिपत्यसम्भूतैर्विविधैः प्रहरणैः क्रमसमुत्पन्नैरन्योन्यं विप्रघातिकां कुर्वन्तो निश्चेष्टाः पृथिव्यां प्रपतन्ति। तत आकाशाच्छब्दो निश्चरति सञ्जीवन्तु हन्त सत्त्वा इति। ततः पुनस्ते सत्त्वा व्युत्थाय तेनैव प्रकारेणान्योन्यविप्रघातिकां कुर्वन्ति। ततो निदानं च दीर्घकालं दुःखं प्रत्यनुभवन्ति यावत्तत्पापकमकुशलं कर्म सर्वेण सर्वं परिक्षीणं व्यन्तीकृतं। तस्माच्च पुनः स नरकः सञ्जीव इत्युच्यते।

--यो.भू., पृ. ७९, कल.वि., १९५७।

[2] तत्र कालसूत्रमहानरके एवंरूपं कारणादुःखमनुभवन्ति बाहुल्येन। तत्र ते सत्त्वास्तत्पर्यापन्नैर्यातनापुरुषैः कालकेन सूत्रेण माप्यन्ते। चतुरस्रकमप्यष्टास्रकमप्यनेकविचित्रविभक्तिप्रकारमपि माप्यन्ते। मापिताश्च तथा तथा खन्यन्ते तक्ष्यन्ते सम्प्रतक्ष्यन्ते। ततो निदानं च दीर्घकालं दुःखं प्रत्यनुभवन्ति यावत्तत्पापकमकुशलं कर्म सर्वेण सर्वं न परिक्षीणं भवति व्यन्तीकृतं। तस्माच्च पुनः स नरकः कालसूत्र इत्युच्यते।

--यो.भू., पृ. ७९-८०, कल.वि., १९५७।

संघाते तु सत्त्वा ऐकध्यं संक्षिप्यन्ते तथा तत्रस्थैर्यातनापुरुषैः विविधाकाराणां पर्वतानां मध्ये निक्षिप्य तैः पर्वतैः प्रपीड्यन्ते। तेषां प्रपीडितानां सत्त्वानां रुधिरनद्यः प्रस्रवन्ति। पुनः संघातमापन्ना लौहमये महायन्त्रे निक्षिप्य प्रपीड्यन्ते। पुनः संघातमापन्नानाम् उपरिष्टात् महाशिलाः प्रपतन्ति। तेन च ते सत्त्वा अयोमय्यां पृथिव्यां पीड्यन्ते विदीर्यन्ते सम्भिद्यन्ते च। तस्मात् स नरकः **संघातः**[१] इत्युच्यते।

रौरवे तावन्नरके सत्त्वा लयगवेषिण आयसमगारं प्रविशन्ति। तेषां तत्र प्रविष्टानाम् अग्निः प्रादुर्भवति। यतस्ते तत्र प्रदीप्ता एकज्वालीभूय दह्यन्ते। तेन ते रुदन्ति, आर्तस्वरं करुणं च क्रन्दन्ते। तस्मात् स नरकः **रौरवः**[२] इत्युच्यते।

महारौरवे तु नरके अयं विशेषः - तत्र लयगवेषिणां सत्त्वानां कृते यावत्परिमाणो रौरवे अगारो भवति, ततोऽपि द्विगुणितस्तत्र महारौरवे अगारः। तस्मात् स नरकः **महारौरवः**[३] इत्युच्यते।

---

[१] तत्र सङ्घाते महानरक एवंरूपं कारणादुःखं प्रत्यनुभवन्ति बाहुल्येन। तत्र ते सत्त्वा यदान्योन्यमैकध्यमभिसंक्षिप्ताः सङ्घातमापन्ना भवन्ति तदा तत्पर्यापन्नैर्यातनापुरुषैर्द्वयोरजमुखयोरायसयोर्महापर्वतयोर्विवरमनुप्रवेश्यन्ते। समनन्तरप्रविष्टाश्च ताभ्यां पर्वताभ्यां प्रपीड्यन्ते। तेषां प्रपीडितानां सर्वतोमुखं रुधिरनद्यः प्रस्रवन्ति प्रघरन्ति। यथाजमुखयोरेवं मेषमुखयोर्हयमुखयोर्हस्तिमुखयोः सिंहमुखयोर्व्याघ्रमुखयोः। पुनः सङ्घातमापन्ना आयसे महायन्त्रे प्रक्षिप्य प्रपीड्यन्ते यथेक्षुक्षोदः। तेषां तत्र प्रपीड्यमानानां रुधिरनद्यः प्रस्रवन्ति प्रघरन्ति। पुनः सङ्घातमापन्नानामुपरिष्टादायसी महाशिला प्रपतति या तान्सत्त्वानयोमय्यां पृथिव्यां सञ्छिन्दति सम्भिन्दति सङ्कटयति सम्प्रदालयति। तेषां तत्र तत्र सञ्छिद्यमानानां सम्भिद्यमानानां सङ्कट्यमानानां सम्प्रदाल्यमानानां रुधिरनद्यः प्रस्रवन्ति प्रघरन्ति। ततो निदानं च दीर्घकालं दुःखं प्रत्यनुभवन्ति यावत्तत्पापकमकुशलं कर्म सर्वेण सर्वं न परिक्षीणं भवति व्यन्तीकृतं। तस्माच्च पुनः स नरकः सङ्घात इत्युच्यते।

--यो.भू., पृ. ८०-८१, कल.वि., १९५७।

[२] तत्र रौरवे महानरक एवंरूपं कारणादुःखं प्रत्यनुभवन्ति बाहुल्येन। तत्र ते सत्त्वा लयनगवेषिण आयसमगारं प्रविशन्ति। तेषां तत्र प्रविष्टानामग्निर्मुच्यते यतस्त आदीप्ताः प्रदीप्ताः सम्प्रज्वलिता ध्यायन्ति। ते तत्र रुवन्त्यार्तस्वरं क्रन्दन्ते ततो निदानं च दीर्घकालं दुःखं प्रत्यनुभवन्ति यावत्तत्पापकमकुशलं कर्म सर्वेण सर्वं न परिक्षीणं भवति व्यनतीकृतं। तस्माच्च पुनः स नरको रौरव इत्युच्यते।

--यो.भू., पृ. ८१, कल.वि., १९५७।

तपनाख्ये तावन्नरके तत्रस्थैर्नरकपालैः[१] सत्त्वा लौहकटाहे प्रक्षिप्य दग्धीक्रियन्ते। पुनरयोमयेन शल्येनाधस्ताद् विध्यन्ते। स च शल्यः पृष्ठान्तेन प्रविश्य शिरसा निर्गच्छति। तेषां च सत्त्वानां सर्वरोमकूपेभ्यः सर्वद्वारेभ्यश्च ज्वाला निर्गच्छन्ति। पुनः तप्तायां प्रज्वलितायां पृथिव्यां उत्तानकान् स्थापयित्वा (नरकपालाः) अयोघनैस्ताडयन्ति। तस्माच्च स नरकः **तपनः**[२] इत्युच्यते।

प्रतापने हि नरके तावदयं विशेषः। तत्र त्रिशूलशल्यं पृष्ठतो निर्गमयन्ति। ततो निदानं द्वे शूले द्वाभ्यां स्कन्धाभ्यां निर्गच्छतः, तृतीयश्च शिरसा। लौहपत्रैश्च सन्तप्तैः सर्वतः कायं परिवेष्टयन्ति। पुनः महत्यां लौहमय्यां कफालिकायां (कटाहे) क्वथितक्षारपूर्णायां प्रदीप्तायां ते सत्त्वा ऊर्ध्वपादा अवाङ्मुखाः प्रक्षिप्यन्ते। प्रक्षिप्ताश्च सन्तप्यन्ते ऊर्ध्वमपि गच्छन्तोऽधोऽपि गच्छन्तस्तिर्यगपि गच्छन्तो यतश्च

---

[३] तत्र महारौरवे महानरकेऽयं विशेषो यो रौरवेऽगारः स तत्रागार एव विज्ञातव्यः सगर्भस्तु। तस्माच्च पुनः स नरको महारौरव इत्युच्यते। --यो.भू., पृ. ८१, कल.वि., १९५७।

[१] द्रष्टव्यम्--

क्रोधनाः क्रूरकर्माणः पापाभिरुचयश्च ये।
दुखितेषु च नन्दति जायन्ते यमराक्षसाः ।।

--अभि.को.भा., पृ. ५१६, बौ.भा.प्र. ;

....यमराक्षसा इति। पापकर्माणः सत्त्वा नरकपाला जायन्त इत्यर्थः।

--अभि.को.टी., पृ. ५१६, बौ.भा.प्र.।

[२] तत्र तपने महानरक एवंरूपं कारणादुःखं प्रत्यनुभवन्ति बाहुल्येन। तत्पर्यापन्ना यातनापुरुषास्तान्सत्त्वाननेकयोजनायां कफल्यां प्रक्षिप्य तप्तायां प्रतप्तायां सम्प्रज्वलितायामावर्तयन्ति परिवर्तयन्ति तापयन्ति सन्तापयन्ति तद्यथा मत्स्यान्। पुनरयोमयेन शल्येनाधस्ताद्विध्यन्ति। स च शल्यः पृष्ठान्तेन प्रविश्य शिरसा निर्गच्छत्यादीप्तः प्रदीप्तः। तेषां च सत्त्वानां मुखादक्षितारकाभ्यो नासिकाविलेभ्यः सर्वरोमकूपेभ्यो ज्वाला निर्गच्छन्ति। पुनरयोमय्यां पृथिव्यां तप्तायां सन्तप्तायां प्रज्वलितायामुत्तानकान्स्थापयित्वावमूर्धकान् वा तप्तैः सन्तप्तैः सम्प्रज्वलितैरयोघनैस्ताडयन्ति सन्ताडयन्ति सन्दालयन्ति तद्यथा नाम मांसबिल्वं। ततो निदानं च दीर्घकालं दुःखं प्रत्यनुभवन्ति यावत्पापकमकुशलं कर्म सर्वेण सर्वं न परिक्षीणं भवति व्यन्तीकृतं। तस्माच्च पुनः स नरकस्तपन इत्युच्यते।

--यो.भू., पृ. ८१-८२, कल.वि., १९५७।

सङ्कीर्णत्वङ्मांसशोणिता भवन्ति अस्थिशङ्कला-मात्रावशिष्टाः। ततः पुनरपि उत्क्षिप्ताः सञ्जातत्वङ्मांसशोणिता भवन्ति। अतो नरकोऽयं **प्रतापनः**[१] इत्युच्यते।

अवीचौ तावन्नरके चतसृभ्यो दिग्भ्यः अधस्ताच्च अग्निज्वाला वेगेन आगच्छति, यतस्तेषां सत्त्वानां त्वङ्मांसस्नाय्वस्थिमज्जादीनि ज्वालाभिर्व्याप्य तिष्ठन्ति, तद्यथा स्नेहवर्ति। ते च सत्त्वास्ततो निदानं एकलोलीभूता अग्निस्कन्धरूपाः प्रतीयन्ते। मिश्रीभूते तस्मिन्नग्निस्कन्धे ते सत्त्वा तत्र वीचिम् (अन्तरालमपि) नोपलभन्ते दुःखानां वेदनानां नान्यत्र आर्तस्वरं क्रन्दन्तो विज्ञायन्त इति **अवीचिनरकः**[२] इत्युच्यते।

---

[१] तत्र प्रतापने महानरकेऽयं विशेषः। त्रिशूलशल्यं पृष्ठतो निर्गमयन्ति। तस्य चैकशूल एकेन स्कन्धेन निर्गच्छति। द्वितीयो द्वितीयेन तृतीयः शिरसा। तेषां ततो निदानं मुखेनापि(ज्वाला) निर्गच्छति। लौहपत्रैश्च तप्तैः सन्तप्तैः सम्प्रज्वलितैः सर्वतः कायं परिवेष्टयन्ति पुनरयोमय्यां महत्यां लोह्यां क्वथितक्षारपूर्णायामादीप्तायां प्रदीप्तायां सम्प्रज्वलितायां ते सत्त्वा ऊर्ध्वपादा अवाङ्मुखाः प्रक्षिप्यन्ते। प्रक्षिप्ताश्चातप्यन्ते सन्तप्यन्ते ऊर्ध्वमपि गच्छन्तोऽधोऽपि गच्छन्तस्तिर्यगपि गच्छन्तो यतश्च सङ्कीर्णत्वङ्मांसशोणिता भवन्त्यस्थिशङ्कलामात्रावशिष्टाः। तदा पुनरुत्क्षिप्योत्क्षिप्यायोमय्यां पृथिव्यां प्रतिष्ठाप्यन्ते। ततः सञ्जातत्वङ्मांसशोणिताः पुनरपि प्रक्षिप्यन्ते। शेषं तपनवत्। ततो निदानं च पुनर्दीर्घकालं दुःखं प्रत्यनुभवन्ति। यावत्तत्पापकमकुशलं कर्म सर्वेण सर्वं न परिक्षीणं भवति व्यन्तीकृतं। तस्माच्च पुनः स नरकः प्रतापन इत्युच्यते।

---यो.भू., पृ. ८२-८३, कल.वि., १९५७।

[२] तत्रावीचौ माहनरक एवंरूपं कारणादुःखं प्रत्यनुभवन्ति। तेषां सत्त्वानां पूर्वस्यां दिश्यनेकयोजनशतायाः पृथिव्या आदीप्तायाः प्रदीप्तायाः सम्प्रज्वलिताया अग्निज्वालावेग आगच्छति यतस्तेषां सत्त्वानां त्वचं भित्वा मांसं भित्वा स्नायुं छित्वास्थि भित्वास्थिमज्जानं। तद्यथा स्नेहवर्ति। एवं कृत्स्नमाश्रयं ज्वालाभिर्व्याप्य तिष्ठति। यथा पूर्वस्या दिश एवं दक्षिणस्याः पश्चिमाया उत्तरस्या दिशः। ते च सत्त्वास्ततोनिदानमग्निस्कन्धरूपा एवोपलभ्यन्ते। मिश्रीभूते तस्मिंश्चतुर्दिशागतेऽग्निस्कन्धे ते तत्र वीचिमपि नासादयन्ति दुःखानां वेदनानां नान्यत्र आर्तस्वरं क्रन्दतो विज्ञायन्ते सत्त्वा इति। पुनरयोमयैः शूर्पैरयोमयानङ्गारानादीप्तान्सम्प्रज्वलितान्पुनन्ति निपुनन्ति। पुनरयोमय्यां पृथिव्यामयोमयान् महापर्वतानारोहन्त्यप्यवतरन्त्यपि। पुनर्मुखाज्जिह्वा निर्गमय्यायःशङ्कुशतेन वितता भवति। सा तथा वितता विगतवलिका विगतपुटिका च तद्यथार्षभं चर्म। पुनस्तस्यामेवायोमय्यां पृथिव्यामुत्तानकान्स्थापयित्वायोमयेन विष्कम्भनेन मुखं विष्कम्भयित्वा दीप्ताः प्रदीप्ताः सम्प्रज्वलिताः। अयोगुडा मुखेषु क्षिप्यन्ते ये तेषां मुखमपि दहन्ति कण्ठमप्यन्त्रमपि दग्ध्वा च पुनरधोभागेन निर्गच्छन्ति। क्वथितं ताम्रमास्ये प्रक्षिपन्ति। तच्च मुखमपि दग्ध्वा कण्ठमप्यन्त्रमपि दग्ध्वाधोभागेन प्रघरति। शेषं प्रतापनवत्। ततोनिदानं पुनर्दीर्घकालं दुःखं प्रत्यनुभवन्ति यावत्तत्पापकमकुशलं कर्म सर्वेण सर्वं न परिक्षीणं भवति व्यन्तीकृतं। तस्माच्च पुनः स नरकोऽवीचिरित्युच्यते यत्र यद्भूयसानन्तर्यकारिणः सत्त्वा

सम्प्रति तेषु नरकेषु प्रतिस्वम् अनुभूयमानः दुःखविशेषो निर्दिश्यते--

निष्पीड्यन्ते तिलवत् केचनान्ये चूर्णवत् पेष्यन्ते च ।
छिद्यन्ते शाणेनान्ये दीर्यन्ते तथा तीक्ष्णपरशुनाऽपि ।।७८।।

संघातनरके तावल्लौहमये महायन्त्रे सत्त्वाः प्रक्षिप्य निष्पीड्यन्ते। **चूर्णवत्पेष्यन्ते** इति तत्रैव नरके यातनापुरुषैः तत्रापन्नानामुपरिष्टाल्लौहमयी प्रज्वलिता या महाशिला प्रपतति, तया अयोमय्यां पृथिव्यां ते सत्त्वाः चूर्णीक्रियन्ते, यथा शिलापुत्रकेण पेष्यते। **छिद्यन्ते शाणेन** इत्यादिना कालसूत्रे नरके बद्धपरिकरास्ते प्रसन्नमनसो यमपुरुषाः यथा तक्षकः काष्ठं छिन्दति तथा दीर्घदन्तेन शाणेन प्रज्वलितेन च कुठारेण सत्त्वान् छिन्दन्ति।

आस्येऽन्येषां तद्वत् पात्यते ज्वलितं तावल्लौहद्रवम् ।
आरोप्यन्ते केचन सकण्टके तप्तायसे सदा शूले ।।७९।।

इति। वैतरणीतटे जाज्वल्यमानेन लौहसन्दंशेन बलात् सत्त्वानां मुखं विवरित्वा तत्र तप्तं लौहद्रवं वा प्रज्वलितमग्निद्रवं वा निपात्यते। **आरोप्यन्ते केचन** इत्यादिना तापनेऽस्मिन्नरके सत्त्वाः सकण्टके प्रज्वलितलौहशूले निरन्तरं ग्रथ्यन्ते इति।

श्वभिः केचन क्रूरैर्लौहदन्तैर्विदीर्यन्ते गर्जद्भिः ।
उत्थाय करौ विवशा लुञ्च्यन्ते तीक्ष्णनखतुण्डैश्च काकैः ।।८०।।

इति। असिपत्रवने हि केचित् सत्त्वाः बलवद्भिः लौहदन्तैश्चण्डमहारोषणैश्च हस्तौ आकाशे ऊर्ध्वं कृत्वा गर्जद्भिः सारमेयैर्विदीर्य भक्ष्यन्ते, ते च सत्त्वाः आर्तस्वरं क्रन्दन्ते। **विवशा लुञ्च्यन्ते** इत्यादिना अन्ये विवशाः सत्त्वाः शाल्मलीवने लुञ्च्यन्ते।

उपपद्यन्ते। तत्रेमान्यौदारिकाणि कारणानि परिकीर्तितानि। न च पुनरेषु महानरकेषु तदन्यानि विचित्राकाराणि बहूनि कारणानि नोपलभ्यन्ते।

--यो.भू., पृ. ८३-८४, कल.वि., १९५७।

कैरिति चेद्? तीक्ष्णलौहतुण्डैस्तीव्रनखैश्च वायसैः। अर्थात् तेषां वायसानां तुण्डः लौहमयः नखाश्च तीव्राः भवन्ति।

केचित् कृमिसंस्पर्शाद् मांसादकृष्णमक्षिकायुतपाताच्च ।
वृद्धं व्रणन्त्वसह्यं भक्ष्यमाणं रुदन्ति चाकुला भूम्याम् ।।८१।।

इति। शरीरे पिडिकाः कृमयश्च सम्भवन्ति। कृमयस्तु अन्तःशरीरे पिडिकाश्च बहिर्जायन्ते। वर्णाकृतिजातिभेदेन नानाविधास्ता भवन्ति। **मांसादकृष्णमक्षिकायुत०** इत्यादिना नानाविधास्ता इत्यवबोद्धव्यम्। मांसादाश्च कृष्णमक्षिकाश्चेति पदच्छेदः। **कृष्णमक्षिका** इति दुष्टचित्ता इत्यर्थः। बहुलोपलक्षणेन अयुतेत्युक्तम्। **असह्यम्** इति येषां स्पर्शोऽसहनीयो भवति। तेषां स्पर्शेन तावदसह्यं दुःखमनुभूयते। गात्रं विचूर्णयतीति व्रणं महच्च तद् व्रणं वृद्धं व्रणम्। पूर्वेण तावदसह्यवेदनाया हेतुत्वं दर्शितम्, द्वितीयेन तु व्रणवृद्धेर्हेतुत्वमावेदितम्। **आकुलाः** इति असह्यवेदनया पीडितः कायो नैव स्थिरो भवति, परिवर्तमानो भवतीत्यर्थः। दुःखं चेदं शेषेष्वपि नरकेषु विद्यत इति वेदितव्यम्।

दह्यन्तेऽग्निकुण्डेषु तेन तदाननानि च भवन्ति विवृतानि ।
पच्यन्ते च कटाहे तण्डुलवल्लौहमयेऽधःशिरसस्ते ।।८२।।

इति। नरकपालैस्तावत् प्रज्वलितलौहकुण्डेषु सत्त्वा निक्षिप्यन्ते। बद्धपरिकरैस्तैः प्रज्वलितलौहाग्निस्कन्धे नारकीयाः सत्त्वा दह्यन्ते। असह्यकायवेदनावशात् तेषां सत्त्वानां मुखच्छिद्रं विवृतमेव भवति क्षीणबलत्वात्। दुःखमिदं तापननरके भवतीति वेदितव्यम्।

पच्यन्ते च कटाहे-- इत्यादिना पुनः केचित् सत्त्वाः प्रतापननरके क्वथितजलपरिपूर्णे लौहनिर्मिते प्रज्वलिताग्नौ बृहद्भाण्डे उपर्यधः परिपाच्यन्ते, तण्डुलपरिपाचनवत्।

श्वासावरोधसमये पापः कालंकृते च नरकं प्रयाति ।

श्रुत्वाऽपि नरकदुःखं सहस्रशो वज्रस्वभावान्न बिभेति ।।८३।।

इति। अनेन तावत् तीव्राणि खराणि नरकदुःखानि निर्दिश्यन्ते। पापसमन्वितः पापः पुरुषः। **श्वासावरोधसमये** इति उच्छ्वासनिरोधमात्रसमये अन्तरालरहित इत्यर्थः। यस्मात्ते पापकर्माणः अप्रमेयाणि नारककीयदुःखानि सहस्रशः श्रुत्वाऽपि नैव बिभ्यति, तस्मात्ते वज्रस्वभावा इति। नातिभीतिर्भवति तेष्वित्यर्थः। **वज्रस्वभावात्** इति भयज्ञानाभावस्तावन्निर्दिष्टः। पापानां नरकदुःखानि मरणाव्यवहितमेव सद्यः सम्भवन्ति। नरकेषु यद् गम्भीरतरं कटुकदुःखं तच्छुत्वापि ते न पश्चात्तापं कुर्वन्ति अतस्तेषां वज्रस्वभावः कथितः।

श्रुत्वा दृष्ट्वा स्मृत्वा पठित्वा चापि चित्राङ्कनं नरकस्य ।
आकृतिरपि भयजनिका का कथा तदसह्यविपाकानुभवस्य ।।८४।।

इति। अनेन हि तत् स्मर्यते। भित्त्यादिषु नरकचित्रादि दृष्ट्वाऽपि भयमुत्पद्यत इति सर्वत्र योजनीयम्। **श्रवणमिति** परैः तत्कथाश्रवणम्। **स्मरणिमिति** पूर्वानुभवस्मरणम्। **पठनमिति** शास्त्रेषु तत्स्वरूपपठनम्। **आकृतिरिति** मृन्मयाकारो निर्मीयत इत्यर्थः। तादृशा नरकाः अपि भयावहाः **का कथा तदसह्यविपाकानुभवस्य** इति तत्र दारुणदुःखविपाकोऽपि असह्यदुःखानुभवश्चापि। अतस्ते असह्यविपाकानुभवा इति। तदवस्थायां नारकीयेषु सत्त्वेषु महात्रासोत्पत्तिरित्यर्थः।

यथा समस्तसुखानां तृष्णाक्षय एव सर्वोत्तमं सुखमिति ।
तद्वत् सर्वदुःखेष्ववीचिनरकदुःखमत्यसहनीयं तत् ।।८५।।

इत्यादिना सर्वत्र सर्वनरकेषु दुःखसमता नैव भवति, अपि तु क्वचिद् विशेषो वर्तत इति दर्श्यते। तत्र तृष्णाक्षयसुखं तु विमुक्तिसुखमेवेति ज्ञेयम्[1] । तथैव लोके यावन्ति दुःखानि, तेषु अवीचिनरकदुःखं तावद् दारुणतरम्।

---

[1] द्रष्टव्यम्--
यो चेतं सहते जम्मिं तण्हं लोके दुरच्चयं ।

इहैकस्मिंश्च दिवसे, त्रिशतशूलघाताद् भवति च यद् दुःखम् ।
नारकीयदुःखस्य हि तन्नाप्नोति समतां न लघुकलां चापि ।।८६।।

इत्यनेन मनुष्यदुःखेभ्यो नारकीयदुःखस्य वैशिष्ट्यं दर्श्यते। अस्मिन् खलु संसारे दिवसैकपर्यन्तं शूलानां त्रिशतेन पीड्यमानानां मनुष्याणां यावद् दुःखम्,

---

सोका तम्हा पपतन्ति उदबिन्दु व पोक्खरा।। --धम्म. २४/३ ;

तृष्णा हि माता इत्युक्ता अविद्या च पिता तथा।
विषयावबोधाद्विज्ञानं बुद्ध इत्युपदिश्यते ।। --लं.सू. ३/३ ;

ननु च सत्यदर्शनादविद्यादि प्रहीयते, तत्प्रहाणात् संस्कारादिप्रहाणक्रमेण तृष्णापि प्रहीयते। तृष्णाविपर्यासमती च पुनर्भवोत्पत्तिनिमित्ते। ततश्च तयोरभावात् तुषरहितस्य बीजस्येव कर्मणः सद्भावेऽपि न किंचिद्विहन्यते इति। तदुक्तम्--

मिथ्याज्ञानतद्भूततर्षसंचेतनावशात्।
हीनस्थानगतिर्जन्म त्यक्त्वा चैतन्न जायते।।

अथवा। तृष्णैव केवला पुनर्भवकारणम्, समुदयाकारत्वात्। उक्तं हि भगवता-- तत्र कतमत् समुदयार्यसत्यम्? येयं तृष्णा पौनर्भविकी नन्दीरागसहगता तत्रतत्राभिनन्दिनी, यदुत कामतृष्णा भवतृष्णा विभवतृष्णा चेति। तदेवं यस्य तृष्णा नास्ति, तस्य प्रहीणसमुदयस्य कारणाभावात् न पुनर्जन्मसम्भवः। इति पराभिप्रायमुत्थापयन्नाह--

तृष्णा तावदुपादानं नास्ति चेत्संप्रधार्यते।

अविद्याप्रहाणात् तृष्णा पुनर्भवोपादानं कारणं तावन्नास्ति, न विद्यते चेद्यदि संप्रधार्यते निश्चीयते, तदा नैतद्वक्तव्यम्। यतः उपलम्भदृष्टीनामविद्याप्रहाणमनुपपन्नम्। तद्भावात् तृष्णाप्रहाणस्याप्यभावात्।
--बो.च.पं., ९/४७, पृ. २०८ ;

तुलनीयम्--

यः पश्यत्यात्मानं तस्यात्राहमिति शाश्वतस्नेहः।
स्नेहात्सुखेषु तृष्यति तृष्णा दोषांस्तिरस्कुरुते।।

गुणदर्शी परितृष्यन् ममेति तत्साधनान्युपादत्ते।
तेनात्माभिनिवेशो यावत्तावत्तु संसारः ।।

आत्मनि सति परसंज्ञा स्वपरविभागात्परिग्रहद्वेषौ।
अनयोः संप्रतिवद्धाः सर्वे दोषाः प्रजायन्ते ।। --प्र.वा. १/२१८-२२१ का. ।

तन्मनुष्यलोके महत्तरं दुःखमुच्यते। तादृशमपि दुःखम् अल्पतरेणापि नरकदुःखेन सह तुल्यं न भवति[1]। नरकस्याल्पीयमपि दुःखं तस्माद् दुःखाद् विशिष्टतरमित्यर्थः।

एवं तीव्राणि नारकीयदुःखानि निर्दिश्य कर्मक्षयेणैव तेषां क्षयो नान्यथेति निर्देष्टुमाह-

कोटिवर्षपर्यन्तं दारुणातिदुःखेष्वनुभवत्सु सत्स्वपि ।
यावत्तान्यकुशलानि न क्षीणानि तावन्न जीवनान्मुक्तिः ।।८७।।

इति। अनुभूतास्वपि तीव्रदुःखवेदनासु येषां कर्मणां नाशो न भवति तानि बलवन्ति कर्माणीत्युच्यन्ते।

अनिष्टफलबीजानि तु कायवाक्चित्तानां हि दुराचरणानि ।
भवतैवं यतनीयं शक्त्या येन तदणुमात्रं न शिष्येत ।।८८।।

इति। अनेन तावन्नरकदुःखानि अपसारयितुं नृपायोपदिश्यते-- **अनिष्टफलेति** नरका हि नारकीयसत्त्वानां कर्मवशात् प्रादुर्भवन्ति। **बीजानि** इति हेतवः। कायवाक्चित्तानां दुराचरणानि पूर्वमुक्तानि। भवता तथा यतनीयं यथा तेषां (दुराचरणानां) बीजम् अणुमात्रमपि नावशिष्टं स्यादित्युपदेशः।

तिर्यग्योनिगतानां सत्त्वानां दुःखान्यधिकृत्याह--

तिर्यग्योनिषु नाना दुःखानि भवन्ति च वधबन्धनादीनि ।
परस्परं भक्षयन्ति शममूलशुभकर्मपरिहर्तारस्ते ।।८९।।

---

[1] तुलनीयम्--
कामदेवायुषा तुल्या अहोरात्रा यथाक्रमम्।
सञ्जीवादिषु षट्सु आयुस्तैस्तेषां कामदेववत्।।
अर्धं प्रतापने अवीचावन्तःकल्पम् ... ।
--अभि.को. ३/८२-८३।

इति। तत्र तिर्यग्योनिगतानि दुःखानि[१] तावत् सामान्यविशेषभेदेन निर्दिष्टानीति ज्ञातव्यानि। सामान्यनिर्देशमधिकृत्योक्तम्-- वध-बन्धन-ताडनादिविविधानि दुःखानि। तत्र **वधो** हिंसा मारणमित्यर्थः। **बन्धनं** रज्वादिभिः। **ताडनं** लौहदण्डकशादिभिः। **आदिशब्देन** कर्मसु नियोजनं नासिकाच्छेदनमित्यादीनि संगृह्यन्ते। इदं तावत् मनुष्यामनुष्यकृतानि तिर्यग्योनिगतानि दुःखान्यधिकृत्य प्रोक्तम्। स्वज्ञातिकृतानि दुःखान्याधिकृत्याह-- **परस्परं भक्षयन्ति शममूलशुभकर्मपरिहर्तारस्ते** इति शुभकर्मपरिहर्तारस्त इति प्रहीणनिर्वेधभागीयकुशलमूला इत्यर्थः। निर्वाणप्रापकं हि कुशलं शममूलकुशलमिति। अत्र परिहर्तृत्वेन तेषामपात्रत्वमादर्शितम्। **परस्परं भक्षयन्ति** इत्यन्योन्यभक्षणमित्यर्थः। अत्रापि प्रहीणशममूलशुभकर्मत्वेनात्यन्तमूढत्वं तेषामुक्तम्। तादृशं परस्परभक्षणं तावदत्यन्तमसहनीयमिति। पश्चात्तापाभावेन दुःखमेवैकान्तविपाकः।

विशेषनिर्देशमधिकृत्याह--

केचिद् वै हन्यन्ते मुक्तोर्णास्थिमांसचर्मार्थं जीवाः ।
योज्यन्ते खलु विवशा अन्ये पदमुष्टिकशाङ्कुशैः पशवश्च ।।९०।।

इति। **केचिन्मुक्तार्थं**, केचिद् ऊर्णार्थं केचिद् अस्थ्यर्थं हन्यन्ते, यथा- हस्ती । केचिद् मृगादयो मांसार्थं केचिद् व्याघ्रादयश्चर्मार्थं हन्यन्ते। **विवशा अन्ये** इत्यत्र **'योज्यन्ते'** इति शब्दस्तु प्रत्येकमभिसम्बध्यते। तत्र पादप्रहारेण नियोज्यन्ते अश्वादयः, मुष्टिप्रहारेण महिषादयः, कशया गर्दभादयः, अङ्कुशेन गजादयः, ताडनेन च नियोज्यन्ते वृषभादयः।

---

[१] तत्र तिर्यञ्चोऽन्योन्यं विप्रघातिकां कुर्वन्ति यथा दुर्बलघातिकां। ततो निदानं च दुःखं प्रत्यनुभवन्ति। अस्वतन्त्राश्च बाध्यन्ते ताड्यन्ते नुद्यन्ते। उपकरणभूताश्च भवन्ति देवमनुष्याणां। ततो निदानमपि विचित्राणि दुःखानि प्रतिसंवेदयन्ति।

--यो.भू., पृ. ८७, कल.वि., १९५७ ;

.................परं पुनः।
कल्पं तिरश्चाम्, ...।।

--अभि.को. ३/८३।

प्रेतगतेर्दुःखमधिकृत्योच्यते--

प्रेतयोनौ न क्षयं यातीष्टालाभजनिता दुःखधारा च ।
दुःखमसह्यं लभते शीतोष्णक्षुत्तृषाश्रमभयजनितं हि ।।९१।।

इति। अत्रापि सामान्यविशेषयोर्विशेषोऽवगन्तव्यः। सामान्यनिर्देशस्तावत्--अभीष्टवस्तु-नोऽभावः, क्षुत्तृषादिभिर्जनितं दुःखम्, कदापि कामानामप्रपूरणान्निरन्तरमिति। **न क्षयम्** इत्यनेन असह्यदुःखस्यैव तावन्निर्देशः। **क्षुत्तृषा** इत्यादिना बुभुक्षा पिपासा शैत्यमौष्ण्यं श्रान्तिः भयञ्चेत्यादयः संगृह्यन्ते। एभिरुत्पन्नं दारुणमसह्यं च दुःखं प्रेता लभन्त इति ज्ञेयम्[1]। तत्र भोजनार्थं परिभ्रमणेन श्रान्तिर्जायते। खड्ग-मुसल-पाशधारिणां दर्शनेन भयमुत्पद्यते।

विशेषनिर्देशमधिकृत्य तावदाह--

सूचीछिद्रवदास्यं केषाञ्चिदुदरमतिविशालं नगवच्च ।
तच्च पीडितं क्षुधया क्षिप्तमशुचि वस्तु न प्रतिकारक्षमम् ।।९२।।

इति। येषां मुखं सूचिकाछिद्रवदत्यन्तं लघु भवति ते तथोच्यन्ते। **उदरमतिविशालं नगवत्** इति पर्वतगुहापरिमाणं अत्युदारं उदरं भवतीत्यर्थः।

---

[1] प्रेताः पुन समासतस्त्रिविधा बहिर्भोजनपानकृतावरणा अध्यात्मं भोजनपानकृतावरणा भोजनपानकृतावरणाश्च। तत्र बहिर्भोजनपानकृतावरणाः कतमे। ये सत्त्वा मात्सर्यस्याधिमात्रमासेवितत्वात्प्रेतायतन उपपन्नाः। ते च भवन्ति क्षुत्पिपासायोगात्संशुष्कत्वङ्मांसशोणिता दग्धस्थूणाकृतयः केशानुकारैर्मुखैः क्षुत्पिपासापरिगतवदनाः संशुष्कमुखा लेलिहमानजिह्वाः सम्भ्रान्तवदनास्तेन तेनान्वाहिण्डन्त्युत्ससरस्तडागेषु। तत्र चापरैरसिहस्तैः पाशहस्तैस्तोमरहस्तैः सत्त्वैस्तेभ्य उत्ससरस्तडागेभ्यो निवार्यन्ते। तच्च पानीयं पूयशोणितं पश्यन्ति। तेन स्वयमेवापातुकामता सन्तिष्ठते। इम एवंरूपाः प्रेता बहिर्धाभोजनपानकृतावरणाः।

--यो.भू., पृ. ८७-८८, कल.वि., १९५७ ;

द्रष्टव्यम्--

वान्ताशा उज्झिताशाश्च खेटमूत्रोपजीविनः।
पूयशोणितविष्ठाशा घोराः प्रकृतिदुखिताः ।। --अ.श.(जाम्बालः), पृ १३४, मि.सं.।

क्षिप्तमशुचि वस्तु इति मुखच्छिद्रस्य अतिसूक्ष्मत्वात्तेन यत्किमपि अशुच्यादि वस्तु अल्पमात्रं प्राप्यते तदपि भक्षयितुं न शक्यते[1]।

केचित् प्रेता नग्नाः शुष्कतालशिखरवदस्थिचर्माणः ।
नक्तमग्निमुद्गिरतां मुखे पतत्तप्तसिकताशनं तेषाम् ।।९३।।

इति। **केचिद् अस्थिचर्माणः** इति मांसरहिता इत्यर्थः। **नग्नाः** इति रात्रौ नग्ना विचरन्ति। **शुष्कतालशिखरवत्** शुष्कतालवृक्षमस्तकसदृशा इत्यर्थः। असुरा अप्युच्यन्ते **प्रेताः**। केषाञ्चित् प्रेतानां मुखेभ्योऽग्निर्निर्गच्छति। विवृते सति मुखे निर्गच्छन्ती अग्निज्वालेव दृश्यते। किं दिवा काले? न, **नक्तम्** रात्रिसमयमात्रे। किं पुनस्तेषां भोजनम्[2]? प्रज्वलिते मुखे भोजनस्थाने तप्तबालुकाः पतन्ति, ता एव तेषां भोजनमित्यर्थः। येषां प्रज्ज्वलिते मुखे तप्तबालुकाः पतन्ति, ता एव ते भोजनरूपेण भुञ्जते, अत एव **पतत्तप्तसिकताशनमित्युक्तम्**।

केचित् प्रेतास्तावद् विष्ठापूयादिपूतिद्रव्याण्यपि न प्राप्नुवन्ति। तत्कस्य हेतोः? इत्याह--

निम्नकोटिकैः कैश्चित् पूयरक्ताद्यशुचीनि न च लभ्यन्ते ।
आक्रम्यान्यमुखोपरि गलनिर्गतलसिकादीनि च खाद्यन्ते ।।९४।।

निम्नकोटिका इति अकृतपुण्या इत्यर्थः। किं ते भक्षयन्तीति चेद्? **आक्रम्यान्यमुखोपरि** इत्याद्युक्तम्। ते अन्योऽन्यं दृष्ट्वा क्रोधेन मुखोपरि प्रहारं

---

[1] अध्यात्मं भोजनपानकृतावरणाः कतमे। तद्यथा सूचीमुखा उल्कामुखा गलगण्डकाश्च महोदराः। तथा हि ते स्वयमेव परैरकृतावरणा लब्ध्वापि भोजनपानं न शक्नुवन्ति भोक्तुं वा पातुं वा। इम एवंरूपाः प्रेता अध्यात्मं भोजनपान-कृतावरणाः।

--यो.भू., पृ. ८८, कल.वि., १९५७।

[2] भोजनपानकृतावरणाः कतमे। सन्ति ज्वालामालिनो नाम प्रेता येषां भुक्तं भुक्तं पीतं पीतं सर्वमवदह्यते येनैषां क्षुत्पिपासादुःखं न कदाचिदपैति।

--यो.भू., पृ. ८८, कल.वि., १९५७।

कुर्वन्ति। केषाञ्चिद् हस्ते मुद्गरो भवति, येन ते परस्परं प्रहरन्ति। तेन तेषां कण्ठेषु गलगण्डो जायते, परिपाकवशेन तस्मात् प्रस्रुतेन पूयेन ते स्वकीयं भक्तकृत्यं सम्पादयन्ति[1]।

चन्द्रो ग्रीष्मे तप्तः शैत्ये शीतो भानुश्च ह्येतेभ्यः ।
तेषां दृष्टिपाताच्च निष्फलास्तरवो नद्यश्च शुष्यन्ते ।।९५।।

कतिपयेभ्यः प्रेतेभ्यो निदाघकाले चन्द्रोऽपि उष्णो भवति, सूर्योऽपि हेमन्ते शीतलो भवति। **निष्फलास्तरवः** इति पुण्यरङ्केभ्यस्तेभ्यः पक्वमधुरफलनम्राः शाखिनोऽपि अग्निदग्धा इव फलपत्ररहिता जायन्ते। तेषां दृष्टिमात्रेणापि मधुरशीतलोदका नद्योऽपि दृष्टिविषेण दह्यमाना इव शोषमुपयान्ति। कतिपयेभ्यः सा नदी प्रज्वलिताङ्गारपूर्णेव प्रतीयते, केभ्यश्चित् पूयपूर्णा नानाविधकृमिपूर्णा च प्रतीयते। केभ्यश्च मूत्रपुरीषादिपरिपूर्णा परिलक्ष्यते।

एवंरूपेण ते सत्त्वाः (प्रेताः) कियत्कालं जीवन्ति? इत्याह--

सततं दुःखभाजस्ते दुश्चरितकर्मपाशसुदृढबद्धा वै ।
न च म्रियन्ते केचित् पञ्च वा दश सहस्रवर्षाणि सत्त्वाः ।।९६।।

पञ्च वा दश सहस्रवर्षाणि इति केचन सत्त्वाः पञ्चसहस्रवर्षाणि केचिच्च दशसहस्रवर्षाणि यावन्न म्रियन्ते[2]। कश्च तेषां विशेष इति? **सततं दुःखभाजस्ते** इति

---

[1] सन्ति च प्रेता अवस्करभक्षा नाम य एकत्येऽमेध्यं भक्षयन्ति प्रस्रावं पिबन्ति। यद्वाशुचिदुर्गन्धमामगन्धं प्रतिकूलं प्रतिक्रुष्टं तच्छक्नुवन्ति भक्षयितुं वा पातुं वा। अप्येके स्वमांसमप्युत्कृत्य भक्षयन्ति। यत्तु भवति शुचि वा प्रणीतं वा तन्न शक्नुवन्ति भोक्तुं वा पातुं वा। इम एवंरूपाः प्रेता भोजनपानकृतावरणा इत्युच्यन्ते।

--यो.भू., पृ. ८८, कल.वि., १९५७, विदु.भट्टाचार्य।

[2] द्रष्टव्यम्--

कामृदेवायुषा तुल्या अहोरात्रा यथाक्रमम्।
सञ्जीवादिषु षट्सु,

निरन्तरं दुःखवेदनया पीड्यन्त इत्यर्थः। कथं पुनस्तेषां कायस्तादृशेऽपि दुःखातिरेके नैव विनश्यतीति चेद्? **दुश्चरितकर्मपाशसुदृढबद्धाः** दृढतरेण दुश्चरितकर्मणां पाशेन आबद्धा इति ते न नश्यन्तीत्यर्थः।

तथाविधानां दुःखानां को हेतुः? इत्याह--

यच्च लभन्ते प्रेता नानादुःखास्वादमेकविधमित्थम् ।
प्रीतिरत्र कार्पण्ये मात्सर्यमनार्यमुक्तमतो बुद्धेन ।।९७।।

इति। तत्र **इत्थमित्यनेन** पूर्वोक्तं निर्दिष्टम्। **नाना......** इत्यादिना क्षुत्पिपासादयो वेदितव्याः। **दुःखास्वादमेकविधम्** इत्यनेन अन्तरालरहितं दुःखानुभवो निर्दिश्यते। **प्रीतिरत्र कार्पण्ये** इत्यत्र मत्सरा जनाः, तेषां च मात्सर्येऽभिरुचिः प्रदर्शिता। तत् किमिति चेद्? **मात्सर्यमनार्यम्** इत्युक्तम्। मत्सरस्वभावः क्लिष्ट इति ज्ञेयः। तत्तावन्मात्सर्यं प्रेतलोकोत्पादहेतुरिति भगवता प्रोक्तम्।

यावत् षण्णां कामावचराणां देवनिकायानामायुरुक्तम्, तेन तुल्या अहोरात्राः षट्सु नरकेषु यथाक्रमं वेदितव्याः - सञ्जीवे, कालसूत्रे, सङ्घाते, रौरवे, महारौरवे, तापने च।

.... आयुस्तैस्तेषां कामदेववत्।।८२।।

तैरिदानीं स्वैरहोरात्रैस्तेषां यथा षण्णां कामावचराणां देवानामायुः, तथैव यथाक्रमं वेदितव्यम्। कथं कृत्वा? यद्धि चातुर्महाराजकायिकानामायुःप्रमाणम्, तत् सञ्जीवने महानरके एकं रात्रिन्दिवम्। तेन यावद् द्वादशमासकेन संवत्सरेण तत्रत्यानि पञ्चवर्षशतान्यायुः।

यत् त्रायस्त्रिंशानामायुःप्रमाणम्, तत् कालसूत्रे महानरके एकं रात्रिन्दिवम्। तेन रात्रिन्दिवेन तस्मिन् वर्षसहस्राण्यायुःप्रमाणम्। एवमन्येष्वपि यथायोगं योज्यम्, यावत् परनिर्मितवशवर्तिनामायुःप्रमाणं तत्तुल्येनाहोरात्रेण तापने षोडश वर्षसहस्राण्यायुःप्रमाणम्। **अर्ध प्रतापने...** प्रतापने महानरकेऽन्तरकल्पस्यार्धमायुःप्रमाणम्। **.....अवीचावन्तःकल्पम्,** ... तिरश्चां तु नियमो नास्ति। **........परं पुनः। कल्पं तिरश्चाम्,** .... परमायुस्तिरश्चामन्तरकल्पम्। तत् पुनर्नागानां नन्दोपनन्दाश्वतलीप्रभृतीनाम्। उक्तं हि भगवता-- "अष्टाविमे भिक्षवो नागा महानागाः कल्पस्था धरणीन्धराः।" इति विस्तरः। **...... प्रेतानां मासाह्ना शतपञ्चकम्** ।।८३।। यो मनुष्याणां मासः, स प्रेतानामहोरात्रः। तेनाहोरात्रेण पञ्चवर्षशतान्यायुः। शीतनरकेष्वायुषः किं प्रमाणम्?

वाहाद् वर्षशतेनैकतिलोद्धारक्षयायुषः।
अर्वुदाद् विंशतिगुणप्रतिवृद्ध्यायुषः परे।।

-अभि.को. ३/८२-८४, पृ. ५३३-५३४, बौ.भा.प्र.।

उन्मीलिताक्षिभिश्चापि नास्माभिर्दीयते दानम् ।
मत्सरत्वाच्च तस्मात् पैत्रे वयं वसामो हिं[1] ।।

इति। देवगतेर्दुःखमधिकृत्याह--

स्वर्गे चातिसुखं यत् ततोऽप्यधिकदुःखं ततश्च्युतेर्नूनम् ।
एवं विचिन्त्य तज्ज्ञैः क्षरत्सुखाय न तृष्णा कार्या स्वर्गे ।।९८।।

इति। हृदयङ्गमानां रूपादिनानाविषयाणाम् अलङ्कृताभिर्देवकन्याभिः सह महासुखमनुभूयते स्वर्गे। यादृशं तत्र सुखं ततोऽप्यधिकं च्युतिकालेऽत्यन्तदौर्मनस्यं तेषां जायते। **एवं विचिन्त्य तज्ज्ञैः** इति मनीषिभिः क्षयक्षयिणि स्वर्गे नाभिरन्तव्यमित्यर्थः ।

देवेषु मर्मान्तकवेदनाया अभावादपि कथं नाम तत्र मृत्युदुःखं सम्भवतीति चेदाह--

वैवर्ण्यं देहस्य स्वासने न रतिर्म्लायतेऽपि माला च ।
वसनेष्वपि दौर्गन्ध्यं स्वेदश्चापूर्वो निर्याति देहात्तु ।।९९।।

इति। यद्यपि मर्मान्तकवेदनाया अभावात् तेषु न भवति कायदुःखम्, किन्तु च्युतेः पञ्च पूर्वनिमित्तानि दृष्ट्वा तेषां चित्तमत्यन्तं दुःखितं भवति। यथोक्तम्--

एको देवपुत्रः करुणं क्रन्दित्वा एवं विलपति-हा वापि हा मन्दाकिनि हा प्रिये[2] इतिवत्। मृत्युपूर्वनिमित्तानि पञ्चाधिकृत्य देवानां प्रवृत्तं दुःखमपि पञ्चधा भवति,

---

[1] तुलनीयम्--

अहसंज्ञतस्तु ममता भवते च रागो, कुतु त्यागबुद्धि भविष्यति सा मुहानाम् ।
मात्सर्य प्रेत भवते उपपद्ययाती, अथवा मनुष्य तद भोति दरिद्ररूपो।।
--र.गु.सं.गा.(म.सू.सं.), २८९, पृ. ३९४, मि.सं.।

[2] द्रष्टव्यम्--

हा चैत्ररथ हा वापि हा मन्दाकिनि हा प्रिये।
इत्यार्त्ता विलपन्तोऽपि गां पतन्ति दिवौकसः।।
--अभि.को.टी.(उद्धृतः), पृ. ८७६, बौ.भा.प्र.।

तद्यथा- पूर्ववर्णसम्पदभावाद् अप्रियकायवर्णः, स्वकीय आसने नाभिरतिः, पुष्पमालाया म्लानता, वस्त्रेषु दौर्गन्ध्यं तथा कायात् स्वेदनिर्गमश्च[१]।

एतानि पञ्च पूर्वनिमित्तानि विलोक्य देवेषु दौर्मनस्यमुत्पद्यते। अत आह--

लक्षणानि हि पञ्चैव मृत्योर्भवन्ति स्वर्गस्थदेवेषु ।
भूलोकीयनराणां सदृशान्यपि तानि मृत्युलक्षणैश्च ।।१००।।

इति। एवं स्वर्गे देवलोके स्थितानां देवानां तानि (लक्षणानि) जायन्ते, यानि मनुष्येषु मृत्युपूर्वकैः पञ्चलक्षणैः सदृशानि एव भवन्ति। यथा स्नात्वा लेपेन प्रथमतरं चित्ते दाहः तथा पिहितेन कर्णेन विना शब्दस्य श्रवणं न भवति, (इत्यादीनि लक्षणानि) यस्मिन् भवति, स मनुष्यः नचिरेण मृत्युमाप्नोति, तद्वज्ज्ञेयम्।[२]

---

[१] द्रष्टव्यम्--

देवेषु नास्ति मर्मच्छेदः। किं तु च्यवनधर्मणो देवपुत्रस्य पञ्चोपनिमित्तानि प्रादुर्भवन्ति-- वस्त्राणामाभरणानां च मनोज्ञः शब्दो निश्चरति, शरीरप्रभा मन्दीभवति, स्नातस्योदबिन्दवः काये सन्तिष्ठन्ते, चपलात्मनोऽप्येकत्र विषये बुद्धिरवतिष्ठते, उन्मेषनिमेषौ चाक्ष्णोः सम्भवतः। एतानि तु व्यभिचारीणि। पञ्च पुनर्निमित्तानि मरणं नातिवर्त्तन्ते-- वासांसि क्लिश्यन्ति, माला म्लायन्ति, कक्षाभ्यां स्वेदो मुच्यते, दौर्गन्ध्यं कायेऽवक्रामति, स्वे चासने देवपुत्रो नाभिरमते।

--अभि.को.भा., पृ. ५०५, बौ.भा.प्र. ;

देवेषु च मर्मच्छेदो नास्ति। अस्ति च च्यवनपतनदुःखं। यथोक्तं-- च्यवमानस्य देवपुत्रस्य पञ्च पूर्वनिमित्तानि प्रादुर्भवन्ति। असंक्लिष्टानि वासांसि क्लिश्यन्ते। अम्लानपूर्वा माला म्लायन्ति। कक्षाभ्यां स्वेदो मुच्यते। दौर्गन्ध्यं काये च क्रामति। स्व आसने देवो वा देवपुत्रो वा न रमते।

--यो.भू., पृ. ८९, कल.वि., १९५७।

[२] द्रष्टव्यम्--

अथ म्रियमाणस्य कस्मिन् शरीरप्रदेशे विज्ञानं निरुध्यते? सकृन्मरणे समनस्कं कायेन्द्रियं सहसाऽन्तर्धीयते। यदि तु क्रमेण च्यवते, ततः --

क्रमच्युतौ पादनाभिहृदयेषु मनश्च्युतिः।। ४३।।
अधोनृसुरगाजानां, ...

अधो गच्छन्तीत्यधोगाः, अपायगामिनः। नॄन् गच्छन्तीति नृगाः, मनुष्यगामिनः। सुरान् गच्छतीति सुरगाः, देवगामिनः। तेषां यथासंख्यं पादयोर्नाभ्यां हृदये च विज्ञानं सन्निरुध्यते। न पुनर्जायन्त इत्यजाः, अर्हन्तः। तेषामपि हृदये विज्ञानं निरुध्यते। मूर्ध्नीत्यपरे। कायेन्द्रियस्य तेषु निरोधात्। कायेन्द्रियं हि म्रियमाणस्य

देवेभ्यश्च्युतस्य यदि नावशिष्येत् कुशलमणुमात्रमपि ।
विवशतयोषितव्यं हि ततस्तिर्यक्प्रेतनरकेष्वेकस्मिन् ।।१०१।।

इत्यनेन देवेषु न केवलमेतावन्मात्रमेव दुःखम् अपि तु मृत्योरनन्तरमपि भवत्येव दुःखमिति दर्शितम्। समासार्थस्तु देवलोकाच्च्युतेः पश्चाद् यदि देव-मनुष्यलोकोत्पादकं किञ्चिदपि कुशलं (पुण्यं) नावशिष्टं स्यात्तदा पुनस्तिसृषु दुर्गतिषु (नरकप्रेततिर्यक्षु) दुःखमनुभवितव्यं भवत्येव।

असुराणां दुःखमधिकृत्याह--

दुःखं स्यान्मानसिकं देवैश्वर्यं प्रतीर्ष्ययाऽसुरेष्वपि ।
न कुर्वन्ति धीमन्तो जन्मावरणाच्च ते सत्यदर्शनानि ।।१०२।।

तप्त इवोपले जलं निष्ठ्यूतं सङ्कोचमापद्यमानं पादादिष्वन्तर्धीयत इति।

--अभि.को.भा., पृ. ५०३, बौ.भा.प्र. ;

द्रष्टव्यम् पुनः --

तस्य तस्मिन्समये परिषण्डे परिगतस्य ता अप्सरसस्तदन्यैर्देवपुत्रैः सार्धं परिचरन्ति। स तां दृष्ट्वा ततो निदानं महद् दुःखदौर्मनस्यं प्रतिसंवेदयते। तथा मद्गुभावकृतमपि दुःखं प्रत्यनुभवति। ....तत्र तदन्येषां निकृष्टपुण्यतराणां देवपुत्राणां दृष्ट्वा मद्गुभावः सन्तिष्ठते। ततो निदानं विपुलं दुःखदौर्मनस्यं प्रतिसंवेदयति। तथा छेदनभेदनप्रवासनघातकदुःखमपि प्रत्यनुभवति। तत्कस्य हेतोः। तथा हि देवासुरे संग्रामे प्रत्युपस्थिते अन्योन्यं देवा असुराश्च प्रतिविरुद्धाश्चतुर्विधान्यस्त्राण्यादाय सुवर्णमयानि रूप्यमयानि स्फटिकमयानि वैदूर्यमयानि संग्रामे संग्रामयन्ति। तत्र च देवानां वासुराणां वा अङ्गप्रत्यङ्गच्छेदो भवति। कायभेदोऽपि भवति। तेषामङ्गप्रत्यङ्गानि छिन्नानि पुनरपि जायन्ते। भिन्नश्च कायः पुनरपि विरोहति। यदा तु शिरश्छिन्नं भवति तदा वधमनुप्राप्नुवन्ति। तत एकदा देवाः पराजीयन्ते एकदा असुराः .यद्भूयसा तु देवा जयन्ति प्रभूतबलतया। तयोर्ये पराजीयन्ते तेषां स्वं परं प्रविष्टानां निर्वृतिः। न तेऽन्योन्यं पुनर्गम्या भवन्ति। तत्र देवाश्चासुरकन्यानामर्थेऽसुरैः सार्धं प्रतिविरुद्धाः। असुराश्चतुर्विधायाः सुधाया अर्थे देवैः सार्धं प्रतिविरुद्धाः। असुराश्च देवगतिसंगृहीता एव द्रष्टव्याः। ते तु मायाविनो वञ्चनाभिप्राया मायाशाठ्यबहुलाः। अतो न तथा शुक्लधर्माणां भाजनभूतास्तद्यथा देवाः। अत एकदा सूत्रान्तरेषु पृथग्गतिनिर्देशेन निर्दिष्टाः। ते सुरा एव समाना न सुरधर्ममादाय वर्तन्ते। तस्मादसुराः। बलवत्तरश्च देवपुत्रः कुपितः समानो दुर्बलतरं देवपुत्रं स्वस्माद्भवनात्प्रच्यावयति प्रवासयति। तस्माद्देवास्त्रिविधं दुःखं प्रत्यनुभवन्ति च्यवनपतनदुःखं मद्गुभावदुःखं छेदनभेदनवधप्रवासनदुःखं च।।

---यो.भू., पृ. ८९-९०, कल.वि., १९५७।

इति। असुरेषु हि स्वभावतया आत्मोत्कर्षजनितोऽभिमानो भवत्येव मानबाहुल्यात्। तस्मादनेन तेषां क्लेशाः संक्लिष्टदुःखानि च कथितानि। स्वभावतयेति कथितेन संग्रामकाले कायदुःखान्यपि सम्भवन्ति। **देवैश्वर्यं प्रतीर्ष्यया** इति स्वाभाविकश्चित्तोन्नतिजनितो दुःखहेतुर्निर्दिष्टः। जन्माख्यं संक्लिष्टदुःखमप्युक्तम्। **धीमन्तः** स्यादेतेषु कुशलाकुशलयोर्विवेके सामर्थ्यम्, तथापि जन्मावरणवशात् तेषां सत्यदर्शनं तावन्नैव भवति, यतो हि अकुशलकर्माक्षिप्ता तेषामियं योनिरेव सत्यदर्शनाधारभूता नैव भवति। अत एव तेऽसुरा आवृत्ता इत्युच्यन्ते। असुराणां गत्याक्षेपकं कर्म तावदकुशलमेव। परिपूरककर्म तु कुशलमेवेष्यते। देवानां गत्याक्षेपकं परिपूरकं च कर्म तावत् कुशलमेव। अत एव असुरगतिः सुरगतेः पृथगेव व्यवस्थाप्यते। मनुष्यगतेः दुःखविशेषस्तु पृथगेवोक्तः। स तु सामान्येन **इष्टविघातव्याधिमृत्युजरादिदुःखावहः संसारः** (६५ का०) इत्यादिगाथया निर्दिष्टः। अपि च नाना प्रकारैस्ते पूर्वं गर्हिताश्च।

संसारदोषानुपवर्ण्य सम्प्रति तत्रानभिरुचिसंज्ञामुत्पादयितुमाह--

संसारेऽस्मिन्नेवं देवनरकप्रेततिर्यग्योनिषु ।
जन्मग्रहणमयुक्तं बहुबाधं जन्म तत्रेति विज्ञेयम् ।।१०३।।

इति। यतो ह्येवंविधः संसारो दोषसंनिचयः, अतः देवादियोनिषु उपपत्तिर्नैव समीचीना। एवं विशेषोत्पादस्य दोषमुक्त्वा मनुष्योपपत्तिरपि अनेकबाधाभाजनमित्युक्तम्। जातिस्तावदात्मीयाद्यनेकदोषावहा आश्रयभूतेति ज्ञातव्यम्।[1]

---

[1] यथोक्तं सूत्रे--

मायोपमं जगदिदं भवता नटरङ्गस्वप्नसदृशं विदितम् ।
नात्मा न सत्त्व न च जीवगति धर्मा मरीचिदकचन्द्रसमाः।।

शून्याश्च शान्त अनुत्पादनय अविजानदेव जगदुद्भ्रमति।
तेषामुपायनययुक्तिशतैरवतारयस्यपि कृपालुतया।।

रागादिभिश्च बहुरोगशतैः सन्तापितं सततमीक्ष्य जगत्।
वैद्योत्तमो विचरसेऽप्रतिमः परिमोचय सुगत सत्त्वशतान्।।

एवं निखिलं संसारं प्रति अनभिरुचिमुत्पाद्य निर्वाणे अवतारणार्थं तावदाह--

ज्वलिते शिरसि च वसने तन्निवृत्त्युपायमुपेक्ष्य त्वरितमेव ।
अपुनर्भवाय यतेत यतस्तस्मान्महत्प्रयोजनं नान्यत् ।।१०४।।

इति। शिरसि वस्त्रेषु वा लग्ने अग्नौ ह्येवं (वक्तुं) युज्यते। **तन्निवृत्त्युपायमुपेक्ष्य** इति तदपाकरणं विहाय तन्निर्वापणं परित्यज्येत्यर्थः। **अपुनर्भवाय यतेत** कायं प्राणानपि वा अविचिन्त्य महता यत्नेन तादृशस्य पुनर्भवस्य हानाय प्रयत्न आस्थेयः। तत्कस्य हेतोः? **यतस्तस्मान्महत्प्रयोजनं नान्यद्** इत्यतो गरिष्ठं प्रयोजनमन्यन्नास्त्येव। एवम् अयमेव परमः पुरुषार्थ इत्यभिप्रायः।

कथं पुनः पुनर्जन्माभावः सम्भवतीत्याह--

शीलसमाधिज्ञानैर्भूजलतेजोवायुरविविधुरहितं च ।
अजरामरणमक्षयं प्राप्यं शान्तदान्तविमलं निर्वाणम् ।।१०५।।

इति शिक्षात्रयं परिपूर्य निर्वाणं[१] प्राप्नुयादित्यर्थः। द्विविधं हि तन्निर्वाणम्--सोपधिशेषं निरुपधिशेषं च[२]। निरुपधिशेषं निर्वाणं तावद् दुःखोपशमप्रभावितत्वाद्

रथचक्रवद् भ्रमति सर्वजगत् तिर्यक्षु प्रेतनिरये सुगतौ।
मूढा अदेशिक अनाथगताः तेषां प्रदर्शयसि मार्गवरम्।।
--रा.परि.सू.(म.सू.सं), ३०९-३१३ का., मि.सं.।

१ द्रष्टव्यम्--

न विद्यन्ते उपधयः स्कन्धाः सर्वरागादिप्रहाणावशेषीभूतत्वेन शेषा यस्मिन्निर्वाणे तत्तथोक्तम्। निर्वान्त्यस्मिन् सर्वे विकल्पाः इति निर्वाणं तथता।

--आलोक, पृ. ३३५, मि.सं. दरभंगा ;

निर्वाणं हि सर्वदुःखव्युपशमः।

--अभि.को.भा., पृ. ५९७, बौ.भा.प्र. ;

जिघच्छा परमा रोगा, सङ्खारा परमा दुखा ।
एतं ञत्वा यथाभूतं निब्बानं परमं सुखं ।।

आरोग्यपरमा लाभा, सन्तुट्ठिपरमं धनं ।
विस्सासपरमा ञाति निब्बानं परमं सुखं ।।
--धम्म. १५/७-८ ।

शान्तम् इतिशब्देन निर्दिष्टम्। सोपधिशेषं हि इन्द्रियदमनप्रभावितत्वाद् **दान्तम्** इत्यनेन निर्दिष्टम्। द्विविधमपि तद् रागादिभिर्मलैः विरहितत्वाद् विमलं मलरहितं निर्वाणं पदं प्राप्नुयादित्यर्थः। **अजरामरणमक्षयम्** इति तस्यैव निर्वाणस्य विशेषणपदैरानुशंस्यमुपवर्णितम्। नास्ति तस्मिन्नन्यथात्वमिति **अजरम्**। नास्ति तस्मिन् मरणमिति **अमरणम्**। नास्ति क्षयस्तस्येति **अक्षयमिति**। अवशिष्टपदैस्तावद् बाह्यानां तैर्थिकानां निर्वाणाद् वैशिष्ट्यं प्रतिपादयितुं चतुर्णां महाभूतानां सूर्यचन्द्रयोश्च तत्र सर्वदाभावः परिदीपितः।

सम्प्रति येषां धर्माणां साक्षात्कारेण निर्वाणमधिगम्यते तान् निर्देष्टुमाह--

प्रस्रब्धिवीर्यप्रीतिधर्मविचयस्मृतिसमाध्युपेक्षाः सप्त ।
बोध्यङ्गानीमानि[1] प्राप्त्यै निर्वाणस्य कुशलसम्भारः ।।१०६।।

---

२ द्रष्टव्यम्--

इह हि भगवता उषितब्रह्मचर्याणां तथागतशासनप्रतिपन्नानां धर्मानुधर्मप्रतिपत्तियुक्तानां पुद्गलानां द्विविधं निर्वाणमुपवर्णितम् सोपधिशेषं निरुपधिशेषं च। तत्र निरवशेषस्य अविद्यारागादिकस्य क्लेशगणस्य प्रहाणात् सेपधिशेषं निर्वाणमिष्यते। तत्र उपधीयतेऽस्मिन्नात्मस्नेह इति उपधिः। उपधिशब्देन आत्मप्रज्ञप्तिनिमित्ताः पञ्चोपादानस्कन्धा उच्यन्ते। शिष्यत इति शेषः, उपधिरेव शेषः उपधिशेषः, सह उपधिशेषेण वर्तते इति सोपधिशेषम्। किं तत्? निर्वाणम्। तच्च स्कन्धमात्रकमेव केवलं सत्कायदृष्ट्यादिक्लेशतस्कररहितमवशिष्यते निहताशेषचौरगणग्राममात्रावस्थानसाधर्म्येण। तत् सोपधिशेषं निर्वाणम्। यत्र तु निर्वाणे स्कन्धपञ्चकमपि नास्ति, तन्निरुपधिशेषं निर्वाणम्। निर्गतः उपधिशेषोऽस्मिन्निति कृत्वा। निहताशेषचौरगणस्य ग्राममात्रस्यापि विनाशसाधर्म्येण। ....
तदेव च अधिकृत्य उच्यते--

अभेदि कायो निरोधि सञ्ञा वेदना पि ति दहंसु सब्बा।
वूपसमिंसु संखारा विञ्ञाणमत्थमगमा ।। (उदानम्- ८-९)

तथा--

असंलीनेन कायेन वेदनामध्यवासयत्।
प्रद्योतस्येव निर्वाणं विमोक्षस्तस्य चेतसः।। (थेरगाथा-९०६)

--म.शा.वृ., पृ. २२८, बौ.भा.प्र., १९८३।

[1] तक्ष भिक्षवः कतमानि सप्त बोध्यङ्गानि? तद्यथा-- स्मृतिसंबोध्यङ्गम्, धर्मप्रविचयसंबोध्यङ्गम्, वीर्यसंवोध्यङ्गम्, प्रीतिसंबोध्यङ्गम्, प्रश्रब्धिसंबोध्यङ्गम्, समाधिसंबोध्यङ्गम्, उपेक्षासंबोध्यङ्गम्। १. इह भिक्षवो भिक्षुः स्मृतिसंबोध्यङ्गं भावयति विवेकनिश्रितं विरागनिश्रितं, निरोधनिश्रितं, व्यवसर्गपरिणतम्।

२. एवं धर्मप्रविचयं संबोध्यङ्गं भावयति विवेकनिश्रितं, विरागनिश्रितं, निरोधनिश्रितं, व्यवसर्गपरिणतम्। ३. वीर्यसंबोध्यङ्गं भावयति विवेकनिश्रितं, विरागनिश्रितं, निरोधनिश्रितं, व्यवसर्गपरिणतम्। ४. प्रीतिसंबोध्यङ्गं भावयति विवेकनिश्रितं, विरागनिश्रितं, निरोधनिश्रितं, व्यवसर्गपरिणतम्। ५. प्रश्रब्धिसंबोध्यङ्गं भावयति विवेकनिश्रितं, दिरागनिश्रितं, निरोधनिश्रितं, व्यवसर्गपरिणतम्। ६.समाधिसंबोध्यङ्गं भावयति विवेकनिश्रितं, विरागनिश्रितं, निरोधनिश्रितं, व्यवसर्गपरिणतम्। ७. उपेक्षासंबोध्यङ्गं भावयति विवेकनिश्रितं, विरागनिश्रितं, निरोधनिश्रितं, व्यवसर्गपरिणतम्। इमानि भिक्षवः सप्त बोध्यङ्गानि।

--अ.वि.सू., पृ. ३३-३४, के.पी.जा.सं., १९७१ ;

धर्मप्रविचयो बोधिर्बोध्यङ्गं च। शिष्टानि बोध्यङ्गान्येव। तत्र बोधिसत्त्वाभिसम्बोधः। स च पुद्गलभेदेन तिस्रो बोधयः। श्रावकप्रत्येकबुद्धसम्यक्संबुद्धबोधयः। धर्मप्रविचयस्तु बोध्यात्मकत्वाद् बोधिरित्युच्यते। तेषां च स्मृत्यादीनां सहायभावादङ्गत्वम्। स्मृत्यादयः पुनः षट् बोधेरनुगुणत्वात्तदङ्गानि। तत्र स्मृतिर्बोधेराश्रयाङ्गम्। स्मृतिबलेन तस्मादालम्बनादविक्षेपात्। धर्मप्रविचयः स्वभावाङ्गम्, ज्ञानस्वभावत्वाद् बोधेः। वीर्य निर्याणाङ्गम्, तेन पृथग्जनभूमिसमतिक्रमात्। प्रीतिरनुशंसाङ्गम्, तया कायचित्तानुग्रहात्। प्रश्रब्धिसमाध्युपेक्षा असंक्लेशाङ्गम्, तेषां क्लेशप्रतिपक्षत्वात्। संस्कारोपेक्षा चात्र गृह्यते न वेदनोपेक्षा, प्रीतिवचनात् ; प्रीतिस्तु सौमनस्यस्वभावत्वात्। एकस्मिंश्चित्तचैत्तकलापे च वेदनाद्रव्यद्वयस्यासम्भवात्। तस्मात्संस्कारोपेक्षैवोपेक्षाङ्गमिति। बोध्यासन्नत्वाद् भावनामार्गे बोध्यङ्गानीष्यन्ते।

--अ.वि.सू.नि., पृ. २२८-२३०, के.पी.जा.सं., १९७१ ;

निश्रयाङ्गं स्वभावाङ्गं निर्याणाङ्गं तृतीयकम्।
चतुर्थमनुशंसाङ्गमक्लेशाङ्गं त्रयात्मकम् ।। ६३।।

एतेन यद्बोध्यङ्गं यथाङ्गं तदभिद्योतितं। स्मृतिर्निश्रयाङ्गं सर्वेषां तन्निश्रयेण प्रवृत्तेः। धर्मप्रविचयः स्वभावाङ्गं बोधेस्तत्स्वभावत्वात्। वीर्यं निर्याणाङ्गं तेनाप्राप्यनिष्ठायामधिष्ठानात् (विच्छेदात्)। प्रीतिरनुशंसाङ्गं चित्तसुखत्वात्। प्रश्रब्धिसमाध्युपेक्षा असंक्लेशाङ्गं। येन यन्निश्रित्य योऽसंक्लेश इति त्रिविधमसंक्लेशाङ्गं वेदितव्यम्।

--म.सू. १८/६३, पृ. १३८-१३९, मि.सं. ;

सप्त बोध्यङ्गानामालम्बनं कतमत्। चतुर्णामार्यसत्यानां यथाभूतता। स्वभाव कतमः। स्मृतिः धर्मप्रविचयः वीर्यं प्रीतिः प्रश्रब्धिः समाधिः उपेक्षा च। स्मृतिः संनिश्रयाङ्गम्। धर्मप्रविचयः स्वभावाङ्गम्। वीर्यं निर्याणाङ्गम्। प्रीतिः अनुशंसाङ्गम्। प्रश्रब्धिः समाधिः उपेक्षा चासंक्लेशाङ्गम्। असंक्लेशतः असंक्लेशाश्रयतः असंक्लेशस्वभावतश्च। सहायः कतमः। तत्संप्रयुक्ताश्चित्तचैतसिका धर्माः। भावना कतमा। विवेकनिश्रितं विरागनिश्रितं निरोधनिश्रितं व्यवसर्गपरिणतं स्मृतिसंबोध्यङ्गम्। यथा स्मृतिसंबोध्यङ्गं तथा यावत् उपेक्षासंबोध्यङ्गम्। एभिः चतुभिः पदैर्यथाक्रमं चतुःसत्यालम्बना बोध्यङ्गभावना परिदीपिता। भावनाफलं कतमत्। दर्शनहेयानां क्लेशानां प्रहाणम्।

--अभि.समु., पृ. ७४, वि.भा.प्र., १९५० ;

आश्रयाङ्गं स्वभावाङ्गं निर्याणाङ्गं तृतीयकम्।
चतुर्थमनुशंसाङ्गं निःक्लेशाङ्गं त्रिधा मतम् ।।

इति। तत्र आलम्बनस्य अविस्मरणं **स्मृतिः**। या खलु प्रज्ञा सैव **धर्मप्रविचय** इति। यो हि अभ्युत्साहस्तद् **वीर्यम्**। आलम्बनं प्रति यत् सौमनस्यं सा **प्रीतिः**। **प्रस्रब्धिस्**तावत् कायचित्तयोः कर्मण्यता। **समाधिस्**तु चित्तस्यैकाग्रता। **उपेक्षा** तावच्चित्तचैतसिकानामध्यवसनेन अनाभोगेन च या प्रवृत्तिः।[१] एते सप्त धर्मा अनास्रवज्ञानस्य बोधेर्वा अङ्गानीति बोध्यङ्गान्युच्यन्ते पार्षदा इवेत्यर्थः। **कुशलसम्भारः** इति कुशलहेतुः।

प्रज्ञाभावे ध्यानं ध्यानाभावेऽपि न जायते सा प्रज्ञा[२] ।

दर्शनमार्गे बोधावङ्गानि बोध्यङ्गानि। तत्र बोधेराश्रयाङ्गं स्मृतिः। स्वभावाङ्गं धर्मप्रविचयः। निर्याणाङ्गं वीर्यम्। अनुशंसाङ्गं प्रीतिः। असंक्लेशाङ्गं त्रिधा प्रस्रब्धिसमाध्युपेक्षाः।

--मध्यान्त.वि.भा.(सम्पा.), पृ. ३२, पटना, १९६७ ;

अन्यत्रापि द्रष्टव्यम्-- महा.व्यु., पृ. २२, भो.सं. ; समाधि.सू., पृ. ३७३, मि.सं. ; ध.सं.(म.सू.सं.), पृ. ३३२, मि.सं. ; दे.क. ११ दश.सा.प्र., 'ग' पृ. ५ ; अभि.को.भा., ६/६८, पृ. १०१७ ।

[१] द्रष्टव्यम्--

उपेक्षा चित्तसमता चित्तप्रशठता चित्तानाभोगता। एभिस्त्रिभिः पदैरुपेक्षाया आदि-मध्यावसानावस्था द्योतिता।

तत्र लय औद्धत्यं वा चेतसो वैषम्यम्, तस्याभावाद् आदौ चित्तसमता। ततोऽनभिसंस्कारेणाप्रयत्नेन समाहितचेतसो यथाभियोगं समस्यैव या प्रवृत्तिः सा चित्तप्रशठता, सा पुनरवस्था लयौद्धत्यशङ्कानुगताऽचिरभावित्वात्। ततो भावनाप्रकर्षगमनात् तद्विपक्षदूरीभावात् तच्छङ्काभावे लयौद्धत्यप्रतिपक्षनिमित्तेष्वाभोगम् अकुर्वतोऽनाभोगावस्था चित्तस्यानाभोगता। इयं च सर्वक्लेशोपक्लेशानवकाससंनिश्रयदानकर्मिका।

--वि.मा.सि., पृ. १९८-१९९, सम्पू.सं.वि.वि.प्र. १९७२।

[२] द्रष्टव्यम्--

नत्थि झानं अपञ्ञस्स, पञ्ञा नत्थि अझायतो।
यम्हि झानं च पञ्ञा च, स वे निब्बानसन्तिके ।। --धम्म. २५/१३ ;

शमथः कतमः। अध्यात्मं चित्तस्य उपनिबन्धः स्थापना संस्थापना अवस्थापना उपस्थापना दमनं शमनं व्युपशमनम् एकोतीकरणं समाधानं च। विपश्यना कतमा। या धर्मान् विचिनोति प्रविचिनोति परिवितर्कयति परिमीमांसामापद्यते च। कामप्रतिपक्षदौष्ठुल्यनिमित्तसंयोजनतः कामाभिभवानां विपर्यासतः अविपर्यस्तचित्तस्यावस्थापनतश्च। अपि खलु शमथविपश्यनामागम्य चत्वारो मार्गाः। एकत्यः शमथस्य लाभी न विपश्यनायाः। तत्प्रकारं शमथं निश्रित्य विपश्यनाभावना। एकत्यः विपश्यनाया लाभी

यत्रोभे विद्येते ज्ञेयस्तस्य भवसागरो गोष्पदवत् ।।१०७।।

न शमथस्य। तत्प्रकारां विपश्यनां निश्रित्य शमथभावना। एकत्यः न शमथस्य लाभी नापि विपश्यनायाः। तत्संबद्धचित्तस्य लयौद्धत्यापकर्षणाद् युगपदुभयमार्गभावना। एकत्यः शमथस्य लाभी विपश्यनायाश्च। तस्य शमथविपश्यनोभयमार्गयुक्तस्य समं युगपत् प्रवृत्तिः।

--अभि.समु., पृ. ७५, वि.भा.प्र. १९५० ;

चित्तस्य चित्ते स्थानाच्च धर्मप्रविचयादपि।
सम्यक्स्थितिमुपाश्रित्य शमथोऽथ विपश्यना।।

सम्यक्समाधिं निश्रित्य चित्ते चित्तस्यावस्थानात्। धर्माणां च प्रविचयाद्यथाक्रमं शमथो विपश्यना च वेदितव्या। न तु विना सम्यक्समाधिनेत्येतच्छमथविपश्यनालक्षणम्।

सर्वत्रगा च सैकांशा नैकांशोपनिषन्मता।

सा च शमथविपश्यना सर्वत्रगा यं यं गुणमाकाङ्क्षति तत्र तत्र तद्भावनात्। यथोक्तं सूत्रे। आकाङ्क्षेद्भिक्षुरहो वताहं विविक्तं कामैरिति विस्तरेण यावत् तेन भिक्षुणा इमावेव द्वौ धर्मौ भावयितव्यौ। यदुत शमथश्च विपश्यना चेत्येवमादि। एकांशा शमथविपश्यना यदा शमथं भावयति। विपश्यनां वा। उभयांशा यदा युगपदुभयं भावयति। उपनिषत्संमता शमथविपश्यना बोधिसत्त्वानामधिमुक्तिचर्याभूमौ।

प्रतिवेधे च निर्याणे अनिमित्ते ह्यसंस्कृते।।

परिशुद्धौ विशुद्धौ च शमथोऽथ विपश्यना।
सर्वभूमिगता धीरे स योगः सर्वसाधकः।।

इत्युपनिषन्मतेत्येवमादिना शमथविपश्यनायाः प्रभेदः कर्म च निर्दिष्टं। योग उपायो वेदितव्यः। तत्र प्रतिवेधः प्रथमभूमिप्रवेशः। निर्याणं यावत् षष्ठी भूमिः। ताभिः सनिमित्तप्रयोगनिर्याणात्। अनिमित्तं सप्तमी भूमिः। असंस्कृतमन्यद्भूमित्रयमनभिसंस्कारवाहित्वात्। संस्कारो हि संस्कृतं तदत्र नास्तीत्यसंस्कृतं। तदेव च भूमित्रयं निश्रित्य बुद्धक्षेत्रं च परिशोधयितव्यं। बुद्धत्वं च प्राप्तव्यं। तदेतद्यथाक्रमं परिशुद्धिर्विशुद्धिश्च।

--म.सू., १८/६६-६८, पृ. १४०, मि.सं. ;

शमथेन विपश्यनासुयुक्तः कुरुते क्लेशविनाशमित्येवत्य।
शमथः प्रथमं गवेषणीयः स च लोके निरपेक्षयाभिरत्या।।

शमथः चित्तेकाग्रतालक्षणः समाधिः। तेन सुयुक्त इति अपोद्धृत्य इहापि योजनीयम्। यदि वा हेत्वर्थे तृतीया। शमथेन हेतुना विपश्यनासुयुक्तः। सहार्थे वा। शमथेन सार्धं विपश्यनासुयुक्त इति। विपश्यना यथाभूततत्त्वपरिज्ञानस्वभावा प्रज्ञा। तया सुयुक्तः। युगनद्धवाहिमार्गयोगेन कुरुते क्लेशानां विनाशं प्रहाणमित्येवमवेत्य ज्ञात्वा क्लेशविमुमुक्षुणा शमथः प्रथमादौ गवेषणीयः।

--बो.च.पं., ८/४, पृ. १३७ ।

प्रज्ञाभावे इत्यादिना द्वयोर्धर्मयोः समाधिप्रज्ञयोः साक्षात्कारेण निर्वाणस्य प्राप्तिर्निर्दिष्टा। द्वयोर्युगनद्धत्वेन निर्वाणमवाप्यते। अनयोर्द्वयोः अन्योऽन्यबलेन उभयोः सिद्धिरिति।

प्रज्ञाभावे ध्यानं न इति सम्यक्समाधेरुत्पादोपायस्य अज्ञानमत्र प्रज्ञाभावस्य तात्पर्यम्। तथासति ध्यानं न समृद्ध्यति। **ध्यानाभावेऽपि न जायते सा प्रज्ञा** इति यो ह्यसमाहितः स सर्वधर्मान् यथावन्न जानातीति तस्य प्रज्ञाऽभावः[१]। समाहितेन चित्तेनैव सर्वधर्मा यथाभूतं सम्यग् ज्ञायन्ते।[२] यस्मिन् इमौ उभावपि धर्मौ संविद्येते तस्य कृते संसारोऽयं गोष्पद इव वेदितव्यः। अथवा अन्योऽर्थः -- यत्रोत्पन्नस्य (पुरुषस्य) श्रुतमयी प्रज्ञा न भवति तस्य ध्यानं न सिध्यति। ध्यानाभावेऽपि तावद् भावनामयी प्रज्ञा नोत्पद्यते। यस्मिन् उभे समाधिप्रज्ञे विद्येते, तस्य कृते संसारः गोष्पदवद् ज्ञातव्यः, अनायासेन उल्लङ्घनसामर्थ्यादिति।

सम्प्रति एषां निर्वाणप्रापकानां धर्माणां ये विघ्नकारका अविचारणीया विषयाः, तेषां निवृत्त्यर्थमाह--

---

[१] द्रष्टव्यम्--

आभवाग्रमपि स्पृष्ट्वा त्वद्धर्मविमुखे जनः।
प्रचिनोत्येव मोहान्धो व्यसनप्रभवान् भवान्।। २२।।

अनागम्यापि तु ध्यानं मौलं त्वच्छासनानुगाः।
विवर्तयन्त्येव भवान् (मारस्य) वशवर्तिनः।। २३।।

--वर्णनार्हवर्णे बुद्धस्य स्तोत्रः, (धीः २५ अङ्कः), १९९८, ति.सं.; दे.क. ११३८. पृ. ९६, 'क' पुट्, भो.सं.।

[२] द्रष्टव्यम्--

समाहितो यथाभूतं प्रजानातीत्यवदन्मुनिः।
शमाच्च न चलेच्चित्तं बाह्यचेष्टानिवर्तनात् ।।

यथोक्तं धर्मसंगीतौ- समाहितमनसो यथाभूतदर्शनं भवति। यथाभूतदर्शिनो बोधिसत्त्वस्य सत्त्वेषु महाकरुणा प्रवर्तते। एवं चास्य भवति- इदं मया समाधिमुखं सर्वधर्मयथाभूतदर्शनं च सर्वसत्त्वानां निष्पादयितव्यम्। स तया महाकरुणया संचोद्यमानोऽधिशीलमधिचित्तमधिप्रज्ञं च शिक्षां परिपूर्य अनुत्तरां सम्यक्संबोधिमभिसंबुध्यते- तस्मान्मया शीलसुस्थितेनाप्रकम्प्येनाशिथिलेन भवितव्यमिति।

--शि.समु. ९ का., पृ. ६७, मि.सं.।

येऽव्याकृतधर्माश्चादित्यबन्धुना चतुर्दशोपदिष्टाश्च ।
लोके न चिन्तनीया यतो तैर्नाप्नोति चित्तमेव शान्तिम् ।।१०८।।

इति। तथागतेन यानि चतुर्दश अव्याकृतवस्तून्युपदिष्टानि, कानि तानीति चेत्? तद्यथा- शाश्वतो लोकः, अशाश्वतो लोकः, शाश्वतश्चाशाश्वतश्च, नैव शाश्वतो नाशाश्वतश्च, अन्तवांल्लोकः, अनन्तवांल्लोकः, अन्तवांश्चानन्तवांल्लोकश्च, नैवान्तवान्नानन्तवांश्च, भवति तथागतः परं मरणात्, न भवति तथागतः परं मरणात्, भवति न च भवति च तथागतः परं मरणात्, नैव भवति न न भवति तथागतः परं मरणात्, स जीवस्तच्छरीरम्, अन्यो जीवोऽन्यच्छरीरं चेति। एतेषु चतुर्दशसु वस्तुषु पृष्टेषु सत्सु व्याकरणानर्हत्वाद् अव्याकृतवस्तून्युच्यन्ते[1]। इमे एव स्थापनीयाः प्रश्नाः

---

[1] द्रष्टव्यम्-- चतुर्दशाव्याकृतवस्तूनि, तद्यथा- शाश्वतो लोकः, अशाश्वतो लोकः, शाश्वतश्चाशाश्वतश्च, नैव शाश्वतो नाशाश्वतश्च, अन्तवांल्लोकः, अनन्तवांल्लोकः, अन्तवांश्चानन्तवांल्लोकश्च, नैवान्तवान्नानन्तवांश्च, भवति तथागतः परं मरणात्, न भवति तथागतः परं मरणात्, भवति न च भवति च तथागतः परं मरणात्, नैव भवति न न भवति तथागतः परं मरणात्, स जीवस्तच्छरीरम्, अन्यो जीवोऽन्यच्छरीरं चेति।

--ध.सं.(म.सू.सं.), पृ. ३३९ ; धर्मपर्याय, भो.सं. ; महा.व्यु., पृ. ७२ ; बौ.द.मी., पृ. ४० ; मज्झिम निका.(अनु.), पृ. २५१ ; आर्यनिष्ठागतभगवत् ज्ञानवैपुल्यसूत्ररत्नानन्त-नाम-महायानसूत्रम्, 'ग' पुट् पृ. २६४, भो.सं. ; बुद्धावतंसक-नाम-महायानसूत्रम्, 'क' पुट् पृ. ३३८, भो.सं. ;

शाश्वताशाश्वताद्यत्र कुतः शान्ते चतुष्टयम्।
अन्तानन्तादि चाप्यत्र कुतः शान्ते चतुष्टयम्।।

इह चतुर्दश अव्याकृतवस्तूनि भगवता निर्दिष्टानि। तद्यथा- शाश्वतो लोकः, अशाश्वतो लोकः, शाश्वतश्चाशाश्वतश्च लोकः, नैव शाश्वतो नाशाश्वतश्च लोकः, इति चतुष्टयम्। अन्तवान् लोकः, अनन्तवान् लोकः, अन्तवांश्च लोकः, नैव अन्तवान् न अनन्तवांश्च लोकः, इति द्वितीयम्। भवति तथागतः परं मरणात्, न भवति तथागतः परं मरणात्, भवति च न भवति च तथागतः परं मरणात्, नैव भवति न न भवति च तथागतः परं मरणात्, इति तृतीयम्। स जीवस्तच्छरीरम्, अन्यो जीवोऽन्यच्छरीरमिति। तान्येतानि चतुर्दश वस्तूनि अव्याकृतत्वादव्याकृतवस्तूनि इत्युच्यन्ते।

--म.शा.वृ., २२/१२, पृ. १९४, बौ.भा.प्र. १९८३ ;

एकांशतो व्याकरणं विभज्य परिपृच्छ्य च।
स्थाप्यं च मरणोत्पत्तिविशिष्टात्माऽन्यतादिवत्।।

निर्दिष्टाः। स्थापनीयानीति अविचारणीयानीत्यर्थः। तत्कस्य हेतोः? **तैर्नाप्नोति चित्तमेव शान्तिम्** इति। तथा हि-- यच्चिन्तनेन कश्चन लाभो वा सुखं वाऽवाप्यते, तद्धि विचारणीयतामर्हति। यदा ह्येतेषां विषयाणां विचारणेन न चित्तं शान्तिमुपगच्छति, तस्माद् अविचारणीया एवैते विषया इत्युच्यन्ते।

एवमविचारणीयान् विषयान् परित्यज्य येषां चिन्तनेन बोध्यनुकूला धर्मा उत्पत्तुमुत्सहन्ते तत्र चित्तं नियोजयितुमाह--

एवं प्रोक्तं मुनिनाऽविद्यया कर्म कर्मणा च विज्ञानम् ।
तस्माच्च नामरूपं ततः षडायतनानि ततः स्पर्शा वै ।।१०९।।

तत उत्पन्ना वित्तिर्वेदनाश्रयेण जायते खलु तृष्णा ।
तस्याश्चोपादानं ततो भवोऽपि भवाच्च जायते जातिः ।।११०।।

भदन्तमहासाङ्घिका सूत्रं पठन्ति-- "चत्वारीमानि भिक्षवः प्रश्नव्याकरणानीति। कतमानि चत्वारि? अस्ति भिक्षव एकांशव्याकरणीयः प्रश्नः, अस्ति यावत् स्थापनीयः। कतमश्च भिक्षवः एकांशव्याकरणीयः प्रश्नः? 'सर्वे संस्कारा अनित्याः' इत्ययं भिक्षव एकांशव्याकरणीयः प्रश्नः। कतमश्च भिक्षवो विभज्यव्याकरणीयः प्रश्नः? 'सञ्चेतनीयं कर्म कृत्वा किं प्रतिवेदयते' इत्ययं विभज्यव्याकरणीयः प्रश्नः। कतमश्च भिक्षवः परिपृच्छ्यव्याकरणीयः प्रश्नः? संज्ञासु पुरुषस्यात्मा, उताहोऽन्या संज्ञा अन्य आत्मेति पृष्टेन सता परिप्रष्टव्यः-- कतमं पुनरायुष्मानात्मानं प्रत्येति? स चेदेवं वदेद्-- औदारिकं खल्वहमायुष्मन्नात्मानं प्रत्येमि। एवं सत्यन्या संज्ञा अन्य आत्मेत्येवं वचनीयः। अयं हि परिपृच्छ्य व्याकरणीयः प्रश्नः। कतमश्च भिक्षवः स्थापनीयः प्रश्नः? तद्यथा- शाश्वतो लोकोऽशाश्वतः, शाश्वतश्चाशाश्वतश्च, नैव शाश्वतो नाशाश्वतः, अन्तवानन्तश्च नैवान्तवान्नानन्तवान्। भवति तथागतः परं मरणान्न भवति तथागतः परं मरणात्, यावदन्यो जीवोऽन्यच्छरीरमित्ययं भिक्षवः स्थापनीयः प्रश्नः" इति। --अभि.को.भा., ५/२२, पृ. ८००-८०१. बौ.भा.प्र. १९८७ ;

अपि च द्रष्टव्यम्-

निवृत्तेस्तेन लोकस्य नोपैत्यूनत्वमर्थतः ।
अन्तवानिति लोकश्च पृष्टस्तूष्णीं जिनोऽभवत्।।
सर्वज्ञ इति सर्वज्ञो बुधैस्तेनैव गम्यते।
यैर्नैतद्धर्मगाम्भीर्यं नोवाचाभाजने जने।।

--रत्ना., १/७३-७४।

सत्यां जातौ दुःखव्याधिजरेष्टवस्त्वलाभभयमरणानि ।
दुःखस्कन्धो विपुलः सति जातिनिषेधे निषिद्धानीमानि ।।१११।।

इत्यादिभिः द्वादश प्रतीत्यसमुत्पादाङ्गानि[1] निर्दिष्टानि। एतेषामर्थो यथासूत्रमवगन्तव्यः। तत्रेदं तावत् सूत्रम्-- **"यदुत अविद्याप्रत्ययाः संस्काराः, संस्कारप्रत्ययं विज्ञानम्, विज्ञानप्रत्ययं नामरूपम्, नामरूपप्रत्ययं षडायतनम्, षडायतनप्रत्ययः स्पर्शः, स्पर्शप्रत्यया वेदना, वेदनाप्रत्यया तृष्णा, तृष्णाप्रत्ययमुपादनम्, उपादानप्रत्ययो भवः, भवप्रत्यया जातिः, जातिप्रत्यया जरामरणशोकपरिदेवदुःखदौर्मनस्योपायासाः सम्भवन्ति। एवमस्य केवलस्य महतो दुःखस्कन्धस्य समुदयो भवति"**[2] इति।

---

[1] द्रष्टव्यम्--

यः प्रतीत्यसमुत्पादो द्वादशाङ्गः ....।

तत्र द्वादशाङ्गानि-- अविद्या, संस्काराः, विज्ञानम्, नामरूपम्, षडायतनम्, स्पर्शः, वेदना, तृष्णा, उपादानम्, भवः, जातिः, जरामरणं च।

--अभि.को.भा. ३/२० ; अ.वि.सू., पृ. ९८ ; म.सू.सं., पृ. ११७ ; अभि.समु., पृ. २६ ;

तत्र अविद्या कतमा? या एषामेव षण्णां धातूनायमैकध्यसंज्ञा पिण्डसंज्ञा नित्यसंज्ञा ध्रुवसंज्ञा शाश्वतसंज्ञा सुखसंज्ञा आत्मसंज्ञा जीवपुद्गलमनुजमानवसंज्ञा अहंकारसंज्ञा ममकारसंज्ञा एवमादि विविधमज्ञानम्। इयमुच्यते अविद्येति। एवमविद्यायां सत्यां विषयेषु रागद्वेषमोहा विषयेषु अमी संस्कारा इत्युच्यन्ते। वस्तुप्रतिविज्ञप्तिर्विज्ञानम्। विज्ञानसहभुवश्चत्वारः स्कन्धा अरूपिणः उपादानाख्याः तन्नामरूपं चत्वारि महाभूतानि, तानि चोपादाय रूपम्। तच्च नाम तच्च रूपम्। ऐकध्यमभिसंक्षिप्य तन्नामरूपम्। नामरूपसंनिश्रितानीन्द्रियाणि षडायतनम्। त्रयाणां धर्माणां संनिपातः स्पर्शः। स्पर्शानुभवो वेदना। वेदनाध्यवसानं तृष्णा। तृष्णावैपुल्यमुपादानम्। उपादाननिर्जातं पुनर्भवजनकं कर्म भवः। भवहेतुकः स्कन्धप्रादुर्भावो जातिः। जातस्य स्कन्धस्य परिपाको जरा। जीर्णस्य स्कन्धस्य विनाशो मरणम्। म्रियमाणस्य संमूढस्य साभिष्वङ्गस्यान्तर्दाहः शोकः। शोकोत्थमालपनं परिदेवः। पञ्चविज्ञानकायसंयुक्तमसातमनुभवनं दुःखम्। मनसा संयुक्तं मानसं दुःखं दौर्मनस्यम्। ये चाप्यन्ते एवमादाय उपक्लेशास्ते उपायासा इति। --म.शा.वृ., पृ. २४७, बौ.भा.प्र. १९८३।

[2] द्रष्टव्यम्-- हे भिक्षवः ! यदुत अस्मिन् सति इदं भवति, अस्योत्पादादिदमुत्पद्यते। यदुत अविद्याप्रत्ययाः संस्काराः, संस्कारप्रत्ययं विज्ञानम्, विज्ञानप्रत्ययं नामरूपम्, नामरूपप्रत्ययं षडायतनम्, षडायतनप्रत्ययः स्पर्शः, स्पर्शप्रत्यया वेदना, वेदनाप्रत्यया तृष्णा, तृष्णाप्रत्ययमुपादनम्, उपादानप्रत्ययो

एवमनुलोममुक्त्वा प्रतिलोममधिकृत्याह-- **''सति जातिनिषेधे निषिद्धानीमानि इति। जातिनिरोधाज्जातिजरामरणशोकपरिदेवदुःखादयो धर्मा निरुध्यन्ते। एवमस्य अशेषस्य विपुलस्य दुःखस्कन्धस्य निरोधो भवति। जातिनिरोधाद् भवनिरोधः ..... एवम् अविद्यानिरोधात् संस्कारनिरोध इति यावत्।''**[1] कतमा अविद्या? यथोक्तं सूत्रे-- **''यत् पूर्वान्तेऽज्ञानम्''** इत्याद्युक्तम्[2]।

भवः, भवप्रत्यया जातिः, जातिप्रत्यया जरामरणशोकपरिदेवदुःखदौर्मनस्योपायासाः सम्भवन्ति। एवमस्य केवलस्य महतो दुःखस्कन्धस्य समुदयो भवति।

--प्र.समु.वि.नि.सू.(म.सू.सं.) भाग-१, पृ. ११७, मि.सं. १९६१ ; शालि.सू.(म.सू.सं) भाग-१, पृ. १००, मि.सं. ; अ.वि.सू., पृ. ५, के.पी.जा.सं., १९७१ ; यो.भू. पृ. १९८-२००, कल.वि.प्र. १९५७ ;

द्रष्टव्यं पुनश्च--

पुनर्भवाय संस्कारान् अविद्यानिवृतस्त्रिधा।
अभिसंस्कुरुते यांस्तैर्गतिं गच्छति कर्मभिः।।१
विज्ञानं सन्निविशते संस्कारप्रत्ययं गतौ ।
सन्निविष्टेऽथ विज्ञाने नामरूपं निषिच्यते ।।२
निषिक्ते नामरूपे तु षडायतनसम्भवः ।
षडायतनमागम्य संस्पर्शः सम्प्रवर्तते ।।३
चक्षुः प्रतीत्य रूपं च समन्वाहारमेव च ।
नामरूपं प्रतीत्यैवं विज्ञानं सम्प्रवर्तते ।।४
सन्निपातस्त्रयाणां यो रूपविज्ञानचक्षुषाम् ।
स्पर्शः सः तस्मात् स्पर्शाञ्च वेदना सम्प्रवर्तते।।५
वेदनाप्रत्यया तृष्णा वेदनार्थं हि तृष्यते।
तृष्यमाण उपादनमुपादत्ते चतुर्विधम् ।।६
उपादाने सति भव उपादातुः प्रवर्तते ।
स्याद्धि यद्यनुपादानो मुच्येत न भवेद् भवः।।७
पञ्च स्कन्धाः स च भवः भवाज्जातिः प्रवर्तते।
जरामरणदुःखादि शोकाः सपरिवेदनाः ।।८
दौर्मनस्यमुपायासा जातेरेतत् प्रवर्तते ।
केवलस्यैवमेतस्य दुःखस्कन्धस्य सम्भवः।।९

--म.शा., २६/१-९।

[1] द्रष्टव्यम्-- तत्र अविद्यानिरोधात् संस्कारनिरोधः। संस्कारनिरोधाद्विज्ञाननिरोधः। विज्ञाननिरोधान्नामरूपनिरोधः। नामरूपनिरोधात् षडायतननिरोधः। षडायतननिरोधात् स्पर्शनिरोधः। स्पर्शनिरोधात् वेदनानिरोधः। वेदनानिरोधात् तृष्णानिरोधः। तृष्णानिरोधादुपादाननिरोधः।

अत्रायं संक्षेपः - (आर्य-) सत्यानामज्ञानं तावत् परमार्थतोऽविद्या। ज्ञानविपक्षं हि

उपादाननिरोधाद्भवनिरोधः। भवनिरोधाज्जातिनिरोधः। जातिनिरोधाज्जरामरणशोकपरिदेवदुःखदौर्मनस्योपायासा निरुध्यन्ते। एवमस्य केवलस्य महतो दुःखस्कन्धस्य निरोधो भवति। अयमुच्यते प्रतीत्यसमुत्पादो भगवता।

--शालि.सू.(म.सू.सं), पृ. १००, मि.सं. ; अ.वि.सू., पृ. ५, के.पी.जा.सं. १९७१ ; यो.भू. पृ. २०१-२०३, कल.वि.प्र. १९५७ ;

यतश्चैवमविद्यायामेव सत्यां संस्काराः प्रवर्तन्ते, असत्यां न प्रवर्तन्ते, अतः
अविद्यायां निरुद्धायां संस्काराणामसम्भवः।
हेतुवैयर्थ्यात्। तस्याः पुनरविद्यायाः कुतो निरोधः, इत्याह--
अविद्याया निरोधस्तु ज्ञानेनास्यैव भावनात्।। ११।।

अस्यैव प्रतीत्यसमुत्पादस्य यथावदविपरीतभावनातः अविद्या प्रहीयते। यो हि प्रतीत्यसमुत्पादं सम्यक् पश्यति, स सूक्ष्मस्यापि भावस्य न स्वरूपमुपलभते। प्रतिविम्बस्वप्रालातचक्रमुद्रादिवत्तु स्वभावशून्यतां सर्वेषां भावानामवतरति। स एव स्वभावशून्यतां सर्वेषां भावानामवतीर्णो न किञ्चिद्वस्तु उपलभते बाह्यमाध्यात्मिकं वा। सोऽनुपलभमानो न क्वचिद्धर्मे मुह्यति, अमूढश्च कर्म न करोतीति। एवं प्रतीत्यसमुत्पादभावनया तत्त्वमवतरति। तत्त्वदर्शिनो योगिनो नियतमेव अविद्या प्रहीयते। प्रहीणाविद्यस्य संस्कारा निरुध्यन्ते। यथा चैवमविद्यानिरोधात् संस्कारा निरुध्यन्ते, एवम्--
तस्य तस्य निरोधेन तत् तन्नाभिप्रवर्तते ।
दुःखस्कन्धः केवलोऽयमेव सम्यङ् निरुध्यते।। १२।।

पूर्वस्य पूर्वस्य अङ्गस्य निरोधेन उत्तरस्योत्तरस्य अङ्गस्य निरोधो भवतीति विज्ञेयम्। अनया चानुपूर्व्या अयं योगी आत्मात्मीयाद्यदर्शनायासनिरस्तः कारकवेदकविरहितं भावस्वभावशून्यं दुःखराशिं पुनरनुत्पत्त्या सम्यङ्निरोधयति।

--म.शा.वृ. २६, पृ. २४५, बौ.भा.प्र. १९८३।

२ तत्र कतमा अविद्या? यदुत-- पूर्वान्तेऽज्ञानम्, अपरान्तेऽज्ञानम्, प्रत्युत्पन्नेऽज्ञानम्, अध्यात्मेऽज्ञानम्, बहिर्धाऽज्ञानम्, अध्यात्मबहिर्धाऽज्ञानम्, कर्मण्यज्ञानम्, विपाकेऽज्ञानम्, कर्मविपाकेऽज्ञानम्, सुकृतेऽज्ञानम्, दुष्कृतेऽज्ञानम्, सुकृतदुष्कृतेऽज्ञानम्, हेतावज्ञानम्, फलेऽज्ञानम्, हेतुफलेऽज्ञानम्, हेतुसमुत्पन्नेषु धर्मेष्वज्ञानम्, प्रतीत्यसमुत्पादेष्वज्ञानम्, प्रतीत्यसमुत्पन्नेषु धर्मेषु अज्ञानम्, बुद्धेऽज्ञानम्, धर्मेऽज्ञानम्, सङ्घेऽज्ञानम्, दुःखेऽज्ञानम्, समुदयेऽज्ञानम्, निरोधेऽज्ञानम्, मार्गेऽज्ञानम्, कुशलाकुशलेषु धर्मेषु अज्ञानम्, सावद्यानवद्येषु धर्मेषु अज्ञानम्, सेवितव्यासेवितव्येषु धर्मेषु अज्ञानम्, हीनप्रणीतेषु कृष्णशुक्लेषु धर्मेषु अज्ञानम्, षट्सु वा स्पर्शायतनेषु यथाभूतमज्ञानमदर्शनमनभिस(म)यस्तमः संमोहोऽविद्यान्धकारम्। इयमुच्यतेऽविद्येति।

--अ.वि.सू., पृ. ५-७, के.पी.जा.सं. ; प्र.समु.वि.नि.सू.(म.सू.सं), पृ. ११७ ; यो.भू. पृ. २०४-२०५, कल.वि.प्र. १९५७।

अज्ञानं वेदितव्यम्। साविद्यैर्बालैः कृतानि कुशलाकुशलानेञ्ज्यानि कर्माणि अविद्याप्रत्ययाः संस्काराः।[१] यथा सूत्रे ह्युक्तम्-- **त्रयः संस्काराः, यथा- कायसंस्कारा वाक्संस्कारा मनःसंस्काराश्चेति।**[२] एवमुक्तेऽपि अत्र कायवाङ्मनोभिः सम्पादितानि कर्माण्येव वेदितव्यानि। तेषां कर्मणां यद्बीजम्, तेनोपप्लुतं चित्तं तावत् संस्कारप्रत्ययं विज्ञानम्।

कारणेन कार्यनिर्देशमधिकृत्योक्तम्- **"षड्विज्ञानकायाः"** इति।[३] यथा आयुष्मन् तवेन्द्रियाणि प्रसन्नानीति तथैव विपाकविज्ञानस्य सूक्ष्मत्वात् तत्स्वभावनिर्देशः कर्तुं न शक्यते, अतः फलनिर्देशः क्रियते। तद् विज्ञानमपि संस्कारैर्येन क्रमेण नामरूपादीन् अभिनिर्वर्तयति, तेनैव आक्षेपकक्रमेण प्रत्ययं भवति। अनेन तावद् विज्ञानप्रत्ययं नामरूपमित्यतः स्पर्शप्रत्यया वेदनेति यावत् प्रतिपादितम्।

कतमन्नामरूपम्? मातुः कुक्षौ प्रतिसन्धिकाले ये वेदनादयश्चत्वारोऽरूपिणः स्कन्धास्तन्नाम, यत् किञ्चिद् रूपं तत् सर्वं महाभूतानि महाभूतहेतुकृतानि चेति यथायथं योगः करणीयः। तदेव प्रथमं कललमित्युच्यते। क्रमेण अर्बुदादीनां विकासक्रमोऽपि प्रज्ञायते।[४] तत्र चत्वारः (अरूपिणः) स्कन्धास्तावत् पुनर्भवनामनत्वाद् प्रदेशगमकत्वाच्च नामेत्युच्यन्ते, महाभूतानि तद्धेतुकृतानि (भौतिकानि) च

---

[१] द्रष्टव्यम्-- बालो हि प्रतीत्यसमुत्पन्नं संस्कारमात्रमिदमिति अप्रजानन् आत्मदृष्ट्यस्मिमानाभिनिविष्ट आत्मनः सुखार्थमदुःखार्थं वा कायादिभिस्त्रिविधं कर्मारभते- आयतिसुखार्थं पुण्यम्, सुखादुःखासुखार्थमानिञ्ज्यम्, ऐहिकसुखार्थमपुण्यम्।

--अभि.को.भा., पृ. ४६०, बौ.भा.प्र. १९८७।

[२] प्रती.समु.वि.नि.सू.(म.सू.सं.), पृ. ११७, मि.सं. १९६१।

[३] प्रती.समु.वि.नि.सू.(म.सू.सं.), पृ. ११७, मि.सं. १९६१।

[४] द्रष्टव्यम्--

कललं प्रथमं भवति कललाज्जायतेऽर्बुदः।
अर्बुदाज्जायते पेशी पेशीतो जायते घनः ।।
घनात् प्रशाखा जायन्ते केशरोमनखादयः।
इन्द्रियाणि च रूपीणि व्यञ्जनान्यनुपूर्वशः।।

--अभि.को.भा., पृ. ४३३, बौ.भा.प्र. १९८७।

शीतादिभिश्च तेषु विकारोत्पादनाद् रूपमित्युच्यन्ते। तदेव नामरूपं विवृद्धिक्रमेण यदा चक्षुरादयः प्रादुर्भवन्ति तदवस्थायां षडायतनप्रत्ययं भवति। सा खलु अवस्था षडायतनानां परिपूर्णावस्था। षडायतनानि तावच्चित्त-चैतसिकानामायद्वाराणीत्यर्थः। तेषां षडायतनानां परिपाकात् विषयसम्पर्केण स्पर्श उत्पद्यते। तस्य च आश्रयविशेषवशात् षट्प्रकारा भवन्ति।

यज्जातीयः सुखादिस्पर्शो जायते, ततस्तज्जातीया सुखा दुःखा अदुःखासुखा च वेदना समुत्पद्यते। एवं संस्कारैः आक्षिप्ताङ्गानां तृष्णोपादानाभ्याम् अभिषेचनं मृत्युपर्यन्तं भवः। ततः आक्षेपक्रमेण जातिरपि जराऽपि मरणमपि जायते। तत्र तृष्णा कतमा? सुखवेदनातोऽवियोगेच्छा, दुःखवेदनातो वियोगेच्छा, अदुःखासुखवेदनायां तु द्वयमपि न भवति। यथोक्तं सूत्रे-- **''कामरूपारूपेषु चर्याविशेषेण त्रिविधा निर्दिष्टा''** इति।[१]

उपादानं कतमत्? कामादिषु यो हि छन्दरागः। सूत्रे चोक्तम्-- **''कामोपादानं दृष्ट्युपादानं शीलव्रतोपादानम् आत्मवादोपादानं चेति''**[२] - चत्वारि उपादानानि। छन्दरागस्तावत् कामादीनामुपादानात्। तृष्णोपादानयोः हि को विशेषः? विशेषाभावेऽपि भवाभिलाषस्तृष्णा, विशेषेणउत्कटाभिलाषा उपादानम्। अथवा (भवस्य) दूरहेतुस्तृष्णा आसन्नहेतुस्तावदुपादानमिति ज्ञेयम्। तृष्णोपादानाभ्यामभिषिञ्चितं संस्कारबीजं फलोत्पादकत्वेनाभिलक्षितं **'भवः'** इत्युच्यते। यथोक्तं सूत्रे-- **''कामभवः रूपभवः आरूप्यभवश्चेति''।**[३] एवमुक्तेऽप्यत्र अतीतभव एव कथितः।

भवानन्तरं जातिः। क्रमेण नामरूपतो वेदनापर्यन्तं जातितो जरामरणादीनि भवन्ति। **एवमस्येत्यादिना** यथोक्तक्रमेण दुःखस्कन्धोदय आत्मनोऽभावश्चेति द्वयं सिध्यति। सूत्रे हि जात्यादयः पर्यायमात्रेणैव निर्दिष्टाः।[४] एवमेवात्र

---

[१] प्रती.समु.वि.नि.सू.(म.सू.सं.), पृ. ११८, मि.सं. १९६१।

[२] प्रती.समु.वि.नि.सू.(म.सू.सं.), पृ. ११८, मि.सं. १९६१।

[३] प्रती.समु.वि.नि.सू.(म.सू.सं.), पृ. ११८, मि.सं. १९६१।

[४] तुलनीयम्--

द्वादशाङ्गप्रतीत्यसमुत्पादः तावच्चतुर्ष्वप्यङ्गेषु संक्षिप्यते, तद्यथा-- आक्षेपकाङ्गम् आक्षिप्ताङ्गम् अभिनिर्वर्तकाङ्गम् अभिनिर्वृत्त्यङ्गं चेति।

द्वादशाङ्गानि गण्यन्ते संक्षेपेण चतुर्ष्वपि ।
त्रीणि चत्वारि चाङ्गानि त्रीणि द्वे च क्रमेण वै[1] ।।

एवं यदि जन्मद्वयव्यवस्थामधिकृत्य उच्येत तदा सूत्रे अविद्या संस्काराश्च पूर्वान्तसम्बद्धा आक्षेपकाङ्गमिति। जन्मत्रयमुद्दिश्य यदि द्वादशाङ्गानि व्यवस्थीयेरन् तदा अविद्या संस्काराश्चातीते जन्मनि भवन्ति। विज्ञानादारभ्य भवपर्यन्तं (अष्टौ

त्रिभ्यो भवति द्वन्द्वं द्वन्द्वात्प्रभवन्ति सप्त सप्तभ्यः।
त्रय उद्भवन्ति भूयस्तदेव तु भ्रमति भवचक्रम्।।

--प्र.समु.हृ., ३ का. ; ध.धा.द.गी. (दीपंकरश्रीज्ञान-प्रणीतः पञ्चग्रन्थसंग्रहः), ९२ का., ति.सं. १९९९।

[1] द्रष्टव्यम्-- कथमङ्गसमासतोऽपि। आक्षेपाङ्गमाक्षिप्ताङ्गमभिनिर्वर्त्तकाङ्गमभिनिर्वृत्त्यङ्गं च। आक्षेपकाङ्गं कतमत्। अविद्या संस्कारा विज्ञानं च। आक्षिप्ताङ्गं कतमत्। नामरूपं षडायतनं स्पर्शो वेदना च। अभिनिर्वर्त्तकाङ्गं कतमत्। तृष्णा उपादानं भवश्च। अभिनिर्वृत्त्यङ्गं कतमत्। जातिर्जरामरणं च। कथमङ्गप्रत्ययत्वव्यवस्थानतः। वासनातोऽप्यावेधतोऽपि मनसिकारतोऽपि सहभावतोऽप्यङ्गानां प्रत्ययत्वव्यवस्थानं वेदितव्यं तच्च यथायोगम्। कथमङ्गकर्मव्यवस्थानतः। अविद्या किंकर्मिका। भवे च सत्त्वान् संमोहयति प्रत्ययश्च भवति संस्काराणाम्। संस्काराः किंकर्मकाः। गतिषु च सत्त्वान् विभजन्ति प्रत्ययाश्च भवन्ति विज्ञानवासनायाः। विज्ञानं किकर्मकम्। सत्त्वानां कर्मबन्धं च धारयति प्रत्ययश्च भवति नामरूपस्य। नामरूपं च किंकर्मकम्। आत्मभावं च सत्त्वान् ग्राहयति प्रत्ययश्च भवति षडायतनस्य। षडायतनं किंकर्मम्। आत्मभावपरिपूरिं च सत्त्वान् ग्राहयति प्रत्ययश्च भवति स्पर्शस्य। स्पर्शः किंकर्मकः। विषयोपभोगे च सत्त्वान् प्रवर्त्तयति प्रत्ययश्च भवति वेदनायाः। वेदना किंकर्मिका। जन्मोपभोगे च सत्त्वान् प्रवर्त्तयति प्रत्ययश्च भवति तृष्णायाः। तृष्णा किंकर्मिका। जन्मनि च सत्त्वानाकर्षयति प्रत्ययश्च भवति उपादानस्य। उपादानं किंकर्मकम्। पुनर्भवादानार्थं सोपादानं च सत्त्वानां विज्ञानं करोति प्रत्ययश्च भवति भवस्य। भवः किंकर्मकः। पुनर्भवे च सत्त्वानभिमुखीकरोति प्रत्ययश्च भवति जातेः। जातिः किंकर्मिका। नामरूपषडायतनस्पर्शवेदनानुपूर्व्या च सत्त्वानभिनिर्वर्त्तयति प्रत्ययश्च भवति जरामरणस्य। जरामरणं किंकर्मकम्। पुनः पुनर्वयःपरिणामेन जीवितपरिणामेन च सत्त्वान्योजयति। --अभि.समु., पृ. २६-२७, वि.भा.प्र., १९५० ;

आक्षेपकं तथाऽऽक्षिप्तम् अभिनिर्वृतनिर्वृती।
आदीनवः क्रमादङ्गम् त्रिचतुस्त्र्यैकमेककम्।। ८९।।

--ध.धा.द.गी. (दीपंकरश्रीज्ञान-प्रणीत पञ्चग्रन्थसंग्रहीत, पुनरुद्धार), ति.सं. १९९९।

अङ्गानि) प्रत्युत्पन्नजन्मनि भवन्ति। जाति-जरामरणानि तावदनागते जन्मनि जायन्ते[1]। अतीतजन्मिकैः अविद्याप्रत्ययैः संस्कारैः प्रत्युत्पन्नेऽस्मिन् जन्मनि प्रतिसन्धिविज्ञानाद्

---

[1] द्रष्टव्यम्--

स प्रतीत्यसमुत्पादो द्वादशाङ्गस्त्रिकाण्डकः।
पूर्वापरान्तयोर्द्वे द्वे मध्येऽष्टौ परिपूरिणः ।।२०।।

त्रीणि काण्डानि पूर्वापरान्तमध्यान्यतीतानागतप्रत्युपन्नानि जन्मानि। कथमेषु त्रिकाण्डेषु द्वाद्वशाङ्गानि व्यस्थाप्यन्ते? अविद्या संस्काराश्च पूर्वान्ते, जातिर्जरामरणं चापरान्ते। शेषाण्यष्टौ मध्ये।........ **पूर्वक्लेशा दशाऽविद्या, ...।** या पूर्वके जन्मनि क्लेशावस्था, सेहाविद्येत्युच्यते; साहचर्यात् तद्वशेन तेषां समुदाचाराच्च। राजागमनवचने तदनुयातृकागमनसिद्धवत्। ..... **संस्काराः पूर्वकर्मणः।** 'दश' इति वर्तते। पूर्वजन्मन्येव या पुण्यादिकर्मावस्था सेह संस्कारा इत्युच्यते, यस्य कर्मण इह विपाकः। **सन्धिस्कन्धास्तु विज्ञानम्, ...।** मातुः कुक्षौ प्रतिसन्धिक्षणे पञ्च स्कन्धा विज्ञानम्। .... **नामरूपमतः परम्।।२१।। प्राक् षडायतनोत्पादात्, ...।** सन्धिचित्तात् परेण यावत् षडायतनं नोत्पद्यते साऽवस्था नामरूपं तावत् षडायतनमित्युच्यते। प्राक्चतुरायतनोत्पादादिति वक्तव्ये षडायतनवचनं तदा तद्व्यवस्थापनात्। **...तत्पूर्वं त्रिकसङ्गमात्।** उत्पन्ने षडायतने सावस्था तावत् षडायतनमित्युच्यते यावदिन्द्रिय-विषय-विज्ञानत्रिकसन्निपातः। **स्पर्शः प्राक् सुखदुःखादिकारणज्ञानशक्तितः।।२२।।** त्रयाणां सन्निपातात् स्पर्शो भवति। स यावद्वेदनात्रयकारणपरिच्छेदेन भवति साऽवस्था स्पर्श इत्युच्यते।। परिच्छेदसामर्थ्ये सति-- **वित्तिः प्राङ् मैथुनात्, ...।** वेदनावस्था यावन्मैथुनरागो न समुदाचरति। .... **तृष्णा भोगमैथुनरागिणः।** कामगुणमैथुनरागसमुदाचारावस्था तृष्णेत्युच्यते, यावन्न तद्विषयपर्येष्टिमापद्यते। **उपादानं तु भोगानां प्राप्तये परिधावतः।।२३।।** यस्यामवस्थायां विषयप्राप्तये पर्येष्टिमापन्नः सर्वतो धावति, असाववस्था उपादानमित्युच्यते।। तथा च परिधावन्-- **स भविष्यद्भवफलं कुरुते कर्म तद् भवः।** स विषयाणां प्राप्तिहेतोः परिधावन् पौनर्भविकं कर्मोपचिनोति सोऽस्य भवः। तेन हि कर्मणा पुनरितः प्रच्युतस्यायत्यां प्रतिसन्धिर्भवति। योऽसौ, **प्रतिसन्धिः पुनर्जातिः .....।** यदेवेह विज्ञानाङ्गं तदेवास्यान्यत्र जन्मनि जातिः। तत ऊर्ध्वम्-- .... **जरामरणमा विदः।।२४।।** जातेः परेण यावद्वेदनावस्था जरामरणम्। यान्येवेह चत्वार्यङ्गानि-- नामरूपषडायतनस्पर्शवेदनाः, तान्येवान्यत्र जरामरणमित्येतानि द्वादशाङ्गानि।।

--अभि.को.भा. ३/२०-२४, पृ. ४३५-४३८, बौ.भा.प्र. ;

ध.धा.द.गी. ८१-८६ का. (दीपंकरश्रीज्ञान-प्रणीतः पञ्चग्रन्थसंग्रहः), ति.सं., १९९९ ;

तत्र पूर्वजन्मनि क्लेशावस्था इह अविद्या, तथा पुण्यादिकर्मावस्थाः संस्काराः, तथा इह जन्मनि प्रतिसंधिक्षणे पञ्च स्कन्धा विज्ञानम्। संधिचित्तात् परेण षडायतनोत्पादात् पूर्वं नामरूपम्। ततो यावदिन्द्रियविषयविज्ञानत्रिकसंनिपातो न भवति, तावत् षडायतनम्। यावत् वेदनात्रयकारणपरिच्छेदकमर्थो न भवति, तावत् त्रिकसंनिपातात् स्पर्शः। मैथुनरागात् प्राक् सुखाद्यनुभवावस्था वेदना। विषयपर्येषणावस्थातः प्राक् कामगुणमैथुनरागसमुदाचारावस्था तृष्णा।

वेदनापर्यन्तं विपाको निष्पाद्यते। प्रत्युत्पन्नैस्तृष्णोपादानभवैश्च अनागतजन्मनि जातिजरामरणानि निष्पाद्यन्त इति वेदितव्यम्।

त्रिषु जन्मसु व्यवस्थाया अस्याः प्रयोजनं तावत् पूर्वापरान्तमध्येषु विद्यमानस्य संमोहस्य निवृत्तिरेवेति ह्युक्तं तथापि अविद्याप्रत्ययैः संस्कारैः प्रतिसन्धानोत्पादकाले तृष्णोपादानभवाश्चापि विद्यन्त एव, तथैव तृष्णोपादानभवैश्चापि अनागते काले जातिरुत्पाद्यते तदाऽपि अविद्याप्रत्ययाः संस्काराः संविद्यन्त एव। नामरूपादिभ्यश्च नान्या जात्यादयः, अत एव ते अन्येन प्रकारेणोच्यन्ते। तस्माज्जन्मद्वयव्यवस्थायां नास्ति कश्चन विरोधः। स प्रतीत्यसमुत्पादस्तावदध्वत्रयेणापि वेदितव्यः। तद्यथा-- अविद्यातृष्णोपादानानि क्लेशाध्वा। संस्कारा भवश्च कर्माध्वा। शेषाण्यङ्गानि तावद् विपाकोऽध्वेत्यलं विस्तरेण ।[१]

सामान्यरूपेण तावदधुना प्रतिपाद्यते--

विषयपर्येषणावस्था उपादानम्। विषयप्राप्तिहेतुपरिधावनोपार्जितपौनर्भविकं कर्म भवः। तेन कर्मणा आयत्यां पुनः प्रतिसंधिर्जातिः। ततः परेण यावद्वेदनावस्था सा जरामरणम्। इत्याद्यन्तयोर्द्वे द्वे मध्यस्थौ इति त्रिकाण्डो द्वादशाङ्गः प्रतीत्यसमुत्पादोऽस्य क्षयाभावादक्षयत्वेनेति पूर्ववत्।

--आलोक, पृ. ५२२, मि.सं.।

[१] द्रष्टव्यम्-- स पुनरेष द्वादशाङ्गः प्रतीत्यसमुत्पादस्त्रिस्वभावो वेदितव्यः क्लेशकर्मवस्तूनि। तत्र-- **क्लेशास्त्रीणि,** त्रीण्यङ्गानि क्लेशस्वभावानि-- अविद्यातृष्णोपादानानि। **द्वयं कर्म,** अङ्गद्वयं कर्मस्वभावम्-- संस्काराः, भवश्च। **सप्त वस्तु,** सप्ताङ्गानि वस्तुस्वभावानि-- विज्ञाननामरूपषडायतनस्पर्शवेदनाजातिजरामरणानि; क्लेशकर्माश्रयत्वात्। यथा च वस्तु सप्ताङ्गानि, **फलं तथा।** सप्तैवाङ्गानि फलभूतानि। शेषाणि पञ्च हेतुभूतानि; कर्मक्लेशस्वभावत्वात्।

--अभि.को.भा. ३/२६, पृ. ४४२, बौ.भा.प्र. ; ध.धा.द.गी. (दीपंकरश्रीज्ञान-प्रणीतः पञ्चग्रन्थसंग्रहः), ८७-८८ का., ति.सं. १९९९ ;

कथमङ्गसंक्लेशसंग्रहतः। या चाविद्या या च तृष्णा यच्चोपादानमित्ययं संक्लेशसंग्रहः। ये च संस्कारा यच्च विज्ञानं यश्च भव इत्ययं कर्मक्लेशसंग्रहः। शेषाणि जन्मसंक्लेशसंग्रहः।।

--अभि.समु., पृ. २७, वि.भा.प्र. ;

अत्र च प्रतीत्यसमुत्पादे त्रीण्यङ्गानि क्लेशस्वभावानि-- अविद्यातृष्णोपादानानि ; अङ्गद्वयं कर्मस्वभावं-- संस्कारा भवश्च ; सप्ताङ्गानि वस्तुस्वभावानि-- विज्ञाननामरूपषडायतनस्पर्शवेदनाजातिजरामरणाख्यानि, क्लेशकर्महेतुत्वात्।

--अ.वि.सू.नि., पृ. ९९, के.पी.जा.सं., १९७१।

गम्भीरोऽनर्घकोशः प्रियः प्रतीत्योत्पादो जिनवचनानाम् ।
सम्यगिमं यः पश्यति स च पश्यति तत्त्वदर्शिनं बुद्धमेव ।।११२।।

इत्यनेन प्रतीत्यसमुत्पादस्यानुशस्यं प्रदर्शितम्। तथागतवचनेषु हृद्यतमोऽयं प्रतीत्यसमुत्पादः। य इमं प्रतीत्यसमुत्पादं सम्यग्-रूपेणावजानाति, स तथागतदेशनां सम्यग् अवबुध्यति। **गम्भीरः** इत्यनेनास्य गभीरत्वमादर्शितम्।[1] **सम्यगिमं यः पश्यति** इत्यादिना भगवता बुद्धेन अनुत्तरानास्रवज्ञानाधिगमेन गम्भीरत्वमेव देशितम्। प्रतीत्यसमुत्पादस्यावगमात् तज्ज्ञाने सति प्रतीत्यसमुत्पादस्य गम्भीरमाभाषितम्। यथोक्तम्-- **''यो भिक्षवः, प्रतीत्यसमुत्पादं पश्यति, स धर्मं पश्यति, यो धर्मं पश्यति, स बुद्धं पश्यति''** इति[2]। अथवा अनेन जिनवचनानां निधानत्वं निर्दिष्टम्।

गम्भीरत्वं तावदस्येत्थं ज्ञातव्यम्-- **''न स्वयं कृतम्, न परकृतम्, नोभयकृतम्, न चाहेतुतः कृतम्** इति।[3] एवं **न स्वतो नापि परतो न द्वाभ्यां न**

---

[1] द्रष्टव्यम्-- गम्भीरः प्रतीत्यसमुत्पाद उक्तो भगवता। कथं गम्भीरो वेदितव्यः। दशभिराकारैः प्रतीत्यसमुत्पादस्य गम्भीरार्थो द्रष्टव्यः। यदुतानित्यार्थं दुःखार्थं शून्यार्थं नैरात्म्यार्थं चारभ्य। तत्रानित्यार्थमारभ्य स्वबीजाच्च जायन्ते। परप्रत्ययं चापेक्ष्य परप्रत्ययतश्च जायन्ते। स्वबीजं चापेक्ष्य स्वबीजात्परप्रत्ययतश्च जायन्ते। न च बीजप्रत्यययोस्तज्जननं प्रति काचिदीहा वा चेष्टा वा व्यापारो वा विद्यते। न च बीजप्रत्यययोरीहा वा चेष्टा वा व्यापारो वा विद्यते। न च पुनस्तयोर्हेतुत्वसामर्थ्यं न विद्यते। अनादिप्रतिषिद्धलक्षणानि चाङ्गानि प्रतिक्षणं च नव-नव-लक्षणानि प्रवर्तन्ते। क्षणभङ्गुरश्च प्रतीत्यसमुत्पादः। अवस्थितप्रकारतया च ख्याति।

--यो.भू. पृ. २२८, कल.वि.प्र., १९५७ ;

ये धर्मा हेतुप्रभवा हेतुं तेषां तथागतो ह्यवदत् ।
तेषां च यो निरोध एवंवादी महाश्रमणः ।। --(बुद्धवचनम्)

[2] यो भिक्षवः ! प्रतीत्यसमुत्पादं पश्यति, स धर्मं पश्यति। यो धर्मं पश्यति, स बुद्धं पश्यति ।

--शालि.सू.(म.सू.सं.), पृ. १००, मि.सं.।

[3] अत्राह- यदि स्वतः परतः उभयतोऽहेतुतश्च नास्ति भावानामुत्पादः, तत्र कथमविद्याप्रत्ययाः संस्कारा इत्युक्तं भगवता? उच्यते, संवृतिरेव न तत्त्वम्। किं संवृतेर्व्यवस्थानं वक्तव्यम्? इदंप्रत्ययतामात्रेण संवृतेः सिद्धिरभ्युपगम्यते। न तु पक्षचतुष्टयाभ्युपगमेन सस्वभाववादप्रसङ्गात्, तस्य चायुक्तत्वात्। इदंप्रत्ययतामात्राभ्युपगमे हि सति हेतुफलयोरन्योन्यापेक्षत्वान्नास्ति स्वाभाविकी सिद्धिरिति नास्ति सस्वभाववादः। अत एवोक्तम्--

"स्वयं कृतं परकृतं द्वाभ्यां कृतमहेतुकम् ।

चाहेतुतो (धर्माः) उत्पद्यन्ते[१] । अपि च, अविद्याप्रत्ययाः संस्काराः इत्थं शेषाण्यपि तत्सदृशान्येव। एकान्तेन अविद्याऽपि 'अहं संस्कारान् उत्पादयिष्यामीति' न विचिन्तयति, संस्कारा अपि 'वयम् अविद्यया उत्पन्नाः' इति न चिन्तयन्ति। अविद्याया अभावे च संस्कारा नैव प्रादुर्भवन्ति। एवमपि पूर्वं कश्चन कर्ता नोपलभ्यते, ततश्च वेदितव्यं प्रतीत्यसमुत्पादस्य गम्भीरत्वम्।

एवं प्रतीत्यसमुत्पादे कुशलीभावेन चतुरार्यसत्यालम्बकं मार्गं भावयितुं समर्थो जायते भावक इति दर्शयितुमाह--

शमाय भाव्याः सम्यग्दृष्टिसंकल्पवाक्कर्माजीवस्मृति- ।

तार्किकैरिष्यते दुःखं त्वया तूक्तं प्रतीत्यजम्।। (लोका. स्तवः ९का.),

इहापि वक्ष्यति--

प्रतीत्य कारकः कर्म तं प्रतीत्य च कारकम्।
कर्म प्रवर्तते नान्यत् पश्यामः सिद्धिकारणम् ।।(म.शा. ८.१२)

--म.शा.वृ., पृ. २०-२१, बौ.भा.प्र. १९८३।

[१] न स्वतो नापि परतो न द्वाभ्यां नाप्यहेतुतः।
उत्पन्ना जातु विद्यन्ते भावाः क्वचन केचन ।। (म.शा. ३)

.. स्वत उत्पादो न सम्भवति, सा--

तस्माद्धि तस्य भवने न गुणोऽस्ति कश्चिज्ज्ञातस्य जन्म पुनरेव च नैव युक्तम्। (म.अ. ६/८), इत्यादिना मध्यमकावतारादिद्वारेणावसेया। आचार्यबुद्धपालितस्त्वाह-- न स्वत उत्पद्यन्ते भावाः ; तदुत्पादवैयर्थ्यात्, अतिप्रसंगदोषाच्च। न हि स्वात्मना विद्यमानानां पदार्थानां पुनरुत्पादे प्रयोजनमस्ति। अथ सन्नपि जायेत, न कदाचिन्न जायेत इति। ....परतोऽपि नोत्पद्यन्ते भावाः ; पराभावादेव। एतच्च-- **न हि स्वभावो भावानां प्रत्ययादिषु विद्यते। (म.शा. १/५),** इत्यत्र प्रतिपादयिष्यति। ततश्च पराभावादेव नापि परत उत्पद्यन्ते। अपि च--

अन्यत् प्रतीत्य यदि नाम परोऽभविष्यज्जायेत तर्हि बहुलः शिखिनोऽन्धकारः।
सर्वस्य जन्म च भवेत् खलु सर्वतश्च तुल्यं परत्वमखिलेऽजनकेऽपि यस्मात् ।।(म.अ. ६/१४)

इत्यादिना परत उत्पत्तिप्रतिषेधोऽवसेयः। ......द्वाभ्यामपि नोपजायन्ते भावाः, उभयपक्षाभिहितदोषप्रसङ्गात्, प्रत्येकमुत्पादासामार्थ्याच्च। वक्ष्यति हि-- **स्यादुभाभ्यां कृतं दुःखं स्यादेकैककृतं यदि।** (म.शा. १२/९) इति। अहेतुतोऽपि नोत्पद्यन्ते-- **हेतावसति कार्यं च कारणं च न विद्यते।** (म.शा. ८/४), इति वक्ष्यमाणदोषप्रसङ्गात्। **गृह्यते नैव च जगद्यदि हेतुशून्यं स्याद्यद्वदेव गगनोत्पलवर्णगन्धौ।** (म.अ. ६/९९), इत्यादिदोषप्रसङ्गाच्च।।

--म.शा.वृ., १/३, पृ. ६, १३-१४, बौ.भा.प्र. १९८३।

समाधिव्यायामेत्यार्याष्टाङ्गिकमार्गाश्चैते चारुतया[१] ।।११३।।

---

[१] द्रष्टव्यम्-- तत्र भिक्षवः कतम आर्याष्टाङ्गो मार्गः? तद्यथा-- सम्यग्दृष्टिः, सम्यक्संकल्पः, सम्यग्वाक्, सम्यक्कर्मान्तः, सम्यगाजीवः, सम्यग्व्यायामः, सम्यक्स्मृतिः सम्यक्समाधिश्च। तत्र भिक्षवः सम्यग्दृष्टिः कतमा? अस्त्ययं लोकः। अस्ति परलोकः। अस्ति माता। अस्ति पिता। अस्ति दत्तम्। अस्ति हुतम्। अस्ति इष्टानिष्टसुकृतदुष्कृतानां कर्मणां फलविपाकः। सन्ति लोके सम्यग्गताः, सम्यक्प्रतिपन्ना इति। इयं भिक्षवः सम्यग्दृष्टिः। तद्विपरीता मिथ्यादृष्टिः।

सम्यक्संकल्पः कतमः? बुद्धत्वादिपरिणामितं शीलं दानं च, न चक्रवर्त्त्यादिपरिणामितम्। अयं भिक्षवः सम्यक्संकल्पः।

सम्यग्वाक् कतमा? इह भिक्षवः पारुष्यानृतपैशुन्यसम्भिन्नप्रलापवर्जिता वाक्। इयमुच्यते भिक्षवः सम्यग्वाक्।

सम्यक्कर्मान्तः कतमः? कायवाङ्मनसां दशकुशलेषु कर्मपथेषु व्यापारः। तत्र कायिकं त्रिविधम्- प्राणातिपातादत्तादानकाममिथ्याचाराद्विरतिः। वाचिकं चतुर्विधम्- अनृतपैशुन्यपारुष्यसम्भिन्नप्रलापाद् विरतिः। मानसं त्रिविधम्- अभिध्याव्यापादमिथ्यादृष्टिभ्यो विरतिः।

तत्र सम्यगाजीवः कतमः? भिक्षोस्तावत् कुहना लपना नैमितिकत्वं नैष्पेषिकत्वं लाभेन लाभप्रतिकांक्षा च। तत्र कुहना कतमा? भिक्षुर्दानपतिं दृष्ट्वा पर्यङ्कं बद्ध्वा पथि शून्यागारे वा निषीदति- ध्यायी भिक्षुरयमर्हन्निति लाभसत्कारो मे भविष्यति। एवमादिका कुहनेत्युच्यते। तत्र लपना कतमा? इह भिक्षुर्लाभसत्कारनिमित्तमेव त्वं मे माता, त्वं मे पिता, त्वं मे भगिनी, त्वं मे दुहितेति एवमन्यान्यपि प्रियवचनानि ब्रवीति। एवमादिका लपनेत्युच्यते। तत्र नैमित्तिकत्वं कतमत्? भिक्षुस्तावत् पिण्डपातं परिभुज्य असकृद् ब्रूते-- यादृशोऽयं पिण्डपास्तादृशोऽन्येषूपासकगृहेषु न लभ्यते। अलाभसत्कारचित्तस्य तु वदतोऽदोषः। इदमुच्यते नैमित्तिकत्वम्। तत्र नैष्पेषिकत्वं कतमत्? भिक्षुस्तावत् यत्र गृहे पिण्डपातं न लभते, दापयितुकामश्च भवति, तत्र ब्रूते-- अदानपतयो हि निरयं गच्छन्ति। यूयमप्यदानपतयो व्यक्तं निरयगामिन इति। नरकभयभीताः पिण्डपातमनुप्रयच्छन्ति। तं च लब्ध्वा परिभुङ्क्ते। इदमुच्यते नैष्पेषिकत्वम्। तत्र लाभेन लाभप्रतिकांक्षा कतमा? भिक्षुस्तावदात्मीयेन धनेन शोभनानि चीवराणि चोपक्रीय उपासकेभ्यो दर्शयति-- ईदृशानि वयं वस्त्राणि लाभामहे इति। ते लज्जिता यानि वस्त्राणि प्रयच्छन्ति तानि परिभुङ्क्ते। इयमुच्यते भिक्षवो लाभेन लाभप्रतिकांक्षा। अयं भिक्षवो मिथ्याजीवः। अस्माद्विरतिरिति सम्यगाजीवः।

इह खलु भिक्षवः उपासकस्य मिथ्याजीवः। विषविक्रयः, शस्त्रविक्रयः, सत्त्वविक्रयः, मद्यविक्रयः, मांसविक्रयः, अप्रत्यवेक्षिततिलसर्षपपीडनं मिथ्याजीवः। अस्माद्विरतिः। अयमुच्यते भिक्षवः सम्यगाजीवः।

तत्र सम्यग्व्यायामः कतमः? इह भिक्षवोऽभिवादनवन्दनप्रत्युत्थानाञ्जलिसामीचीकर्म करणीयम्। अयमुच्यते भिक्षवः सम्यग्व्यायामः।

तत्र भिक्षवः सम्यक्स्मृतिः कतमा? इह खलु भिक्षवो भिक्षुः स्त्रियं दृष्ट्वा उत्पन्ने रागे बाह्याध्यात्मिकयोः शरीरयोरशुभाकारेण यथाभूतदर्शी भवति-- सन्त्यस्मिन् काये केशा रोमाणि नखा दन्ता रजो मलं त्वङ्

इत्यत्र **सम्यग्दृष्टिस्तावदनास्रवा** प्रज्ञा। लपनादिवितथाजीवविरतिः **सम्यगाजीवः**। वीर्यं तावत् **सम्यग्व्यायामः**, स एव चत्वारि सम्यक्प्रहाणानि। आलम्बनानुस्मृतिरेव **सम्यक्स्मृतिः**। सा च चतस्रः स्मृतयः, तथा हि--कायगतानुस्मृतिः, वेदनानुस्मृतिः, चित्तानुस्मृतिः धर्मानुस्मृतिश्चेत्यालम्बनानुस्मृतयः।[1]

मांसम् अस्थि स्नायुः शिरा वृक्का हृदयं प्लीहा क्लोमकः आमाशयः पक्वाशयः अन्त्राणि अन्त्रगुणाः औदरीयकं यकृत् पुरीषम् अश्रुः स्वेदः खेटः सिंहाणको वसा लसिका मज्जा मेदः पित्तं श्लेष्मा पूयं शोणितं मस्तकं मस्तकलुङ्गः उच्चारप्रस्रावैः पूर्णं नानाप्रकारस्याशुचेरिति। इयमुच्यते भिक्षवः सम्यक्स्मृतिः।

सम्यक्समाधिः कतमः? चत्वारि ध्यानानि। इह भिक्षवो भिक्षुर्विविक्तं कामैर्विविक्तं पापकैरकुशलधर्मैः सवितर्कं सविचारं विवेकजं प्रीतिसुखं प्रथमं ध्यानमुपसंपद्य विहरति। स वितर्कविचाराणां व्युपशमादध्यात्मसंप्रसादाच्चेतस एकोतीभावादवितर्कमविचारं समाधिजं प्रीतिसुखं द्वितीयं ध्यानमुपसंपद्य विहरति। स प्रीतेर्विरागादुपेक्षको विहरति स्मृतः संप्रजानन् सुखं च कायेन प्रतिसंवेदयति। यत्तदार्या आचक्षते उपेक्षकः स्मृतिमान् सुखविहारीति तृतीयं ध्यानमुपसंपद्य विहरति। स सुखस्य च प्रहाणाद् दुखस्य च प्रहाणात् पूर्वमेव च सौमनस्यदौर्मनस्ययोः अस्तङ्गमाददुःखासुखमुपेक्षास्मृतिपरिशुद्धं चतुर्थं ध्यानमुपसंपद्य विहरति। इमानि खलु भिक्षवश्चत्वारि ध्यानानि। अयमुच्यते सम्यक्समाधिः। अयं भिक्षव आर्याष्टाङ्गो मार्गः।

--अ.वि.सू., पृ. ३४-४२, २३१, के.पी.जा.सं., १९७१ ; ध.सं.(म.सू.सं.), पृ. ३३२ ; समा.सू., पृ. ३७३ ; बौ.द.मी.(हिन्दी), पृ. ५५ ; बौ.सि.सा.(हिन्दी), पृ. ७६ ; श.प्र.सू., 'क' पुट् पृ. ५, भो.सं. ; अक्षय.म.सू., 'म' पुट्, भो.सं., पृ. १६५ ; शालि.सू.(म.सू.सं), पृ. १००, मि.सं. ;

अष्टानामार्यमार्गाङ्गानामालम्बनं कतमत्। तदुत्तरकालं चतुर्णामार्यसत्यानां यथाभूतता। स्वभावः कतमः। सम्यग्दृष्टिः सम्यक् संकल्पः, सम्यग् वाक्, सम्यक्कर्मान्तः सम्यगाजीवः सम्यग्व्यायामः सम्यक्स्मृतिः सम्यक्समाधिश्च। सम्यग्दृष्टिः परिच्छेदाङ्गम्। सम्यक्संकल्पः परसंप्रापणाङ्गम्। सम्यग्वाक्कर्मान्ताजीवाः परसंप्रत्ययाङ्गम्। दर्शनशीलाजीवविशुद्धितामुपादाय। सम्यग्व्यायामः क्लेशावरणविशोधनाङ्गम्। सम्यक्समाधिः वैशेषिकगुणावरणविशोधनाङ्गम्। सहायः कतमः। तत्संप्रयुक्ताश्चित्तचैतसिकाधर्माः। भावना कतमा। भावना तु बोध्यङ्गवत्। भावनाफलं कतमत्। परिच्छेदः परसंप्रापणं परसंप्रत्ययः क्लेशावरणविशोधनमुपक्लेशावरणविशोधनं वैशेषिकगुणावरणविशोधनं च।

--अभि.समु., पृ. ७४-७५, वि.भा.प्र., १९५०।

[1] द्रष्टव्यम्-- तत्र भिक्षवः कतमानि चत्वारि स्मृत्युपस्थानानि? १. इह भिक्षवो भिक्षुरध्यात्मं काये कायानुदर्शी विहरति, आतापी संप्रजानन् स्मृतिमान् विनीय लोके अभिध्यादौर्मनस्ये। बहिर्धा काये कायानुदर्शी विहरति। अध्यात्मबहिर्धाकाये कायानुदर्शी विहरति आतापी संप्रजानन् स्मृतिमान् विनीय लोकेऽभिध्यादौर्मनस्ये। २. अध्यात्मवेदनासु, बहिर्धावेदनासु, अध्यात्मबहिर्धावेदनासु वेदनानुदर्शी विहरति आतापी संप्रजानन् स्मृतिमान् विनीय लोके अभिध्यादौर्मनस्ये। ३. अध्यात्मचित्ते, बहिर्धाचित्ते,

स्मृत्युपस्थानान्येव स्मृत्युपस्थानमिति। ये स्मृत्युपस्थानस्यैवंविधं व्याख्यानमनुतिष्ठन्ति तेषां मतेन स्मृत्युपस्थानं तावत् प्रज्ञैव। चतुर्थध्यानं तावत् **सम्यक्समाधिः**। वाचिकाश्चत्वारः कुशलाः कर्मपथा एव **सम्यग्वागि**ति। विरतित्रयस्वभावाः कायिकाः कुशलाः कर्मपथास्तु **सम्यक्कर्मान्तः**। अव्यापाद-निर्याणादयो वितर्काः **सम्यक्संकल्पः**, विविधाः कुशलवितर्काश्च सम्यक्संकल्पः। आर्यमार्गस्येमानि अष्टौ अङ्गानि उपशमार्थं निर्वाणस्य चाधिगमाय भावयितव्यानि।

अस्य तावदार्यमार्गस्यालम्बनभूतानि चत्वारि आर्यसत्यानि[1] दर्शयितुमाह--

जातिरियं दुःखमेव तृष्णा च तस्य समुदयो महान् ज्ञेयः ।
निर्वृतिस्तन्निरोधस्तदधिगमाय चाष्टाङ्गिकोऽयं मार्गः ।।११४।।

इति । कतमानि चत्वारि तद्यथा- दुःखसत्यम्, समुदयसत्यम्, निरोधसत्यम्, मार्गसत्यञ्च। कतमत् दुःखसत्यम्? इत्युक्तम् । ''**संक्षेपेण पञ्चोपादानस्कन्धा**

अध्यात्मबहिर्धाचित्ते चित्तानुदर्शी विहरति आतापी संप्रजानन् स्मृतिमान् विनीय लोके अभिध्यादौर्मनस्ये। ४. अध्यात्मधर्मेषु, वहिर्धाधर्मेषु, अध्यात्मबहिर्धाधर्मेषु धर्मानुदर्शी विहरति आतापी संप्रजानन् स्मृतिमान् विनीय लोके अभिध्यादौर्मनस्ये। इमानि भिक्षवश्चत्वारि स्मृत्युपस्थानानि।

--अ.वि.सू., पृ. २८, के.पी.जा.सं.।

[१] द्रष्टव्यम्-- चत्वार्यार्यसत्यानि दुःखं समुदयो निरोधो मार्गश्च।

--अभि.समु., पृ. ३६, वि.भा.प्र. ;

तत्र भिक्षवः कतमानि चत्वार्यार्यसत्यानि? तद्यथा-- दुःखमार्यसत्यम्, दुःखसमुदय आर्यसत्यम्, दुःखनिरोध आर्यसत्यम्, दुःखनिरोधगामिनीप्रतिपदार्यसत्यम्।

--अ.वि.सू., पृ. १४, को.पी.जा.सं. ;

सूत्रेऽप्येष सत्यानां दृष्टान्त इति। व्याध्यादिसूत्रे। कथम्? ''चतुभिरङ्गैः समन्वागतो भिषक् शल्यापहर्ता राजार्हश्च भवति राजयोग्यश्च, राजाङ्गत्वे च संख्यां गच्छति। कतमैश्चतुर्भिः? आबाधकुशलो भवति, आबाधसमुत्थानकुशलः, आबाधप्रहाणकुशलः, प्रहीणस्य चाबाधस्यायत्यामनुत्पादकुशलः। एवमेव चतुर्भिरङ्गैः समन्वागतस्तथागतोऽर्हन् सम्यक्सम्बुद्धोऽनुत्तरो भिषक् शल्यापहर्तेत्युच्यते। कतमैश्चतुर्भिः? इह भिक्षवस्तथागतोऽर्हन् सम्यक्सम्बुद्ध इदं दुःखमार्यसत्यमिति यथाभूतं प्रजानाति। अयं दुःखसमुदयः, अयं दुःखनिरोधः, इयं दुःखनिरोधगामिनी प्रतिपदार्यसत्यमिति यथाभूतं प्रजानाति'' इति।

--अभि.को.टी., पृ. ८७३-८७४, बौ.भा.प्र. ; महा.व्यु. पृ. २६, भो.सं. ; ध.सं.(म.सू.सं.), पृ. ३३० ।

दुःखम्''[१] इत्युक्तम्। या हि पञ्चोपादानस्कन्धानां लाक्षणिकोत्पत्तिः सा दुःखसत्यम्।[२] जातिरपि सा संस्कारदुःखतया दुःखमिति वेदितव्यम्। एतदेवाभिप्रेत्य पञ्चोपादानस्कन्धा दुःखमिति निर्दिष्टम्। सूत्रे 'जातिर्दुःखम्' इत्यादिनाऽभिहितम्।[३]

समुदयसत्यं कतमत्? **तृष्णा च तस्य समुदयो महान्** इत्याद्याह। **येयं तृष्णा पौनर्भविकी नन्दीरागसहगता तत्र तत्राभिनन्दिनी, यदुत कामतृष्णा भवतृष्णा विभवतृष्णा चेति**। तस्येति दुःखस्य। अस्याः समस्तदुःखानामुदयो भवतीति (तृष्णा)

---

[१] कस्मात् स्कन्धा उपादानमित्युच्यन्ते। उपादानेन सहितत्वात् स्कन्धा उपादनमित्युच्यन्ते। उपादानं कतमत्। स्कन्धेषु च्छन्दो रागश्च। कस्माच्छन्दो रागश्चोपादानमित्युच्यते। अनागतवर्त्तमानस्कन्धानामभिनिर्वर्त्तनतोऽपरिहारतश्च। अनागतेऽभिलाषाद् वर्त्तमानेऽध्यवसानाच्च च्छन्दो रागश्चोपादानमित्युच्यते। कस्माद् धातव आयतनानि च सोपादानधर्मा इत्युच्यन्ते। तत्र स्कन्धवन्निर्देशः।

--अभि.समु., पृ. २, वि.भा.प्र. १९५० ।

[२] द्रष्टव्यम्-- दुःखसत्यं कतमत्। तत्सत्त्वजन्मतो जन्माधिष्ठानतश्च वेदितव्यम्। सत्त्वजन्म कतमत्। नरकसत्त्वजन्मतिर्यक्प्रेतेषु मनुष्येषु पूर्वविदेहेष्वपरगोदानीयेषु जाम्बूद्वीपेषु उत्तरेषु कुरुषु देवेषु चतुर्माहाराजकायिकेषु त्रायस्त्रिंशेषु यामेषु तुषितेषु निर्माणरतिषु परनिर्मितवशवर्त्तिषु ब्रह्मपुरोहितेषु महाब्रह्मेषु परित्ताभेष्वप्रमाणशुभेषु शुभकृत्स्नेष्वनभ्रकेषु पुण्यप्रसवेषु बृहत्फलेष्वसंज्ञिसत्त्वेष्वबृहेष्वतपेषु सुदृशेषु सुदर्शनेष्वकनिष्ठेष्वाकाशानन्त्यायतनेषु विज्ञानानन्त्यायतनेष्वाकिञ्चन्यायतनेषु नैवसंज्ञानासंज्ञायतनेषु।।

--अभि.समु., पृ. ३६, वि.भा.प्र. १९५०।

[३] द्रष्टव्यम्-- जातिर्दुःखं जरा दुःखं व्याधिर्दुःखं मरणं दुःखम् अप्रियसंप्रयोगो दुःखं प्रियविप्रयोगो दुःखं यदपीच्छन्न लभते तदपि दुःखं संक्षिप्तेन पञ्चोपादानस्कन्धा दुःखम्। जातिः किमुपादाय दुःखम्। संवाधदुःखतां तदन्यदुःखाश्रयतां चोपादाय। जरा किमुपादाय दुःखम्। काले विपरणतिदुःखतामुपादाय। व्याधिः किमुपादाय दुःखम्। भूतेषु विपरिणतिदुःखतामुपादाय। मरणं किमुपादाय दुःखम्। जीवितविप्रणाशदुःखतामुपादाय। अप्रियसंप्रयोगः किमुपादाय दुःखम्। संयोगजदुःखतामुपादाय। प्रियविप्रयोगः किमुपादाय दुःखम्। विप्रयोगजदुःखतामुपादाय। यदपीच्छन्न लभते तत् किमुपादाय दुःखम्। काम्यफलाभावजदुःखतामुपादाय। संक्षिप्तेन पञ्चोपादानस्कन्धाः किमुपादाय दुःखम्। दौष्ठुल्यदुःखतामुपादाय।

--अभि.समु., पृ. ३७, वि.भा.प्र.;

तद्यथा- जातिर्दुःखम्, जरादुःखम्, व्याधिर्दुःखम्, मरणं दुःखम्, प्रियवियोगो दुःखम्, अप्रियसंयोगो दुःखम्, यदपीच्छन् पर्येषमाणे न लभते तदपि दुःखम्, संक्षिप्तेन पञ्चोपादानस्कन्धा दुःखम्।

--अ.वि.सू., पृ. १५, के.पी.जा.सं.।

हेतुरित्यर्थः। महानित्यनेन तृष्णाया आलम्बनबहुत्वं निर्दर्शितम्, अन्यथा नैव युज्यते तस्य महत्त्वम्।[१]

तत्र **पौनर्भविकी** इति पुनर्भवोत्पादिकेत्यभिप्रायः। **नन्दीरागसहगता** सौमनस्यसहगतो राग इत्यर्थः। तत्र **तत्राभिनन्दिनी** इति अस्याः पुनर्भवालम्बकत्वं निर्दिष्टम्। **कामतृष्णेति** या कामधात्वालम्बना। **भवतृष्णेति** या रूपारूप्यधात्वालम्बनेति। **विभवतृष्णा** तावद् आत्मीयाभावमालम्बते।

निरोधसत्यं कतमत्? **निर्वृतिस्तन्निरोधः** इत्युक्तम्। समुदयसत्यस्य यो निरोधः, स निर्वाणमिति। तन्निरोधसत्यमिति ज्ञेयम्, तस्यास्तृष्णायाः सदा निरोधाद् व्युपशमाच्चेति। अत एवात्र तृष्णाक्षयमेव निर्वाणमिति कथनेन सोपधिशेषनिर्वाणमित्यादर्शितं भवति।[२]

---

[१] द्रष्टव्यम्-- इदं खो पन दुक्खसमुदयं अरियसच्चं -यायं तण्हा पोनोब्भविका नन्दिरागसहगता तत्र तत्राभिनन्दिनी। --महा.व.(पालि), पृ. १३, मा.सं. ;

तत्र कतमत् समुदयार्यसत्यम्? येयं तृष्णा पौनर्भविकी नन्दीरागसहगता तत्र तत्राभिनन्दिनी, यदुत कामतृष्णा भवतृष्णा विभवतृष्णाश्चेति। --बो.च.पं. ९/४६, पृ. २०८, मि.सं. ;

समुदयसत्यं कतमत्। क्लेशःक्लेशाधिपतेयश्च कर्म। प्राधान्यनिर्देशस्तु भगवता तृष्णा पौनर्भविकी नन्दीरागसहगता तत्र तत्राभिनन्दिनी समुदयसत्यनिर्देशेन निर्दिष्टा। --अभि.समु., पृ. ४३, वि.भा.प्र. ;

दुःखसमुदय आर्यसत्यं कतमत्? तद्यथा-- तृष्णा पौनर्भविकी, नन्दीरागसहगता, तत्रतत्राभिनन्दिनी। इदमुच्यते दुःखसमुदय आर्यसत्यम्। --अ.वि.सू., पृ. १५, के.पी.जा.सं.।

[२] द्रष्टव्यम्-- दुःखनिरोध आर्यसत्यं कतमत्? यदस्या एव तृष्णायाः पौनर्भविक्या नन्दीरागसहगतायास्तत्रतत्राभिनन्दिन्या अशेषतः प्रहाणं, प्रतिनिःसर्गो, व्यन्तीभावः, क्षयो, विरागो, निरोधो, व्युपशमोऽस्तंगमः। इदमुच्यते दुःखनिरोध आर्यसत्यम्।
--अ.वि.सू., पृ. १५, के.पी.जा.सं. ;

निरोधसत्यं कतमत्। लक्षणतः गाम्भीर्यतः संवृतितः परमार्थतः अपरिपूरितः परिपूरितः निरलंकारतः सालंकारतः शेषतः अशेषतः अग्रतः पर्यायतश्च निरोधसत्यं वेदितव्यम्।
--अभि.समु., पृ. ६२, वि.भा.प्र.।

मार्गसत्यं कतमत्? **तदधिगमाय चाष्टाङ्गिकोऽयं मार्गः** इत्युक्तम्।[1] निर्वाणप्रापकं मार्गसत्यं तावद् यो ह्युपर्युक्तः आर्याष्टाङ्गिको मार्ग इत्यर्थः।

यत्नः सदा विधेयश्चतुरार्यसत्यप्रतिवेधायैवम् ।
क्रोडे श्रियश्च येषां गृहस्थास्तरन्ति क्लेशनदीं ज्ञानात् ।।११५।।

इत्यनेन निर्वाणाधिगमाय योज्यते। **एवम्** इति यथोक्ताकारायां मार्गभावनायां सदैव सर्वत्र यत्नः करणीयः। तत्कस्मै प्रयोजनाय? **चतुरार्यसत्यप्रतिवेधाय** चत्वारि आर्यसत्यानि साक्षात्कर्तुम्। यतस्तानि आर्याणां सत्यानि अत आर्यसत्यानीत्युच्यन्ते।[2] यतो हि आर्यैः स्रोत-आपन्नादिभिस्तानि सत्यत्वेन दृष्टानि। कथमस्माभिः राजकार्येषु व्यापृतैर्गृहस्थजनैस्तानि चतुरार्यसत्यानि द्रष्टुं शक्यन्त इति चेत्? **क्रोडे श्रियश्च** इत्याद्युक्तम्। एवं ह्युक्तं यद् राजकार्येषु व्यापृता बिम्बिसारादयो

---

[1] द्रष्टव्यम्-- मार्गसत्यं कतमत्। येन दुःखं परिजानीते समुदयं प्रजहाति निरोधं साक्षात्करोति मार्गं भावयति। एतत् संक्षेपेण मार्गसत्यलक्षणमित्युच्यते। पुनः मार्गः पञ्चविधः। संभारमार्गः प्रयोगमार्गः दर्शनमार्गः भावनामार्गः निष्ठामार्गश्च।

--अभि.समु., पृ. ६५, वि.भा.प्र. ;

तत्र दुःखनिरोधगामिनीप्रतिपदार्यसत्यं कतमत्? अयमेव सम्यग्दृष्ट्यादिरार्याष्टाङ्गो मार्गः। तद्यथा-- सम्यग्दृष्टिः, सम्यक्संकल्पः, सम्यक्वाक्, सम्यक्कर्मान्तः, सम्यगाजीवः, सम्यक्स्मृतिः, सम्यक्स्माधिरिति। इदमुच्यते दुःखनिरोधगामिनीप्रतिपदार्यसत्यम्।

--अ.वि.सू., पृ. १५-१६, के.पी.जा.सं.।

[2] द्रष्टव्यम्-- आर्यसत्यानीति सूत्र उच्यन्ते। कोऽस्यार्थः? आर्याणामेतानि सत्यानि तस्मादार्यसत्यानीति सूत्र एवोक्तम्। किमन्येषामेतानि मृषा? सर्वेषामेतानि सत्यानि; अविपरीतत्वात्। आर्यैस्तु यथैतानि तथा दृष्टानि, नान्यैः। अत आर्याणामेतानि सत्यान्युच्यन्ते न त्वनार्याणाम्; विपरीतदर्शनात्।

"यदार्याः सुखतः प्राहुस्तत् परे दुखतो विदुः।
यत् परे सुखतः प्राहुस्तदार्या दुःखतो विदुः ।।

--अभि.को.भा., पृ. ८७४, बौ.भा.प्र. ;

व्याधिर्ज्ञेयो व्याधिर्हेतुः प्रहेयः स्वास्थ्यं प्राप्यं भेषजं सेव्यमेवम्।
दुःखं हेतुस्तन्निरोधोऽथ मार्गो ज्ञेयं हेयः स्पर्शितव्यो निषेव्यः ।। --म.उ.तं. ४/५२ ।

राजानश्चतुरार्यसत्यज्ञानेन क्लेशौघम् उत्तीर्णवन्तस्तस्मात् त्वयाऽपि यत्न आस्थेय इति।[१]

ये दृष्टार्यसत्याश्च नाविर्भवन्ति तेऽङ्कुरवत् पृथिवीतः ।
नावतरन्ति च गगनात् तेऽपि पृथग्जनाः क्लेशवशा हि पूर्वम् ।।११६।।

इत्यादिना पुरुषार्थतया आर्यमार्गस्य समापादनं प्रदर्शितम्। **नावतरन्ति च गगनात् तेऽपि** इति ते आदित एव परिनिष्पन्नज्ञाना नात्र आयाताः। **नाविर्भवन्ति तेऽङ्कुरवत् पृथिवीतः** इति न शस्यवत् ते पुरुषार्थं विनैव भूमिगर्भाज्जाताः। अथ कथमिति चेत्? पृथग्जनावस्थातः प्रयत्नं विधाय कल्याणमित्राणि संश्रित्य क्लेशनदीमुत्तीर्णवन्तः। अत एव मा भैषीरित्यभिप्रायः।[२] सम्प्रति तावत्--

---

[१] द्रष्टव्यम्--

देवेषु च्युतिदुःखमित्यवगमात् पर्येष्टिदुःखं नृषु प्राज्ञा नाभिलषन्ति देवमनुजेष्वैश्वर्यमप्युत्तमम्।
प्रज्ञायाश्च तथागतप्रवचनश्रद्धानुमान्यादिदं दुःखं हेतुरयं निरोध इति च ज्ञानेन संप्रेक्षणात् ।।
--म.उ.तं. ४/५१ ।

[२] तुलनीयम्--

नैवावसादः कर्त्तव्यः कुतो मे बोधिरित्यतः।

कुतो मे बोधिरिति, कथमहं वराकः सम्यक्संबोधिभाजनम्? बुद्धत्वं हि तीक्ष्णेन्द्रियस्य आरब्धवीर्यस्य अपरिमितपुण्यज्ञानसम्भारैः अतिदुष्करकर्मानुष्ठानैः अनेकैश्च कल्पासंख्येयैः कस्यचित् पुरुषविशेषस्य साध्यं भवति। अहं तु न तादृश इति कथं मद्विधानां तथाविधं बुद्धत्वं संभाव्येत, इत्येवमाकारमनसिकारादवसादो विषादो न कर्तव्यः, महार्थभ्रंशस्य हेतुत्वात्। यथोक्तम्-- अवसादोऽप्यनर्थ इति (शि.समु. ३४)। कस्मात्?

यस्मात्तथागतः सत्यं सत्यवादीदमुक्तवान्।।

यस्मात् तथागतः इदं वक्ष्यमाणं सत्यमवितथमुक्तवान् कथितवान्। कथं ज्ञायते इत्याह-- सत्यावादीति। ज्ञानक्रियासंभवादविपरीतवादी। अतः सत्याभिधानहेतुपदमेतत्। किं तत्सत्यमुक्तवान्--

तेऽप्यासन् दंशमशका मक्षिकाः कृमयस्तथा।
यैरुत्साहवशात् प्राप्ता दुरापा बोधिरुत्तमा ।।

इत्याह। तेऽपि बुद्धा भगवन्तः पूर्वं शाक्यमुनिरत्नशिखिदीपंकरप्रभृतयः संसारसागरावर्तान्तर्गताः पृथग्जनावस्थायां परिभ्रमन्त एवंभूता एवासन् बभूवुः, यैरुत्साहबलात् वीर्योत्कर्षसामर्थ्यात् संभारान् संभृत्य प्राप्ता अधिगता दुरापा दुर्लभप्रतिलम्भा बोधिरुत्तमा अनुत्तरा। आरब्धवीर्यस्य न किंचिद्दुष्करमिति भावः। इदं तत् सत्यम्।

चित्तं हि धर्ममूलं भगवतोक्तमतस्तदपि साधु दमयेच्च ।
भो निर्भय, किं बहुना कथनेन यतोऽयमेव हितोपदेशः[१] ।।११७।।

इत्यनेन संक्षेपेण शिक्षयति। **निर्भय** इति सम्बोधनम्। अयमेव हितः प्रियश्चाववादः। कथमिति चेत्? **तदपि साधु दमयेच्च** इति अकुशलस्थानेभ्यश्चित्तं विनिवार्य कुशलेषु प्रतिष्ठापनीयमित्यर्थः। कुत इति चेत्? **चित्तं हि धर्ममूलं भगवतोक्तम्** इति।[२] हिर्यस्मादित्यर्थः। यतो हि भगवता सर्वेषां कुशलधर्माणां मूलं

किमुताहं नरो जात्या शक्तो ज्ञातुं हिताहितम्।
सर्वज्ञनीत्यनुत्सर्गाद्बोधिं किं नाप्नुयामहम् ।।

किं पुनरहं मनुष्यभूतो जन्मना। शक्तो ज्ञातुं हिताहितमिति। इदं हितमिदमहितम्, शुभमशुभं च कर्मेत्युपदिष्टम्, ज्ञातुमवबोद्धुं समर्थोऽस्मि, इति विचिन्त्य सर्वज्ञस्य सर्ववस्तुतत्त्ववेदिनः नीतिर्नयः उपादेयतत्त्वप्रतिपादनम्। तस्य अनुत्सर्गादपरित्यागात्। तस्य आदानोपादानसेवनादित्यर्थः। बुद्धत्वं नाप्नुयामहम्। काक्का पठनाद् आप्नुयामेवेति। एतद्भगवता रत्नमेघे दर्शितम्--

इह बोधिसत्त्वो नैवं चित्तमुत्पादयति- दुष्प्राप्या बोधिर्मनुष्यभूतेन सता। इदं च मे वीर्यं परीत्तं च हीनं च। कुसीदोऽहम्। बोधिश्च आदीप्तशिरश्चैलोपमेन बहून् कल्पान् बहूनि कल्पशतानि बहूनि कल्पसहस्राणि समुदाचरता समुदानेतव्या। तत्राहमुत्सहे ईदृशं भारमुद्वोढुम्। किं तर्हि बोधिसत्त्वेनैवं चित्तमुत्पादयितव्यम्- येऽपि तेऽभिसंबुद्धास्तथागता अर्हन्तः सम्यक्संबुद्धाः, येऽपि वा अभिसंभोत्स्यन्ते, तेऽपि ईदृशेनैव नयेन, ईदृश्या प्रतिपदा, ईदृशेनेव वीर्येणाभिसंबुद्धाः, यावन्न च ते तथागतभूता एवाभिसंबुद्धाः। अहमपि तथा तथा घटिष्ये, तथा तथा व्यायंस्ये सर्वसत्त्वसाधारणेन वीर्येण सर्वसत्त्वारम्बणेन वीर्येण यथाहमप्यनुत्तरां सम्यक्संवोधिमभिसंभोत्स्ये इति।

--बो.च.पं., ७/१७-१९, पृ. १२०-१२१, मि.सं. ;

दुःखं स्कन्धा उपादत्ताः कर्मक्लेशौ समुद्भवः।
द्वौ निरोधौ च निर्वाणं पक्ष्योऽध्वा सप्तत्रिंशकः।। --ध.धा.द.गी.(पुनरुद्धारः), ७० का.।

[१] द्रष्टव्यम्-

सब्बपापस्स अकरणं कुलस्स उपसम्पदा।
सचित्तपरियोदपनं एतं बुद्धान सासनं ।। --धम्म., १४/५

[२] तुलनीयम्--

यदुक्तमार्यरत्नमेघे-- चित्तपूर्वंगमाः सर्वधर्माः। चित्ते परिज्ञाते सर्वधर्माः परिज्ञाता भवन्ति। अपि च--

चित्तेन नीयते लोकश्चित्तं चित्तं न पश्यति।
चित्तेन चीयते कर्म शुभं वा यदि वाशुभम्।।

चित्तं भ्रमते अलातवत्। चित्तं विभ्रमते तरंगवत्। चित्तं दहते दवाग्निवत्। चित्तं रोहयते (हरते) महाम्बुवत्।

चित्तमेव निर्दर्शितं, तस्मात्त्वया चित्तस्य सम्यग् दमनं कर्तव्यम्, यथा-- **''मनःपूर्वङ्गमा धर्माः''**[1] इति। अतः चित्तप्रसादेन सर्वसुखं विक्षिप्तचित्तेन च सर्वं दुःखमिति संक्षेपार्थः।

एवं व्युपपरीक्ष्यमाणश्चित्ते सूपस्थितस्मृतिर्विहरति, न च चित्तस्य वशं गच्छति। अपि तु चित्तमेवास्य वशं गच्छति। चित्तेनास्य वशीभूतेन सर्वे धर्मा वशीभवन्तीति।

--बो.च.पं.(उद्धृतः), पृ. ५२, मि.सं. ;

अपि च--

तस्मात्स्वधिष्ठितं चित्तं मया कार्यं सुरक्षितम्।
चित्तरक्षाव्रतं मुक्त्वा बहुभिः किं मम व्रतैः ।। १८।।

एवमुत्पादितबोधिचित्तेन शिक्षारक्षणे यत्नवता मनसि कर्तव्यम्-- स्वधिष्ठितं स्मृत्या सुरक्षितं संप्रजन्येन वक्ष्यमाणरीत्या मया स्वचित्तं कर्तव्यं तदेकाग्रमानसेन। अत्रैव सर्वेषामन्तर्भावात्। अतश्चित्तरक्षणमेव प्रधानं व्रतम्। तद्विहाय किमन्यैर्व्रतैर्बहुभिरपि मम प्रयोजनम्? न किंचित्। तद्रहितस्य निष्फलत्वात्। एतावती चेयं बोधिसत्त्वशिक्षा यदुत चित्तपरिकर्म। एतन्मूलत्वात् सर्वसत्त्वार्थानाम्। तद्यथा धर्मसंगीतिसूत्रे कीर्तितम्-- मतिविक्रमबोधिसत्त्व आह-- योऽयं धर्मो धर्म इत्युच्यते, नायं धर्मो देशस्थो न प्रदेशस्थोऽन्यत्र स्वचित्ताधीनो धर्मः। तस्मान्मया स्वचित्तं स्वाराधितं स्वधिष्ठितं सुपरिजितं सुसमारब्धं सुनिगृहीतं कर्तव्यम्। तत्कस्य हेतोः? यत्र चित्तं तत्र गुणदोषाः। तद्बोधिसत्त्वो दोषेभ्यश्चित्तं निवार्य गुणेषु प्रवर्तयति। तदुच्यते-- चित्ताधीनो धर्मः, धर्माधीना बोधिरिति। एवं चित्तायत्ततां सर्वत्र निश्चित्य चित्तदृढतायामुदाहरणमाह--

यथा चपलमध्यस्थो रक्षति व्रणमादरात्।
एवं दुर्जनमध्यस्थो रक्षेच्चित्तव्रणं सदा ।। १९।। --बो.च.पं., पृ. ५५, मि.सं. ;

फन्दनं चपलं चित्तं दूरक्खं दुन्निवारयं।
उजुं करोति मेधावी, उसुकारो व तेजनं।।

दुन्निग्गहस्स लहुनो, यत्थकामनिपातिनो।
चित्तस्स दमथो साधु चित्तं दन्तं सुखावहं।। --धम्म. ३/१, ३ ;

चित्तं प्रवर्तते चित्तं चित्तमेव विमुच्यते।
चित्तं हि जायते नान्यच्चित्तमेव निरुध्यते।। --लं.सू., १०/१४५ ;

चित्तेन नीयते लोकः, चित्तेन परिकृष्यते।
एकधर्मस्य चित्तस्य सर्वधर्मा वशानुगाः।। --अभि.को.स्फु.(सं.नि.१.२.७), पृ. १३८, बौ.भा.प्र.।

[1] द्रष्टव्यम्--

मनःपूर्वंगमा धर्मा मनःश्रेष्ठा मनोजवाः।
मनसा चेत्प्रदुष्टेन भाषते वा करोति वा।

यन्मयोपदिष्टं तत्सप्रयासैरपि भिक्षुभिर्दुःसाध्यम् ।
चर्यागुणान् सेवस्व शिक्षामाचर जीवनं च कुरु सार्थम् ।।११८।।

यन्मयोपदिष्टम् इत्यादिनैवमुक्तम्। यावन्तो मया धर्मा देशिताः, न केवलं सर्वेषां तेषां साधनेन तथागतशासनेऽवस्थानं भवति, अपितु साधितेऽप्येकधर्मे अवस्थितिर्भवति। यतो हि तत् सर्वं (धर्मजातं) तु त्यक्तगृहैर्भिक्षुभिरपि दुःसाध्यम्, का कथा तावद् गृहस्थानामिति। अत एव तेषु (उपदिष्टेषु धर्मेषु) कस्यचन एकस्य शिक्षापदगुणस्य यथासामर्थ्यं भावनां कृत्वा तत्प्रतिपत्त्या जीवनं सफलीकुर्वीत। तदेव सर्वधर्माणां प्राप्तिहेतुर्भविष्यतीत्यभिप्रायः।

एवं धर्मदेशनया चित्तं प्रमुदितं कृत्वा महायाने प्रवेशाय अध्याशयमुत्पादयितुमाह--

सर्वेषां कुशलानि तु सर्वार्थमनुमोद्य स्वचर्यात्रयीं च ।
बुद्धत्वाय परिणाम्य[1] ततस्तदनेन पुण्यराशिना भवता ।।११९।।

ततस्तं दुःखमन्वेति चक्रं वा वहतः पदम्।। १३।।
मनःपूर्वंगमा धर्मा मनःश्रेष्ठा मनोजवाः।
मनसा चेत्प्रसन्नेन भाषते वा करोति वा।
ततस्तं सुखमन्वेति छाया वा अनुयायिनी।। १४।।
--महा.क.वि.सू.(म.सू.सं.), पृ. १८८, मि.सं.।

[1] तुलनीयम्--
पारंपर्येण साक्षाद्वा सत्त्वार्थं नान्यदाचरेत्।
सत्त्वानामेव चार्थाय सर्वं बोधाय नामयेत्।।
अन्ततः स्वयमाहारादिक्रियया परप्रेरणया अपरापरदूतप्रेरणया वा, साक्षात् स्वयमेव आमिषदानादिना वा, यत् सत्त्वानां हितसुखहेतुर्न भवति, तन्न कुर्यात् कारयेद्वा। न चैतदेव केवलम्। किंचित् सत्त्वानामेव संसारदुःखपतितानां ततो निःसरणाय सर्वं कुशलमूलमनुत्तरायां सम्यक्संबोधौ परिणामयेत्।
--बो.च.पं., ५/१०१, पृ. ७६, मि.सं. ;
बोधिचर्यावतारं मे यद्विचिन्तयतः शुभम्।
तेन सर्वे जनाः सन्तु बोधचर्याविभूषणाः।। --बो.च., १०/१ ।

जन्मस्वप्रमेयेषु देवनरलोकयोगिनश्च वशीकृत्य ।
दुःखिनोऽनुग्राह्यास्त्वसहाया अवलोकितेश्वरचर्याभिः[1] ।।१२०।।

इति। 'यावन्ति संसारे कानिचित् सास्रवाणि, अनास्रवाणि लौकिकानि लोकोत्तराणि कुशलानि तानि सर्वाणि यथा सम्यक्संबुद्धैरनुमोदितानि तथैव अहमपि अनुत्तरयाऽनुमोदनया अनुमोदे' इत्यादिभिः अनुमोदनापदैरनुमोदयितव्यम्। अहं बुद्धो भवेयम् अनाथानां नाथः, अशरणानां शरणः, अत्राणानां परित्राता, अनिकेतानां निकेतः **स्वचर्यात्रयीं च बुद्धत्वाय परिणाम्य** इत्यनुमोदनापरिणामनासम्भूतेन अनेन पुण्यस्कन्धेन त्वम् अपरिमितायुर्भव इति[2] व्याख्यातव्यम्।

केन क्रमेणेति चेद्? इत्याह-- **जन्मस्वप्रमेयेषु** इति। असंख्येयानि जन्मानि गृहीत्वा। कुत्र? **देवनरलोकयोगिनश्च वशीकृत्य** इति सर्वत्र देवेलोके मनुष्यलोके च योगैश्वर्यमधिगत्य बोधिसत्त्वसमाधिमाहात्म्येन धातुत्रयं वशीकृत्य। अन्यच्च--

---

१ द्रष्टव्यम्--

दशदिग्व्योमपर्यन्तसर्वसत्त्वार्थसाधने।
यथा चरति मञ्जुश्रीः सैव चर्या भवेन्मम।। --बो.च., १०/५४ ;

पारंपर्येण साक्षाद्वा सत्त्वार्थ नान्यदाचरेत्।
सत्त्वानामेव चार्थाय सर्वं बोधाय नामयेत्।। --बो.च., ५/१०१।

२ तुलनीयम्--

अनाथानामहं नाथः सार्थवाहश्च यायिनाम्।
पारेप्सूनां च नौभूतः सेतुः संक्रम एव च।।
दीपार्थिनामहं दीपः शय्या शय्यार्थिनामहम्।
दासार्थिनामहं दासो भवेयं सर्वदेहिनाम्।।
चिन्तामणिर्भद्रघटः सिद्धविद्या महौषधिः।
भवेयं कल्पवृक्षश्च कामधेनुश्च देहिनाम् ।। --बो.च. ३/१७-१९ ;

सर्वासु दिक्षु यावन्तः कायचित्तव्यथातुराः।
ते प्राप्नुवन्तु मत्पुण्यैः सुखप्रामोद्यसागरान्।।
आकाशस्य स्थितिर्यावद्यावच्च जगतः स्थितिः।
तावन्मम स्थितिर्भूयाज्जगद्दुःखानि निघ्नतः ।।
--बो.च., १०/२, ५५ का. ।

दुःखिनोऽनुग्राह्यास्त्वसहाया अवलोकितेश्वरचर्याभिः इति यथा भगवान् आर्यावलोकितेश्वरः करुणार्द्रचित्तेन सिंह-गज-सर्पाग्नि-चौर-बन्धन-जल-राजादिभिः विविधान् अनेकान् सत्त्वान् परित्रायते, तथैव त्वमपि आर्तसत्त्वान् अनुगृहाण। एवमत्र पूर्वेण तावत् बुद्धधर्माणां परिपाकः उत्तरेण च सत्त्वपरिपाकः प्रतिपादितः।

एवं सम्भारसमृद्ध्या चरमभविको भूत्वा व्याधिजरादिधर्मान् परिहृत्य लोकनाथो भव, इत्याह--

चरमं भवं गृहीत्वा व्याधिजरारागद्वेषांश्च प्रहाय ।
बुद्धक्षेत्रे भगवानमिताभ इव लोकेशोऽमितायुर्भव ।।१२१।।

इति। कुत्र लोकनाथः स्यादिति चेत्? परिशुद्धे बुद्धक्षेत्र इति। किंविशिष्ट इति? **लोकेशोऽमितायुः** इति सुखावत्यां यथा भगवान् अमिताभस्तथा बुद्धो भव। अथवा जरारोगादीन् निराकृत्य बुद्धक्षेत्रं च शोधयित्वेति। एवं परिशोध्य तत्र बुद्धक्षेत्रे उत्पद्य चरमभवे लोकनाथो भवेति। कुत्रेति चेद्? बुद्धक्षेत्रे स्वकृतकुशलमूलैः परिशुद्धे। किंविशिष्टः? **अमितायुः** इति सुखावत्यां यथा भगवान् अमिताभस्तादृशो बुद्धो भवेदित्यर्थः। अथवा रोगादीन् निराकृत्य बुद्धक्षेत्रं च परिशोध्येत्येवं तत्र परिशुद्धे बुद्धक्षेत्रे समुत्पद्य चरमभवे लोकेशो जगन्नाथो भव।

प्रज्ञाशीलत्यागोद्भूतविमलख्यातिं भुवि खे स्वर्गे च ।
लोके प्रसार्य शमयन् नरान् युवतिसुखरतदेवांश्च भूमौ ।।१२२।।

इत्येवं यथोक्तं बुद्धत्वपदमवाप्य यथोचितं काले अनन्तसत्त्वानामर्थं संसाध्य यथा बुद्धेन परिनिर्वाणमधिगतं तथैव (त्वमपि) परिनिर्वाणं प्राप्नुहीति देशितम्। तत्र **प्रज्ञाशीलत्यागोद्भूतविमलख्यातिम्,** इति योजनीयम्। एवंविधः स भगवान् प्रज्ञा (विद्या) सम्पन्नः, निर्वेधभागीयप्रज्ञया समन्वितत्वात्। स च शीलसम्पन्नोऽपि अनुपहतादिगुण-विशिष्टानुत्तरशीलस्कन्धसम्पन्नत्वात्। एवमेव स भगवान् त्यागसम्पन्नः, यतो हि सर्वं तेन परित्यक्तम्। एवं प्रसादितेषु गुणेषु प्रसन्नमनसा अनुरक्तिजननार्थं

विमला कीर्तिः प्रसारिता परिवर्धितेत्यर्थः। **विमल** इति अनुपमत्वमादर्शितम्। पुनः कुत्र प्रसार्यत इति चेद्? देवभूमौ स्वर्गे, आकाशेऽन्तरिक्षे पृथिव्यां मनुष्यलोके च। अपि च, भूमौ मनुष्यलोके मनुष्यान् स्वर्गे च देवान् निश्चितं शमयन्नित्यनेन योज्यम्। कीदृशो विशेष इति? **युवतिसुखरते**ति उत्तमाभिर्युवतिभिः सह सुखानुभूतिस्तु उत्तमयुवतिरतिसुखेन आनन्दानुभव इत्यनेन आनन्दिता प्रमत्ता देवा मनुष्याश्च प्रशमनीया इति शीलादिषु स्थाप्या इत्यर्थः। नियमेन आर्यधर्मेषु प्रतिष्ठापनं सन्दर्शितम्। अत एवोक्तं देवा मनुष्याश्च, आर्यधर्मभाजनीभूतत्वात्तेषाम्। अन्यथा असुरा अपि उत्तमयुवतिरतिसुखेन आनन्दिता भवन्त्येव। एवं लोके महती कीर्तिर्विस्तारिता देवमनुष्याणां हितमपि निर्दिष्टम्।

क्लेशोपहतसत्त्वस्य जातिभयमरणनाशकं जिनेन्द्राख्यम् ।
लोकोत्तरमक्लिष्टं शान्ताभयाक्षयनामैव पदमाप्नुहि ।।१२३।।

इत्यनेन पूर्वागत एवार्थो वेदितव्यः। पदार्थयोः क्रमयोगस्तावदेवम्-- तथाविधं जगन्नाथत्वमवाप्य महतीं कीर्तिमपि प्रसार्य देवमनुष्यानपि शमयित्वा निर्वाणपदं प्राप्नुयादिति।[1] **तत्र क्लेशोपहतसत्त्वस्य** इति क्लेशपीडिताः सन्ति प्रायशः सत्त्वाः।

---

१ द्रष्टव्यम्--

इयं सानुत्तरा बोधिः सर्वबुद्धैः प्रकाशिता।
भावनां भावयित्वेह निर्वाणं लभते शिवम्।।
यावन्तः संवृतेर्दोषास्तावन्तो निर्वृतेर्गुणाः।
निर्वृतिः स्यादनुत्पत्तिः सर्वदोषैर्न लिप्यते ।।
--नैरा.परि.महा.सू.(म.सू.सं.), २५-२६ का. ;

चित्तमेव संसारो रागादिक्लेशवासितम्।
तदेव तैर्विनिर्मुक्तं निर्वाणमिति कथ्यते।।
--त.सं.पं., पृ. २३०, बौ.भा.प्र., १९८१ ;

अप्रहीणमसम्प्राप्तम् अनुच्छिन्नमशाश्वतम्।
अनिरुद्धमनुत्पन्नम् एतन्निर्वाणमुच्यते।।

यद्धि नैव प्रहीयते रागादिवत्. नापि प्राप्यते श्रामण्यफलवत्, नाच्युच्छिद्यते स्कन्धादिवत्, यच्चापि न नित्यमशून्यवत्, तत् स्वभावतोऽनिरुद्धमनुत्पन्नं च निर्वाणमुक्तम्। तत् कुतस्तस्मिन्नित्थंविधे निष्प्रपञ्चे

जातिभयमरणानां नाशकमिति तावत् **जातिभयमरणनाशकम्** । यस्मिन् (निर्वाणे) तत्प्रहाणस्वभावस्तत्तथा। पुनरत्र भयं तु सत्कायदृष्ट्याऽऽनीतम्। जातिस्तावद् अविद्यातः कर्मतः तृष्णातश्च प्रभवति। मरणं तु केषाञ्चित् कर्मक्षयात् केषाञ्चिदायुःपरिक्षयात् केषाञ्चिच्च विषमापरिहाराच्च त्रिधा वेदितव्यम्। बुद्धेन भगवता तेषां सत्त्वानां हिताय तेषां प्रहाणं कृतम्। **लोकोत्तरम्** इत्यादि सर्वाण्यपि निर्वाणस्यैव विशेषणपदानि। तत्र लोकोत्तरमिति निरुपधिशेषनिर्वाणधातौ लोकनिरोधात्। सोपधिशेषमपि लौकिकचित्तेनाज्ञेयत्वाल्लोकोत्तरं तथापि तन्नात्र परिगृह्यते बुद्धत्वेन संगृहीतत्वात्। **नामैव** नाममात्रमित्यनेन तद्भावनिराकरणम्। यथोक्तं सूत्रे-- **"पञ्चेमानि (भिक्षवः) नाममात्राणि अतीतानागतनिर्वाणाप्रतिसंख्यानिरोधपुद्गलाश्च"** इति। **शान्तम्** प्रपञ्चैरबाधितत्वात्। **अभयम्** तावत् भेतव्याभावात्। **अक्लिष्टम्** इति अनास्रवम्।

क्लेशकल्पना येषां क्लेशानां प्रहाणान्निर्वाणं भवेत्? कुतो वा स्कन्धकल्पना, तत्र येषां स्कन्धानां निरोधात् तद्भवेत्? यावद्धि एताः कल्पना प्रवर्तन्ते तावन्नास्ति निर्वाणाधिगमः, सर्वप्रपञ्चपरिक्षयादेव तदधिगमात्। .... यदा चैव बुद्धा भगवन्तः सर्वप्रपञ्चोपशान्तरूपे निर्वाणे शिवेऽस्थानयोगेन नभसीव हंसराजाः स्थिताः स्वपुण्यज्ञानसम्भारपक्षपातवाते वातगगने वा गगनस्याकिञ्चनत्वात्, तदा सर्वनिमित्तानुपलम्भात्र क्वचिद्देवेषु वा मनुष्येषु वा न कस्यचिद्देवस्य वा न कश्चिद्धर्मः सांक्लेशिको वा वैयवदानिको वा देशित इति विज्ञेयम्। यथोक्तमार्यतथागतगुह्यसूत्रे-- "यां च रात्रिं शान्तमते, तथागतोऽनुत्तरां सम्यक्सम्वोधिमभिसम्बुद्धः, यां च रात्रिमनुपादाय परिनिर्वास्यति, अत्रान्तरे तथागतेनैकमप्यक्षरं नोदाहृतम् नापि प्रव्याहरति, नापि प्रव्याहरिष्यति। अथ च यथाधिमुक्ताः सर्वसत्त्वा नानाधात्वाशयास्तां तां विविधां तथागतवाचं निश्चरन्तीं संजानन्ति। तेषामेव पृथक् पृथग्भवति-- 'अयं भगवानस्मभ्यमिमं धर्मं देशयति, वयं च तथागतस्य धर्मदेशनां श्रृणुमः'। तत्र तथागतो न कल्पयति न विकल्पयति। सर्वकल्पजालवासनाप्रपञ्चविगतो हि शान्तमते तथागतः" इति विस्तरः। तथा--

अवाचऽनक्षराः सर्वशून्याः शान्तादिनिर्मलाः।
य एवं जानाति धर्मान् कुमारो बुद्ध सोच्यते।। ....

उक्तं च भगवता--

अनिर्वाणं हि निर्वाणं लोकनाथेन देशितम्।
आकाशेन कृतो ग्रन्थिराकाशेनैव मोचितः ।।

--म.शा.वृ., पृ. २२९, २३७, बौ.भा.प्र. १९८३।

अक्षयम् इति नित्यत्वाद् विकाररहितत्वाच्च। एतादृशं निरुपधिशेषनिर्वाणधातुपदं प्राप्नुयादित्यर्थः।

इति आचार्यमहामतिना कृता व्यक्तपदा सुहृल्लेखटीका समाप्ता।।

भारतीयाचार्यसर्वज्ञदेवेन भोटानुवादकेन भन्ते पलचेग-महादयेन अनूद्य सुनिर्णीता।

भवतु सर्वमङ्गलम्

༄༅། །མགོན་པོ་ཀླུ་སྒྲུབ་ཀྱིས་མཛད་པའི་
བཤེས་པའི་སྤྲིང་ཡིག་གི་
རྩ་བ་བཞུགས་སོ།།

नापनेयमतः किञ्चित् प्रक्षेप्तव्यं न किञ्चन।
द्रष्टव्यं भूततो भूतं भूतदर्शी विमुच्यते।।

--अभिसमयालंकार, ५/२१

རྒྱ་གར་སྐད་དུ། སུཧྲྀལླེཁ། བོད་སྐད་དུ། བཤེས་པའི་སྤྲིང་ཡིག
འཇམ་དཔལ་གཞོན་ནུར་གྱུར་པ་ལ་ཕྱག་འཚལ་ལོ།།

ཡོན་ཏན་རང་བཞིན་དགེ་འོས་བདག་གིས་ནི།།
བདེ་བར་གཤེགས་པའི་གསུང་བསྟན་ལས་བྱུང་བའི།།
བསོད་ནམས་འདུན་སླད་འཕགས་པའི་དབྱངས་འདི་དག།
ཉུང་ཟད་ཅིག་བསྙེབས་ཁྱོད་ཀྱིས་གསན་པའི་རིགས།། ༡ །།

ཇི་ལྟར་བདེ་གཤེགས་སྐུ་གཟུགས་ཤིང་ལས་ཀྱང་།།
བགྱིས་པ་ཅི་འདྲའང་རུང་སྟེ་མཁས་པས་མཆོད།།
དེ་བཞིན་བདག་གི་སྙན་ངག་འདི་ངན་ཡང་།།
དམ་ཆོས་བརྗོད་ལ་བརྟེན་སླད་སྨད་མི་བགྱི[1]།། ༢ །།

ཐུབ་པ་ཆེན་པོའི་བཀའ་ནི་སྨན་[2]དགུ་ཞིག།
ཁྱོད་ཀྱིས་[3]ཐུགས་སུ་ལྟ་ཡང་ཆུད་མོད་ཀྱི།།

---

[1] བགྱིད་ སྣར་ཐང་དཔར་མ།

[2] སྨན་ སྡེ་དགེ། གསེར་བྲིས།

[3] ཀྱི་ སྡེ། སྣ། གསེར་བྲིས།

རྡོ་ཐལ་ལས་བགྱིས་དགུང་ཟླའི་འོད་ཀྱིས་ནི།།
ཆེས་དཀར་ཉིད་དུ་ཅི་སྟེ་མི་བགྱིད་[1]ལགས།། ༣།

རྒྱལ་བས་སངས་རྒྱས་ཆོས་དང་དགེ་འདུན་དང་།།
གཏོང་དང་ཚུལ་ཁྲིམས་ལྷ་རྗེས་དྲན་པ་དྲུག།
རབ་ཏུ་བཀའ་སྩལ་དེ་དག་སོ་སོ་ཡི།།
ཡོན་ཏན་ཚོགས་ཀྱིས་རྗེས་སུ་དྲན་པར་བགྱི།། ༤ །།

དགེ་བའི་ལས་ལམ་བཅུ་པོ་ལུས་དང་ནི།།
ངག་དང་ཡིད་ཀྱིས་རྟག་ཏུ་བསྟེན་[2]བགྱི་ཞིང་།།
ཆང་རྣམས་ལས་ལྡོག་དེ་བཞིན་དགེ་བ་ཡི།།
འཚོ་བ་ལ་ཡང་མངོན་པར་དགྱེས་པར་མཛོད།། ༥ །།

ཡོངས་སྤྱོད་གཡོ་བ་སྙིང་པོ་མེད་མཁྱེན་ནས།།
དགེ་སློང་བྲམ་ཟེ་བཀྲེན་དང་བཤེས་རྣམས་ལ།།

---

[1] བགྱིས་ སྣར་ཐང་།
[2] བརྟེན་ སྣར་ཐང་།

སྦྱིན་པ་ཚུལ་བཞིན་སྐྱལ་[1]བགྱི་ཕ་རོལ་དུ[2]།།
སྦྱིན་ལས་གཞན་པའི་གཉེན་མཆོག་མ་མཆིས་སོ།། ༦ །།

ཁྱོད་ཀྱིས་[3]ཚུལ་ཁྲིམས་མ་ཉམས་མོད་མི་དམའ།།
མ་འདྲིས་མ་སྤྲགས་[4]པ་དག་བསྟེན་[5]པར་མཛོད།།
ཁྲིམས་ནི་རྒྱུ་དང་མི་རྒྱུའི་ས་བཞིན་དུ།།
ཡོན་ཏན་ཀུན་གྱི་གཞི་རྟེན་ལགས་པར་གསུངས།། ༧ །།

སྦྱིན་དང་ཚུལ་ཁྲིམས་བཟོད་བརྩོན་བསམ་གཏན་དང་།།
དེ་བཞིན་ཤེས་རབ་གཞལ་མེད་ཕ་རོལ་ཕྱིན།།
འདི་དག་རྒྱས་མཛོད་སྲིད་པའི་རྒྱ་མཚོ་ཡི།།
ཕ་རོལ་ཕྱིན་པ་རྒྱལ་བའི་དབང་པོ་[6]མཛོད།། ༨ །།

1	རྩལ་	སྣ། གསེར་བྲིས།
2	དུ།	སྣ། ཅོ་ནེ།
3	ཀྱི་	སྡེ་དགེ
4	སྐྱགས་	སྣ། གསེར་བྲིས།
5	བསྟན་	སྣར་ཐང་།
6	པོར་	མི་རིགས།

གང་ལ་ཕ་དང་མ་དག་མཆོད་བྱེད་པའི[1]།།
རིགས་དེ་ཚངས་བཅས་སློབ་དཔོན་བཅས་པའང་ལགས།།
དེ་དག་ལ་མཆོད་གྲགས་པར་འགྱུར་བ་དང་།།
སླད་མ་ལ་ཡང་མཐོ་རིས་འགྱུར་པ་ལགས།། ༩ །།

འཚེ་[2]དང་ཆོམ་རྐུན་འཁྲིག་པ་བརྫུན་དང་ནི།།
ཆང་དང་དུས་མིན་ཟས་ལ་ཆགས་པ་དང་།།
མལ་སྟན་མཐོ་ལ་དགའ་དང་གླུ་དག་དང་།།
གར་དང་ཕྲེང་བའི་ཁྱད་པར་རྣམས་སྤོང་ཞིང་།། ༡༠ །།

དགྲ་བཅོམ་ཚུལ་ཁྲིམས་རྗེས་སུ་བྱེད་པ་ཡི་།།
ཡན་ལག་བརྒྱད་པོ་འདི་དག་དང་ལྡན་ན།།
གསོ་སྦྱོང་འདོད་སྤྱོད་ལྷ་ལུས་[3]ཡིད་འོང་བ།།
སྐྱེས་པ་བུད་མེད་དག་ལ་སྩོལ་བར་བགྱིད།། ༡༡ །།

སེར་སྣ་གཡོ་སྒྱུ་ཆགས་དང་སྙོམ་[4]ལས་དང་།།
མངོན་པའི་ང་རྒྱལ་འདོད་ཆགས་ཞེ་སྡང་དང་།།

---

[1] མཆོད་པ་ཡི། མི་རིགས། རྡོར་གླིང་།
[2] ཚེ་ སྣར་ཐང་།
[3] ལྷ་ཡུལ་ སྣར་ཐང་།
[4] སྙོམས་ སྣར་ཐང་།

རིགས་དང་གཟུགས་དང་ཐོས་པ་ཡང་ཚོ་དང་།།
དབང་ཐང་ཆེ་བས་རྒྱགས་པ་དགྲ་བཞིན་གཟིགས།། ༡༧ །།

བག་ཡོད་བདུད་རྩིའི་གནས་ཏེ་བག་མེད་པ།།
འཆི་བའི་གནས་སུ་ཐུབ་པས་བཀའ་སྩལ་ཏོ།།
དེ་བས་ཁྱོད་ཀྱི་དགེ་ཆོས་སྤེལ་སླད་དུ།།
གུས་པས་རྟག་ཏུ་བག་དང་བཅས་པར་མཛོད།། ༡༨ །།

གང་ཞིག་སྔོན་ཆད་བག་མེད་གྱུར་པ་ལ[1]།།
ཕྱི་[2]ནས་བག་དང་ལྡན་པར་གྱུར་དེ་[3]ཡང་།།
ཟླ་བ་སྤྲིན་བྲལ་ལྟ་བུར་རྣམ་མཛེས་ཏེ།།
དགའ་བོ་སོར་ཕྲེང་མཐོང་ལྡན་བདེ་བྱེད་བཞིན།། ༡༩ །།

འདི་ལྟར་བཟོད་མཚུངས་དཀའ་ཐུབ་མ་མཆིས་པས།།
ཁྱོད་ཀྱིས་ཁྲོ་བའི་གོ་སྐབས་དབྱེ་མི་བགྱི།།[4]

---

[1] ལས སྣ། མི་རིགས།

[2] ཕྱིས་ སྣ།

[3] ཏེ་ སྡེ། སྣ། གསེར་བྲིས།

षडायतनप्रत्ययः स्पर्शः	སྐྱེ་མཆེད་དྲུག་གི་རྐྱེན་གྱིས་རེག་པ་
संसारचक्रस्य अराणाम्	འཁོར་བའི་འཁོར་ལོའི་རྩིབས་

संसारदोषान्	འཁོར་བའི་ཉེས་པ་
संस्कारप्रत्ययं विज्ञानम्	འདུ་བྱེད་ཀྱི་རྐྱེན་གྱིས་རྣམ་པར་ཤེས་པ་
संघातः	བསྡུས་འཛོམས་
संघानुस्मृतिः	དགེ་འདུན་རྗེས་སུ་དྲན་པ་
संजीवः	ཡང་སོས་
संज्ञा विपर्यासः	འདུ་ཤེས་ཕྱིན་ཅི་ལོག་པ་
सत्करणीयं गुरुस्थानीयम्	བཀུར་སྟི་བྱ་བར་འོས་པ་ བླ་མ་ལྟ་བུའི་གནས་
सत्कायदृष्टिः	འཇིག་ཚོགས་ལ་ལྟ་བ་
सत्त्वरजस्तमः स्वभावाः	སྙིང་སྟོབས་དང་རྡུལ་དང་མུན་པའི་ངོ་བོ་
सत्त्वलोको भाजनलोकश्च	སེམས་ཅན་གྱི་འཇིག་རྟེན་དང་སྣོད་ཀྱི་ འཇིག་རྟེན་
सद्धर्मश्रवणयोग्यः	དམ་པའི་ཆོས་མཉན་པའི་འོས་
सन्तोषधनम्	ཆོག་ཤེས་པའི་ནོར་
सप्तार्कज्वालैर्नाविशिष्यन्ते	ཉི་མ་བདུན་འབར་བས་བསྲེག་པའི་ལུས་ པར་མི་འགྱུར་
समाधिप्रतिपन्नम्	ཏིང་ངེ་འཛིན་བསྒྲུབ་པ་
सम्भिन्नप्रलापविरतिः	ཚིག་ཀྱལ་བ་སྤོང་བ་
सम्यक्कर्मान्तः	ཡང་དག་པའི་ལས་ཀྱི་མཐའ་
सम्यक्संकल्पः	ཡང་དག་པའི་རྟོག་པ་
सम्यक्समाधिः	ཡང་དག་པའི་ཏིང་ངེ་འཛིན་
सम्यक्सम्बुद्धः	ཡང་དག་པར་རྫོགས་པའི་སངས་རྒྱས་
सम्यगाजीवः	ཡང་དག་པའི་འཚོ་བ་

सम्यग्दृष्टिः	ཡང་དག་པའི་ལྟ་བ་
सम्यग्वाग्	ཡང་དག་པའི་ངག་
सम्यग्व्यायामः	ཡང་དག་པའི་རྩོལ་བ་
सम्यक्स्मृतिः	ཡང་དག་པའི་དྲན་པ་
सर्वकुशलमूलोत्पादहेतुः	དགེ་བའི་རྩ་བ་ཐམས་ཅད་སྐྱེད་པའི་རྒྱུ་
सर्वधर्मप्रध्वंसः	ཆོས་ཀུན་འཇིགས་པར་བགྱུར་
सर्वसत्त्वेष्वाघातचित्तता	སེམས་ཅན་རྣམས་ལ་ཀུན་ནས་ མནར་སེམས་པ་
सवासनक्लेशोत्पादः	ཉོན་མོངས་དང་སྐྱེ་བ་བག་ཆགས་ དང་བཅས་པ་
सान्दृष्टिकः	ཡང་དག་པར་མཐོང་བ་
सामीचीप्रतिपन्नः	མཐུན་པར་ཞུགས་པ་
सारहीनाः	སྙིང་པོ་མེད་པ་
सुकृतदुष्कृतानां कर्मणाम्	ལེགས་པར་སྤྱད་པ་དང་ཉེས་པར་སྤྱད་ པའི་ལས་རྣམས་
सुखदुःखपरिवर्जनम्	བདེ་བ་དང་སྡུག་བསྔལ་བ་རྣམ་པར་ སྤངས་པ་
सुगतवचः	དེ་བཞིན་གཤེགས་པའི་གསུང་
सुगतीनां मार्गत्वात्	བདེ་འགྲོའི་ལམ་ཡིན་པས་
सुनष्टज्वरवदिति	རིམ་ནད་ལེགས་པར་བྱང་བ་བཞིན་
सुप्रतिपन्नो भगवतः श्रावकसंघः	ཉན་ཐོས་ཀྱི་དགེ་འདུན་ནི་ལེགས་པར་ ཞུགས་པ་
सुभगेषु मनुष्येषु देवेषु	ལྷ་དང་མི་དབང་ཐང་ཆེན་པོ་རྣམས་

	གྱི་ནང་དུ་
सुरम्यकामावचरादिदेवकायम्	འདོད་སྤྱོད་ལྷ་ལུས་ཡིད་འོང་བ་
सोपधिशेषं निरुपधिशेषं च	ཕུང་པོའི་ལྷག་མ་མེད་པ་དང་།
	ཕུང་པོའི་ལྷག་མ་དང་བཅས་པ
स्रोत-आपत्तिफलम्	རྒྱུན་དུ་ཞུགས་པའི་འབྲས་བུ་
सौमन्य-दौर्मनस्यादयः	ཡིད་བདེ་བ་དང་ཡིད་མི་བདེ་བ་སོགས་
स्त्यानमिद्धम्	རྨུགས་པ་དང་གཉིད་
स्पर्शप्रत्यया वेदना	རེག་པའི་རྐྱེན་གྱིས་ཚོར་བ་
स्मृतिमभिमुखीं कृत्वा	དྲན་པ་དང་ལྡན་ཞིང་
स्वकीय आसने नाभिरतिः	རང་གི་སྟན་ལ་མི་དགའ་བ་དང་
स्वसन्तानान्तर्गतः	རང་གི་རྒྱུན་དུ་གཏོགས་པའི་
स्वाख्यातो भगवतो धर्मः	བཅོམ་ལྡན་འདས་ཀྱི་ཆོས་ནི་
	ལེགས་པར་གསུངས་པ་
ह्रीः	ངོ་ཚ་ཤེས་པ་

*****

उद्धृतग्रन्थानुक्रमणिका

अट्ठशालिनीकथा :

१. "तत्थ पाणस्स अतिपातो पाणातिपातो नामः, पाणवधो, पाणघातो ति वुत्तं होति। पाणो ति चेत्थ वोहारतो सत्तो, परमत्तो जीवितिन्द्रियं, तस्मिं पन पाणे पाणसञ्चिनो जीवितिन्द्रियुपच्छेदक-उपक्कमसमुट्ठापिका कायवचीद्वारानं अञ्ञतरद्वारप्पवत्ता वधकचेतना पाणातिपातो।" -पृ. 19

२. "अदिन्नस्स आदानं 'अदिन्नादानं' ; परस्सहरणं थेय्यं, चोरितं ति वुत्तं होति। .... तस्मिं पन परपरिग्गहितसञ्ञिनो तदादायक-उपक्कमसमुट्ठापिका थेय्यचेतना अदिन्नादानं।" -पृ. 20

३. "कामेसुमिच्छाचारो ति एत्थ पन 'कामेसू' ति मेथुनसमाचारेसु। 'मिच्छाचारो' एकन्तनिन्दितो लामकाचारो। लक्खणतो पन असद्धम्माधिप्पायेन कायद्वारप्पवत्ता अगमनीयट्ठान-वीतिक्कमचेतना 'कामेसुमिच्छाचारो'।" -पृ. 20

४. " 'मुसा' ति विसंवादनपुरेक्खारस्स ....। विसंवादनाधिप्पायेन परस्स .... मुसावादो। अपरो नयो- 'मुसा' ति अभूतं अतच्छं वत्थु। 'वादो' ति तस्स .... तथाविञ्ञत्तिसमुट्ठापिका चेतना मुसावादो ति।" -पृ. 21

५. "तत्थ सङ्किट्ठचित्तस्स परेसं वा भेदाय .... कायवचीपयोगसमुट्ठापिका पिसुणा वाचा नाम।" -पृ. 21

६. "याय पन अत्तानं पि परं पि फरुसं करोति, या वाचा सयं पि फरुसा नेव कण्णसुखा, न हदयङ्गमा, अयं 'फरुसा वाचा' नाम। .....परस्स मम्मच्छेदककायवचीपयोगसमुट्ठापिका एकन्तफरुसचेतना 'फरुसावाचा'। -पृ. 22

७. "येन सम्फं पलपति निरत्थकं सो 'सम्फप्पलापो'। ......अनत्थविञ्ञापिका कायवचीपयोगसमुट्ठापिका अकुसलचेतना 'सम्फप्पलापो'।" -पृ. 22

८. "अभिज्झायतीति अभिज्झा। परभण्डाभिमुखी हुत्वा तन्निन्नताय पवत्ततीति अत्थो। सा 'अहो तव इदं ममस्सा' ति एवं परभण्डाभिज्झायनलक्खणा।" --पृ. 23

९. "हितसुखं व्यापादयतीति 'व्यापादो'। सो परविनासाय मनोपदोसलक्खणो।" -पृ. 23

१०. "यथाभुच्चगहणाभावेन मिच्छा पस्सतीति 'मिच्छादिट्ठि'। सा 'नत्थि दिन्नं' ति आदिना नयेन विपरीतदस्सन- लक्खणा।" -पृ. 23

अभिधर्मकोशभाष्य एवं स्फुटार्था :

१. ग्रन्थज्ञो देवानां प्रियो न त्वर्थज्ञः। अर्थश्च प्रतिसरणमुक्तं भगवता। ....
अर्थश्च प्रतिसरणनुक्तं भगवतेति। "चत्वारीमानि भिक्षवः प्रतिसरणानि।
कतमानि चत्वारि? धर्मः प्रतिसरणं न पुद्गलः, अर्थः प्रतिसरणं न व्यञ्जनम्,
नीतार्थसूत्रं प्रतिसरणं न नेयार्थम्, ज्ञानं प्रतिसरणं न विज्ञानम्।" इति। -पृ. 5

२. नरकप्रेततिर्यञ्चो मनुष्याः षट् दिवौकसः।
कामधातुः ....।।
तत्र भाजनलोकस्य सन्निवेशमुशन्त्यधः।
लक्षषोडशकोद्वेधमसंख्यं वायुमण्डलम्।। -पृ. 10

३. सद्धर्मो द्विविधः शास्तुरागमाधिगमात्मकः।
धातारस्तस्य वक्तारः प्रतिपत्तार एव च ।।
....
.... आगमस्य तु भूयांसं कालमित्यपरे। -पृ. 13

४. दशकर्मपथा उक्ता यथायोगं शुभाशुभाः। -पृ. 17
५. प्राणातिपातः सञ्चिन्त्य परस्याभ्रान्तिमारणम्। -पृ. 19
६. अदत्तादानमन्यस्वस्वीक्रिया बलचौर्यतः। -पृ. 19
७. अगम्यगमनं काममित्याचारश्चतुर्विधः। -पृ. 20
८. अन्यसंज्ञोदितं वाक्यमर्थाभिज्ञे मृषावचः। -पृ. 20
९. पैशुन्यं क्लिष्टचित्तस्य वचनं परभेदने। -पृ. 21
१०. पारुष्यमप्रियम् ....। -पृ. 22
११. .... सर्वं क्लिष्टं भिन्नप्रलापिता।।
अतोऽन्यत् क्लिष्टमित्यन्ये, लपनागीतनाट्यवत्।
कुशास्त्रवच्च, ... ।। -पृ. 22
१२. अभिध्या तु परस्वविषमस्पृहा।। -पृ. 23
व्यापादः सत्त्वविद्वेषः, ...। -पृ. 23
१३. .... नास्तिदृष्टिः शुभाशुभे।
मिथ्यादृष्टिः, ... ।। -पृ. 23
१४. आत्मदृष्टिरात्मीयदृष्टिर्वा सत्कायदृष्टिः। .... इत्येतास्ताः पञ्च दृष्टयो वेदितव्याः। -पृ. 24
१५. प्रतिक्षेपणसावद्यान्मद्यादेव, ...
किं कारणं मद्यादेव, नान्यस्मात्?
......अन्यगुप्तये।।
मद्यं पिबतोऽन्यान्यप्यङ्गान्यगुप्तानि स्युः।
कथं पुनर्मद्यपानं प्रतिक्षेपणसावद्यं गम्यते? प्रकृतिसावद्यलक्षणाभावात्। ....
मदयन्तीति सुरामैरेयग्रहणम्। ...... सर्वप्रमादास्पदत्वादिति। -पृ. 25
१६. दीयते येन तद्दानम्, ...। .... परेषां पूजानुग्रहकामताभ्यां .... स्याद्येन दीयते?
कायवाक्कर्म सोत्थानम्, ...
शुभेन मनसा द्रव्यं स्वं ददाति यदा पुमान्।
तत् क्षणं कुशलाः स्कन्धाः दानमित्यभिधीयते।।
तच्चैतद् दानमयं पुण्यक्रियावस्तु महाभोग्यफलम्।......... तत् खल्वेतद् दानम्--

स्वपरार्थोभयार्थाय नोभयार्थाय दीयते।
तद्विशेषः पुनर्दातृवस्तुक्षेत्रविशेषतः ।।
दाता विशिष्टः श्रद्धाद्यैः, सत्कृत्यादि ददाति अतः।
सत्कारोदाररुचिता कालानाच्छेद्यलाभिता।।
वर्णादिसम्पदा वस्तु सुरूपत्वं यशस्वि वा।
प्रियता सुकुमारर्तुसुखस्पर्शाङ्गता ततः।। -पृ. 26

१७. गतिदुःखोपकारित्वगुणैः क्षेत्रं विशिष्यते। ..... तथा ह्युक्तं भगवता-- "तिर्यग्योनिगताय दानं दत्त्वा शतगुणो विपाकः प्रतिकाङ्क्षितव्यः। .... मातापित्रोरन्येषां चोपकारिणाम् ; ऋक्षमृगजातकाद्युदाहरणात्।
मातृपितृग्लानधार्मकथिकेभ्योऽन्त्यजन्मने।
बोधिसत्त्वाय चामेया अनार्येभ्योऽपि दक्षिणा।। -पृ. 26

१८. दौःशील्यतद्धेत्वहतं तद्विपक्षसमाश्रितम्।
दौःशील्येन तावदनुपहतं .... चतुर्विधं शीलमित्यपरे। १. भयशीलम्-- .... पाल्यते। २. आशास्तिशीलम्-- यद्भवभोगसत्कारतृष्णाकृतम्। ३. बोध्यङ्गानुलोमं शीलम्-- ..... सम्यग्दृष्टिकानाम्। ४. परिशुद्धं शीलम्-- .... निर्मलत्वादिति। -पृ. 28

१९. विषकर्मणां विरतिसमादानाच्छीलम्, ...। "सुखशीलसमादानं कायो न परिदह्यते।" -पृ. 28

२०. सर्वत्र सर्वं ददतः कारुण्याद् दानपूरणम्।
यदा सर्वस्मै सर्वं ददाति .... तिष्यं तथागतरत्नगुहायां तेजोधातुसमापन्नदृष्ट्या भगवान् बोधिसत्त्वभूत ..... सप्त दिवसान् स्तुतवानेकगाथया---
"न दिवि भुवि वा नास्मिन् लोके न वैश्रवणालये।
न मरुभवने दिव्यस्थाने न दिक्षु विदिक्षु च।।
चरतु वसुधां स्फीतां कृत्स्नां सपर्वतकाननाम्।
पुरुषवृषभस्त्वत्तुल्योऽन्यो महाश्रमणः कुतः ।।" इति।
तदा किल वीर्यपारमिता परिपूर्णा, नव च कल्पाः प्रत्युदावर्तिताः।
.... धीसमाध्योरनन्तरम्।
बोधेः पूर्वसमनन्तरं .... परिपूरिः। वज्रोपमसमाधौ स्वस्याः सम्पदः पारगमनात् पारमिताः। -पृ. 30

२१. पञ्चाष्टदशसर्वेभ्यो वर्ज्येभ्यो विरतिग्रहात्।
उपासकोपवासस्थश्रमणोद्देशभिक्षुता ।।
यथासंख्यमनुदेशो वेदितव्यः। .... प्राणातिपाताद्, अदत्तादानात्, कामिमिथ्याचारात्, ...। -पृ. 33
अष्टाभ्यो विरतिसमादानादुपवासस्थः .... भिक्षुरित्युच्यते।

२२. शीलाङ्गान्यप्रमादाङ्गं व्रताङ्गानि यथाक्रमम्।
चत्वार्येकं तथा त्रीणि स्मृतिनाशो मदश्च तैः ।। -पृ. 33
चत्वारि तावच्छीलाङ्गानि .... तदभावादुभयं न स्यादिति।

२३. अर्हतां समीपे वसन्त्यनेनेति उपवासः, ...। यावज्जीविकसंवरसमीपे वसन्त्यनेनेत्यपरे। .... पोषध इति वा। "पोषं दधाति मनसः .... भगवता किल पोषधोऽयम्।" इति। -पृ. 34

२४. यथा मञ्चस्थेषु पुरुषेषु क्रोशत्सु मञ्चाः क्रोशन्तीत्युपचारः तद्वत्। -पृ. 34

२५. "इहायुष्मन्तो भिक्षुः शीलसम्पन्नश्च ... समाधिसम्पन्नश्च प्रज्ञासम्पन्नश्च। .... यथाभूतं प्रजानाति। ..... दिव्ये मनोमये काय उपपद्यते। स तत्रोपपन्नोऽभीक्ष्णं .... यथाभूतं प्रजानाति" इति। -पृ. 34

२६. सूत्रोक्तम्-- ते भवन्ति रूपिणो मनोमयाः सर्वाङ्गप्रत्यङ्गोपेता अविकला अहीनेन्द्रियाः शुभा वर्णस्थायिनः स्वयम्प्रभा विहायसङ्गमाः प्रीतिभक्षाः प्रीत्याहारा दीर्घायुषो दीर्घमध्वानं तिष्ठन्ति।
-पृ. 34

२७. यावज्जीवं समादानमहोरात्रं च संवृत्तेः। सप्तवैकायिकस्य प्रतिमोक्षसंवरस्य यावज्जीवं समादानम्, उपवाससंवरस्य अहोरात्रमित्येष नियमः । - पृ. 35

२८. धर्मामिषकौशलप्रदानविरोधी चित्ताग्रहो मात्सर्यम्। -पृ. 35

२९. धर्मस्यामिषस्य च प्रदाने विरोधी चित्तस्याग्रहो मात्सर्यम्। मा मत्तः सरतु इत्याकारो मत्सपरः। मत्सर एव मात्सर्यम्। मत्सरिणो वा भावो मात्सर्यम्। -पृ. 35

३०. कौसीद्यं चेतसो नाभ्युत्साहो वीर्यविपक्षः। -पृ. 36

३१. .... मान उन्नतिः ।
येन केनचित् परतो विशेषपरिकल्पेन चेतस उन्नतिः मानः। -पृ. 37

३२. मदः स्वधर्मे रक्तस्य पर्यादानं तु चेतसः।।
मदस्तु स्वधर्मेष्वेव रक्तस्य यच्चेतसः पर्यादानम्। ..... सम्प्रहर्षणविशेषो मद इत्यपरे।
-पृ. 37-38

३३. व्यापादविहिंसावर्जितः सत्त्वासत्त्वयोराघातः क्रोधः। -पृ. 42

३४. यदि पापकर्मणो विपाकफलमनिष्टमेव तर्हि कथं तेषां विपाकोऽनन्तरमेव ... त्रिविधं कर्म वेदितव्यम्। तद्यथा--

.... नियतं त्रिविधं पुनः।
दृष्टधर्मादिवेद्यत्वात् ....।।

दृष्टधर्मवेदनीयम्, उपपद्यवेदनीयम्, अपरपर्यायवेदनीयं च इत्येतत् त्रिविधं कर्म नियतमिति। ..... अपरपर्यायवेदनीयम्-- तस्मात् परेण। -पृ. 54

३५. श्रद्धा चेतसः प्रसादः। सत्यरत्नकर्मफलाभिसम्प्रत्यय इत्यपरे। --पृ. 56

३६. गुरुत्व ह्रीः ...।
गौरवं हि नाम सप्रतीशता। तत्पूर्विका च लज्जा ह्रीः। अतो न गौरवमेव ह्रीरित्यपरे। --पृ. 56

३७. अवद्येष्वभयदर्शिता अपत्राप्यम्। --पृ. 57

३८. अप्रमाणानि चत्वारि, व्यापादादिविपक्षतः ।
मैत्र्यद्वेषोऽपि करुणा मुदिता सुमनस्कता ।।
उपेक्षाऽलोभः आकारः सुखिता दुःखिता वत।
मोदन्तामिति सत्त्वाश्च, ... ।।

मैत्री, करुणा, मुदिता, उपेक्षा च; अप्रमाणसत्त्वालम्बनत्वात्। किमर्थं चत्वार्येव? व्यापादविहिंसाऽरतिकामरागव्यापादबहुलानां ....इति मुदिताम्, 'सत्त्वाः' इत्येव मनसि कुर्वन्नुपेक्षां समापद्यते, माध्यस्थ्यात्। -पृ. 63-64

३९. विचारप्रीतिसुखवत्, ...
विचारप्रीतिसुखसंयुक्तं कुशलमैकाग्र्यं तत् प्रथमं ध्यानम्। विचारवचनाद् वितर्कोऽप्युक्तो भवति, साहचर्याद् धूमाग्निवत्। न हि विचारो विना वितर्केणास्ति। शेषं पुनर्ध्यानत्रयम्।
.... पूर्वपूर्वाङ्गवर्जितम्।
'शुभैकाग्र्यम्' वर्तते। विचारविवर्जितं प्रीतिसुखवत् द्वितीयम्, विचारप्रीतिवर्जितं तृतीयम्, विचारप्रीतिःसुखवर्जितं चतुर्थमिति। --पृ. 65-66

४०. पञ्चाद्ये तर्कचारौ च प्रीतिसौख्यसमाधयः ।
प्रीत्यादयः प्रसादश्च द्वितीयेऽङ्गचतुष्टयम्।।
तृतीये पञ्च तूपेक्षा स्मृतिः प्रज्ञा सुखं स्थितिः।
चत्वार्यन्तेऽसुखादुःखोपेक्षास्मृतिसमाधयः ।।
प्रथमे भागे पञ्चाङ्गानि। वितर्कः, विचारः, प्रीतिः, सुखम्, चित्तैकाग्रता च -- .. चतुर्थध्यानमन्त्यम्। .... अदुःखासुखा वेदना, उपेक्षापरिशुद्धिः, स्मृतिपरिशुद्धिः, समाधिश्च। -पृ. 66

४१. .... महाब्रह्मफलं च तत्।
तां हि ध्यानान्तरिकां भावयित्वा महाब्रह्मा भवति। .... २. अवितर्को विचारमात्रः, ३. अवितर्कोऽविचार इति। --पृ. 66

४२. यानि सूत्रे पञ्च निवरणानि उक्तानि-- कामच्छन्दः, व्यापादः, स्त्यानमिद्धम्, औद्धत्यकौकृत्यम्, विचिकित्सा च। .... पञ्च निवरणानि'' इत्येकान्ताः, कुशलत्ववचनात् सूत्रे। --पृ. 69

४३. कामे निवरणानि एक विपक्षाहारकृत्यतः।
द्व्येकता .... ।।
द्वयोरेकता द्व्येकता। विपक्षः प्रतिपक्षोऽनाहार इत्येकोऽर्थः। ...... शमथ इति। कृत्यमप्यनयोरेकम्। उभे अपि ह्येते चित्तमव्युपशान्तं वर्तयतः। अत एकविपक्षाहारकृत्यत्वात् द्वयोरप्येकत्वमुक्तम्। --पृ. 69

४४. सधर्मस्मृत्युपस्थाने समस्तालम्बने स्थितः।
अनित्यदुःखतः शून्यानात्मतस्तान् विपश्यति।।
सम्भिन्नालम्बने धर्मस्मृत्युपस्थाने स्थितस्तान् कायादीन् सर्वानभिसमस्य चतुर्भिराकारैः पश्यति-- अनित्यतः, दुःखतः, शून्यतः, अनात्मतश्च। --पृ. 72

४५. चत्वारो विपर्यासाः -- अनित्ये नित्यमिति, दुःखे सुखमिति, अशुचौ शुचीति, ... विपर्यासचतुष्कं किंस्वभावम्?
दृष्टित्रयाद् विपर्यासचतुष्कम् ....।
अन्तग्राहदृष्टेः शाश्वतदृष्टिर्नित्यविपर्यासः। ..... सत्कायदृष्टेरात्मविपर्यासः। --पृ. 72

४६. त्रयमेवाह-- सत्कायदृष्टिं शीलव्रतपरामर्शं विचिकित्सां च। ......अपरे पुनराहुः --
अगन्तुकामता मार्गविभ्रमो मार्गसंशयः।
इत्यन्तराया मोक्षस्य गमनेऽतस्त्रिदेशना।।
त्रयोऽन्तराया देशान्तरगमने भवन्ति-- .... विचिकित्सया मार्गसंशयः। एषां मोक्षगमनान्तरायाणां प्रहाणं द्योतयन् भगवान् क्लेशत्रयस्यैव प्रहाणं देशितवान्। --पृ. 77-78

४७. त्रयमेवाहेति। सत्कायदृष्टि-शीलव्रतपरामर्श-विचिकित्सात्रयमेवाह। ....तद्यथा-- सत्कायदृष्टिः, शीलव्रतपरामर्शः, विचिकित्सा च। ....प्रहाणात् स्रोतोपन्नो भवति............दुःखस्यान्तं करिष्यति'' इति। - पृ. 78

४८. वृत्तस्थः श्रुतचिन्तावान् भावनायां प्रयुज्यते।
सत्यानि हि द्रष्टुकाम आदित एव शीलं पालयति। ततः सत्यदर्शनस्यानुलोमं श्रुतमुद्गृह्णाति, अर्थं वा शृणोति। श्रुत्वा चिन्तयति। अविपरीतं चिन्तयित्वा भावनायां प्रयुज्यते। समाधौ तस्य श्रुतमयीं प्रज्ञां निश्रित्य चिन्तामयी जायते। चिन्तामयीं निश्रित्य भावनामयी जायते। - पृ. 79-80

४९. का पुनरनुपश्यना? प्रज्ञा। तया हि तद्वाननुपश्यः क्रियते। यतश्चोक्तम् 'अध्यात्मं काये कायानुपश्यी विहरति' इति। अनुपश्यमस्यास्ति दर्शनमित्यनुपश्यी, कायेऽनुपश्यी। ...(अभि.को.भा., पृ. ९०४) तया हि प्रज्ञया तद्वान् प्रज्ञावान्। अनुपश्यः क्रियत इति। .... ततः सप्तमीतत्पुरुषः -- कायेऽनुपश्यी कायानुपश्यीति। कायमनुपश्यितुं शीलमस्येति कायानुपश्यीति णिनिरपि (पा.सू.३.२.७८) यदि विधीयेत, तथाप्येतद्रूपं सिद्ध्यतीति पश्यामः। .... शुचिविपर्यासस्य प्रतिपक्षेण कायस्मृत्युपस्थानम्। .... चित्तस्य लघुपरिवर्तित्वात्। आत्मविपर्यासस्य प्रतिपक्षेण धर्मस्मृत्युपस्थानम्। --पृ. 82

५०. संवर्तन्यः पुनस्तिस्रो भवन्त्यग्न्यम्बुवायुभिः।
एकत्र ध्याने सत्त्वाः समं संवर्तन्ते एतस्यामिति संवर्तनी। १. सप्तभिः सूर्यैस्तेजःसंवर्तनी भवति ...... ताभिश्च भाजनानां सूक्ष्मोऽप्यवयवो नावशिष्यते। --पृ. 85

५१. केन पुनः क्रमेणैताः संवर्तन्यो भवन्ति? **सप्ताग्निना**, ...पश्चादेका वायुसंवर्तनी भवति। .... षट्पञ्चाशत् तेजःसंवर्तन्यः, सप्त अप्संवर्त्तन्यः, एकावायुसंवर्तनी। --पृ. 85

५२. चक्रवर्तिसमुत्पत्तिर्नाधोऽशीतिसहस्रकात्।
सुवर्णरूप्यताम्रायश्चक्रिणः तेऽधरक्रमात् ।।
एक-द्वि-त्रि-चतुर्द्वीपाः, न च सह द्वौ बुद्धवत्।
प्रत्युद्यानस्वयंयानकलहास्त्रजितोऽवधाः ।। --पृ. 95

५३. यस्य राज्ञः क्षत्रियस्य मूर्धाभिषिक्तस्य तदैव पोषधे पञ्चदश्यां शिरःस्नातस्योपोषधोपोषितस्योपरिप्रासादतलगतस्यामात्यगण-परिवृतस्य पूर्वस्यां दिशि चक्ररत्नं प्रादुर्भवति .... सूत्र उक्तम्- राज्ञश्चक्रवर्तिनो लोके प्रादुर्भावात् सप्तानां रत्नानां लोके प्रादुर्भावो भवति। तद्यथा- चक्ररत्नस्य, हस्तिरत्नस्य, अश्वरत्नस्य, मणिरत्नस्य .... तद्यथा-- द्वात्रिंशन्महापुरुषलक्षणान्येषां भवन्ति, तद्यथा बुद्धानाम्। ---पृ. 96

५४. पूर्णा अष्टाङ्गोपेतस्य पानीयस्य। तद्धि पानीयं शीतलं च स्वादु च लघु च मृदु चाच्छं च निष्प्रतिकं च, पिबतश्च कण्ठं न क्षिणोति, पीतं च कुक्षिं न व्याबाधते। --पृ. 98

५५. अष्टाङ्गोपेतस्येति।

शीतलाच्छलघुस्वादुमृदुनिःपूतिगन्धकम् ।
पीतं न बाधते कुक्षिं न कण्ठं क्षिणोति तज्जलम्।। --पृ. 98

५६. ....सर्वेऽष्टौ षोडशोत्सदाः ।। ५८।।

उक्तं हि भगवता--

इत्येते नरका अष्टावाख्याता दुरतिक्रमाः।

रौद्रकर्मभिराकीर्णाः प्रत्येकं षोडशोत्सदाः।।
चतुस्कन्धाश्चतुर्द्वारा विभक्ता भागशोऽसिताः।
अयःप्राकारपर्यन्ता अयसा प्रतिकुब्जिताः ।।
तप्ता चैवायसी भूमिर्ज्वलिता तेजसा युता।
अनेकयोजनशता स्फुटा तिष्ठति अर्चिषा ।।

षोडशोत्सदाः कतमे?
कुकूलं कुणपं चाथ क्षुरमार्गादिकं नदी।
तेषां चतुर्दिशम्, ... ।।५९।।

१. कुकूलं जानुमात्रम्। यत्र तेषां सत्त्वानां निक्षिप्ते संशीर्यते त्वङ्मांसशोणितम्, उत्क्षिप्ते पादे पुनरपि सञ्जायते त्वङ्मांसशोणितम्। ....४. चतुर्थ उत्सदो नदी वैतरणी पूर्णा। यस्यां ते सत्त्वा असिशक्तिप्रासहस्तैः पुरुषैरुभाभ्यां तीराभ्यां प्रतिवार्यमाणा ऊर्ध्वमपि गच्छन्तः स्विद्यन्ते पच्यन्ते, अधस्तिर्यगपि गच्छन्तः स्विद्यन्ते पच्यन्ते .... त एते चत्वार उत्सदा दिग्भेदेन षोडशोच्यन्ते।
--पृ. 98-99

५७. अष्टौ महानरकाः - सञ्जीवः, कालसूत्रः, संघातः, रौरवः, महारौरवः, तापनः, प्रतापनः, अवीचिश्चेति।
--पृ. 102

५८. संजीवः, यत्र सत्त्वान् म्रियमाणान् वायवो जीवयन्ति।........ अवीचिः, यत्रातिमात्राग्निज्वालालिङ्गितानां सत्त्वानां सुखवीचिरन्तरं नास्ति। --पृ. 102

५९. दुःखनिरन्तरत्वादवीचिः। .... तद्यथा-- सञ्जीवे च्छिन्नावभिन्नसम्पिष्टशरीराणां शीतला वायवो वान्ति, पुनरपि तान् सत्त्वान् सञ्जीवयन्ति। अत एव सञ्जीवः। ...तस्मादवीचेरूर्ध्वं सप्त नरकाः उपर्युपरि सन्निविष्टाः --प्रतापनः, तापनः, महारौरवः, रौरवः, सङ्घातः, कालसूत्रः, सञ्जीवश्च। --पृ. 102

६०. .... शीता अन्येऽष्टावर्बुदादयः।।
अन्ये शीतनरका अष्टौ। तद्यथा-- अर्बुदः, निरर्बुदः, अठठः, हहवः, हुहुवः, उत्पलः, पद्मः, महापद्मश्च। तेषां सत्त्वानां तीव्रशीताभिहितानां कायशब्दविकारानुरूपाण्येतानि नामानि। --पृ. 103

६१. क्रोधनाः क्रूरकर्माणः पापाभिरुचयश्च ये।
दुखितेषु च नन्दति जायन्ते यमराक्षसाः ।। --पृ. 105

६२. ....यमराक्षसा इति। पापकर्माणः सत्त्वा नरकपाला जायन्त इत्यर्थः। --पृ. 105

६३. कामदेवायुषा तुल्या अहोरात्रा यथाक्रमम्।
सञ्जीवादिषु षट्सु आयुस्तैस्तेषां कामदेववत्।।
अर्धं प्रतापने अवीचावन्तःकल्पम् ... । -पृ. 111

६४. ....परं पुनः।
कल्पं तिरश्चाम्, ...।। --पृ. 112

६५. कामदेवायुषा तुल्या अहोरात्रा यथाक्रमम्।
सञ्जीवादिषु षट्सु, ...
यावत् षण्णां कामावचराणां देवनिकायानामाथुरुक्तम्, ... सञ्जीवे, कालसूत्रे, सङ्घाते, रौरवे, महारौरवे, तापने च।

.... आयुस्तैस्तेषां कामदेववत्।।८२।।

तैरिदानीं स्वैरहोरात्रैस्तेषां यथा षण्णां कामावचराणां देवानामायुः, तथैव यथाक्रमं वेदितव्यम्। .... यो मनुष्याणां मासः, स प्रेतानामहोरात्रः। तेनाहोरात्रेण पञ्चवर्षशतान्यायुः। शीतनरकेष्वायुषः किं प्रमाणम्?

वाहाद् वर्षशतेनैकतिलोद्धारक्षयायुषः।
अर्वुदाद् विंशतिगुणप्रतिवृद्ध्यायुषः परे।। -पृ. 115-116

६६. हा चैत्ररथ हा वापि हा मन्दाकिनि हा प्रिये।
इत्यार्त्ता विलपन्तोऽपि गां पतन्ति दिवौकसः।। --पृ. 117

६७. देवेषु नास्ति मर्मच्छेदः। किं तु च्यवनधर्मणो देवपुत्रस्य पञ्चोपनिमित्तानि प्रादुर्भवन्ति-- .... पञ्च पुनर्निमित्तानि मरणं नातिवर्त्तन्ते-- वासांसि क्लिश्यन्ति, माला म्लायन्ति, कक्षाभ्यां स्वेदो मुच्यते, दौर्गन्ध्यं कायेऽवक्रामति, स्वे चासने देवपुत्रो नाभिरमते। --पृ. 118

६८. अथ म्रियमाणस्य कस्मिन् शरीरप्रदेशे विज्ञानं निरुध्यते? .... यदि तु क्रमेण च्यवते, ततः --

क्रमच्युतौ पादनाभिहृदयेषु मनश्च्युतिः।। ४३।।

अधोनृसुरगाजानां, ...। अधो गच्छन्तीत्यधोगाः, अपायगामिनः। ..... सुरान् गच्छतीति सुरगाः, देवगामिनः। .... कायेन्द्रियं हि म्रियमाणस्य तप्त इवोपले जलं निष्ठ्यूतं सङ्कोचमापद्यमानं पादादिष्वन्तर्धीयत इति। -पृ. 118-119

६९. निर्वाणं हि सर्वदुःखव्युपशमः। --पृ. 121

७०. एकांशतो व्याकरणं विभज्य परिपृच्छ्य च।
स्थाप्यं च मरणोत्पत्तिविशिष्टात्माऽन्यतादिवत्।।

भदन्तमहासाङ्घिका सूत्रं पठन्ति-- "चत्वारीमानि भिक्षवः प्रश्नव्याकरणानीति। .... तद्यथा- शाश्वतो लोकोऽशाश्वतः, शाश्वतश्चाशाश्वतश्च, ... भवति तथागतः परं मरणान्न भवति तथागतः परं मरणात्, यावदन्यो जीवोऽन्यच्छरीरमित्ययं भिक्षवः स्थापनीयः प्रश्नः" इति। --पृ. 127-128

७१. यः प्रतीत्यसमुत्पादो द्वादशाङ्गः ....।

तत्र द्वादशाङ्गानि-- अविद्या, संस्काराः, विज्ञानम्, नामरूपम्, षडायतनम्, स्पर्शः, वेदना, तृष्णा, उपादानम्, भवः, जातिः, जरामरणं च। --पृ. 129

७२. वालो हि प्रतीत्यसमुत्पन्नं संस्कारमात्रमिदमिति अप्रजानन् आत्मदृष्ट्यस्मिमानाभिनिविष्ट आत्मनः ...... आयतिसुखार्थं पुण्यम्, सुखादुःखासुखार्थमानिञ्ज्यम्, ऐहिकसुखार्थमपुण्यम्। --पृ. 132

७३. कललं प्रथमं भवति कललाज्ञायतेऽर्बुदः।
अर्बुदाज्ञायते पेशी पेशीतो जायते घनः ।।
घनात् प्रशाखा जायन्ते केशरोमनखादयः*
इन्द्रियाणि च रूपीणि व्यञ्जनान्यनुपूर्वशः।। --पृ. 132

७४. स प्रतीत्यसमुत्पादो द्वादशाङ्गस्त्रिकाण्डकः।
पूर्वापरान्तयोर्द्वे द्वे मध्येऽष्टौ परिपूरिणः ।।२०।।

त्रीणि काण्डानि पूर्वापरान्तमध्यान्यतीतानागतप्रत्युपन्नानि जन्मानि। .... जातेः परेण यावद्वेदनावस्था जरामरणम्। यान्येवेह चत्वार्यङ्गानि-- नामरूपषडायतनस्पर्शवेदनाः, तान्येवान्यत्र जरामरणमित्येतानि द्वादशाङ्गानि।। --पृ. 135

७५. द्रष्टव्यम्-- स पुनरेष द्वादशाङ्गः प्रतीत्यसमुत्पादस्त्रिस्वभावो वेदितव्यः क्लेशकर्मवस्तूनि। ..... **फलं तथा**। सप्तैवाङ्गानि फलभूतानि। शेषाणि पञ्च हेतुभूतानि; कर्मक्लेशस्वभावत्वात्। --पृ. 136

७६. सूत्रेऽप्येष सत्यानां दृष्ठान्त इति। व्याध्यादिसूत्रे। ...... अयं दुःखसमुदयः, अयं दुःखनिरोधः, इयं दुःखनिरोधगामिनी प्रतिपदार्यसत्यमिति यथाभूतं प्रजानाति'' इति। --पृ. 141

७७. द्रष्टव्यम्-- आर्यसत्यानीति सूत्र उच्यन्ते। ..... अत आर्याणामेतानि सत्यान्युच्यन्ते न त्वनार्याणाम्; विपरीतदर्शनात्।

> ''यदार्याः सुखतः प्राहुस्तत् परे दुखतो विदुः।
> यत् परे सुखतः प्राहुस्तदार्या दुःखतो विदुः ।। --पृ. 144

७८. चित्तेन नीयते लोकः, चित्तेन परिकृष्यते।
एकधर्मस्य चित्तस्य सर्वधर्मा वशानुगाः।। --पृ. 147

अभिधर्मदीप :

१. आत्मात्मीयध्रुवोच्छेदनास्तिहीनाग्रदृष्टयः।
अहेत्वमार्गे तद्दृष्टिरेतास्ता पञ्च दृष्टयः ।।
ईश्वरादिषु नित्यात्मविपर्यासात् प्रवर्तते।
कारणाभिनिवेशोऽतो दुःखदृग्घेय एव सा।। -पृ. 24

अभिधर्मसमुच्चयः :

१. सत्कायदृष्टिः कतमा।...... पञ्चोपादानस्कन्धान् शाश्वततो वा उच्छेदतो वा समनुपश्यतः या क्षान्ती रुचिर्मतिः प्रेक्षा दृष्टिः। .... मिथ्यादृष्टिः कतमा .....अकुशले प्रवृत्तिकर्मिका कुशले चाप्रवृत्तिकर्मिका वा। -पृ. 24-25

२. मात्सर्यं कतमत्? साभसत्काराध्यवसितस्य ... रागांशिश्चेतस ... असंलेखसन्निश्रयदानकर्मकम्। -पृ. 35

३. शाठ्यं कतमत्? लाभसत्काराध्यवसितस्य ..... सम्यगववादलाभपरिपन्थकरम्। -पृ. 35

४. माया कतमा? लाभसत्काराध्यवसितस्य ..... मिथ्याजीवसन्निश्रयदानकर्मिका। -पृ. 36

६. कौसीद्यं कतमत्? निद्रापार्श्वशयनसुखमल्लिकामागम्य मोहांशिकश्चेतसोऽनभ्युत्साहः। कुशलपक्षप्रयोगपरिपन्थकर्मकम्। -पृ. 36

७. मानः कतमः? सत्कायदृष्टिसन्निश्रयेण चित्तस्योन्नतिः। अगौरवदुःखोत्पत्तिसन्निश्रयदानकर्मकः। -पृ. 36

८. रागः कतमः? त्रैधातुकोऽनुनयः। दुःखसंजननकर्मकः। -पृ. 37

९. मदः कतमः? आरोग्यं वा आगम्य यौवनं वा दीर्घायुष्कलक्षणं वोपलभ्यान्तमान्यतमां वा सास्रवां संपत्तिं रागांशिकन्नन्दीसौमनस्यम्। सर्वक्लेशोपक्लेशसन्निश्रयदानकर्मकः। -पृ. 37

१०. कर्मप्रभेदःपुनस्त्रिविधः। दृष्टधर्मवेदनीयं कर्म उपपद्यवेदनीयं कर्म अपरपर्यायवेदनीयं कर्म च। .... अपरपर्यायवेदनीयं कर्म कतमत्। तत्कर्म .... तदुच्यतेऽपरपर्यायवेदनीयं कर्म।।--पृ. 54-55

११. श्रद्धा कतमा। अस्तित्वगुणवत्त्वशक्तत्वेष्वभिसंप्रत्ययः प्रसादोऽभिलाषः। च्छन्दसन्निश्रयदानकर्मिका। -पृ. 56

१२. ह्रीः कतमा। स्वयमवद्येन लज्जना। दुश्चरितसंयमसन्निश्रयदानकर्मिका। --पृ. 57

१३. अपत्राप्यं कतमत्। परतोऽवद्येन लज्जना। तत्कर्मकमेव। --पृ. 57

१४. प्रज्ञा कतमा। उपपरीक्ष्य एव वस्तुनि धर्माणां प्रविचयः। संशयव्यावर्त्तनकर्मिका। --पृ. 57

१५. अप्रमाणानि कतमानि। चत्वारि अप्रमाणानि। मैत्री कतमा। .... उपेक्षा कतमा। ध्यानं निश्रित्य सत्त्वा हितं लभेरन्निति विहारसमृद्धौ समाधिः प्रज्ञा शेषं पूर्ववत्। -पृ. 63

१६. प्रथमं ध्यानं पञ्चाङ्गम्। पञ्चाङ्गानि वितर्को विचारः प्रीतिः सुखं चित्तैकाग्रता च। .... चतुर्थं ध्यानं चतुरङ्गम्। चत्वार्यङ्गानि उपेक्षापरिशुद्धिः स्मृतिपरिशुद्धिः अदुःखासुखा वेदना चित्तैकाग्रता च। -पृ. 66

१७. औद्धत्यं कतमत्। शुभनिमित्तमनुसरतो रागांशिकश्चेतसोऽव्युपशमः। ..... कौकृत्यं कतमत् .... कुशलमकुशलमव्याकृतं काले अकाले युक्तमयुक्तञ्च। चित्तस्थितिपरिपन्थकर्मकः। - पृ. 68

१८. विचिकित्सा कतमा। सत्येषु विमतिः। कुशलपक्षाप्रवृत्तिसन्निश्रयदानकर्मिका। --पृ. 68

१९. निवरणानि पञ्च। कामच्छन्दनिवरणम् व्यापादनिवरणम् स्त्यानमिद्धनिवरणम् औद्धत्यकौकृत्यनिवरणम् विचिकित्सानिवरणं च। ...... शमथे प्रग्रहे उपेक्षायां च। --पृ. 69

२०. श्रद्धा कतमा। अस्तित्वगुणवत्त्वशक्तत्वेष्वभिसंप्रत्ययः .... कुशलपक्षपरिपूरणपरिनिष्पादनकर्मकम्। स्मृतिः ..... प्रज्ञा कतमा। उपपरीक्ष्य एव वस्तुनि धर्माणां प्रविचयः। .... सत्याभिसमयसमुत्थानतः ऊष्मगतमूर्धपरिकर्मतश्च क्षान्तिलौकिकाग्रधर्मनिर्हारः। यथा पञ्चेन्द्रियाणि तथा पञ्च बलानि। एषां विशेषः तैः विपक्षान्तरायनिर्ल्लेखोऽनवमृद्यतेति बलानीत्युच्यन्ते। --पृ. 70

२१. यदुक्तं सूत्रे-- त्रिविधं कर्म पुण्यकर्म अपुण्यकर्म आनिंज्यकर्म च। .... फलविपाकसंमूढस्यापुण्याः संस्काराः। तत्त्वार्थसंमूढस्य पुण्यानिंज्याः संस्काराः। --पृ. 77

२२. संयोजनानि कति कथं संयोजनं कुत्र संयोजनम्। संयोजनानि नव। अनुनयसंयोजनम् प्रतिघसंयोजनम् मानसंयोजनम् अविद्यासंयोजनम् दृष्टिसंयोजनम् परामर्शसंयोजनम् विचिकित्सासंयोजनम् ईर्ष्यासंयोजनम् मात्सर्यसंयोजनं च।

अनुनयसंयोजनं कतमत्। .... ईर्ष्यासंयोजनेन संप्रयुक्तो लाभसत्कारान् अनुनयति धर्मं न गुरूकरोति। लाभसत्कारगुरुकारेणाकुशलसमुदाचारः कुशलासमुदाचारश्च। .... मात्सर्यसंयोजनेन संप्रयुक्त उपचयमनुनयति तद्वर्जनतां च न सत्करोति। उपचयानुनयेनाकुशलसमुदाचारः कुशलासमुदाचारश्च। तेन आयत्यां लौकिकदुःखाभिनिवृत्तौ दुःखेन संयुज्यते। --पृ. 78-79

२३. सप्त बोध्यङ्गानामालम्बनं कतमत्। चतुर्णामार्यसत्यानां यथाभूतता। ..... पदैर्यथाक्रमं चतुःसत्यालम्बना बोध्यङ्गभावना परिदीपिता। भावनाफलं कतमत्। दर्शनहेयानां क्लेशानां प्रहाणम्। --पृ. 123

२४. शमथः कतमः। अध्यात्मं चित्तस्य उपनिबन्धः स्थापना संस्थापना अवस्थापना उपस्थापना दमनं शमनं व्युपशमनम् एकोतीकरणं समाधानं च। विपश्यना कतमा। .... एकत्यः न शमथस्य लाभी नापि विपश्यनायाः। ..... तस्य शमथविपश्यनोभयमार्गयुक्तस्य समं युगपत् प्रवृत्तिः। --पृ. 124-125

२५. द्रष्टव्यम्-- कथमङ्गसमासतोऽपि। आक्षेपाङ्गमाक्षिप्ताङ्गमभिनिर्वर्त्तकाङ्गमभिनिर्वृत्त्यङ्गं च। .... नामरूपषडायतनस्पर्शवेदनानुपूर्व्या च सत्त्वानभिनिर्वर्त्तयति प्रत्ययश्च भवति जरामरणस्य। जरामरणं किंकर्मकम्। पुनः पुनर्वयःपरिणामेन जीवितपरिणामेन च सत्त्वान्योजयति। --पृ. 134

२६. कथमङ्गसंक्लेशसंग्रहतः। या चाविद्या या च तृष्णा यच्चोपादानमित्ययं संक्लेशसंग्रहः। ये च संस्कारा यच्च विज्ञानं यश्च भव इत्ययं कर्मक्लेशसंग्रहः। शेषाणि जन्मसंक्लेशसंग्रहः।। --पृ. 136

२७. अष्टानामार्यमार्गाङ्गानामालम्बनं कतमत्। ..... भावनाफलं कतमत्। परिच्छेदः परसंप्रापणं परसंप्रत्ययः क्लेशावरणविशोधनमुपक्लेशावरणविशोधनं वैशेषिकगुणावरणविशोधनं च। --पृ. 140

२८. द्रष्टव्यम्-- चत्वार्यार्यसत्यानि दुःखं समुदयो निरोधो मार्गश्च। --पृ. 141

२९. कस्मात् स्कन्धा उपादानमित्युच्यन्ते। उपादानेन सहितत्वात् स्कन्धा उपादनमित्युच्यन्ते। ..... कस्माद् धातव आयतनानि च सोपादानधर्मा इत्युच्यन्ते। तत्र स्कन्धवन्निर्देशः। --पृ. 142

३०. द्रष्टव्यम्-- दुःखसत्यं कतमत्। तत्सत्त्वजन्मतो जन्माधिष्ठानतश्च वेदितव्यम्। .... बृहत्फलेष्वसंज्ञिसत्त्वेष्वबृहेष्वतपेषु सुदृशेषु सुदर्शनेष्वकनिष्ठेष्वाकाशानन्त्यायतनेषु विज्ञानानन्त्यायतनेष्वाकिञ्चन्यायतनेषु नैवसंज्ञानासंज्ञायतनेषु।। --पृ. 142

३१. द्रष्टव्यम्-- जातिर्दुःखं जरा दुःखं व्याधिर्दुःखं मरणं दुःखम् अप्रियसंप्रयोगो दुःखं प्रियविप्रयोगो दुःखं यदपीच्छन्न लभते तदपि दुःखं संक्षिप्तेन पञ्चोपादानस्कन्धा दुःखम्। ...... संक्षिप्तेन पञ्चोपादानस्कन्धाः किमुपादाय दुःखम्। दौष्ठुल्यदुःखतामुपादाय। --पृ. 142

३२. समुदयसत्यं कतमत्। क्लेशःक्लेशाधिपतेयश्च कर्म। प्राधान्यनिर्देशस्तु भगवता तृष्णा पौनर्भविकी नन्दीरागसहगता तत्र तत्राभिनन्दिनी समुदयसत्यनिर्देशेन निर्दिष्टा। --पृ. 143

३३. निरोधसत्यं कतमत्। लक्षणतः गाम्भीर्यतः संवृतितः परमार्थतः अपरिपूरितः परिपूरितः निरलंकारतः सालंकारतः शेषतः अशेषतः अग्रतः पर्यायतश्च निरोधसत्यं वेदितव्यम्। --पृ. 143

३४. द्रष्टव्यम्-- मार्गसत्यं कतमत्। येन दुःखं परिजानीते समुदयं प्रजहाति निरोधं साक्षात्करोति मार्गं भावयति। एतत् संक्षेपेण मार्गसत्यलक्षणमित्युच्यते। पुनः मार्गः पञ्चविधः। संभारमार्गः प्रयोगमार्गः दर्शनमार्गः भावनामार्गः निष्ठामार्गश्च। --पृ. 143

अभिधम्मत्थसंगहो :

१. तत्थ अकुसलं कायकम्मं वचीकम्मं मनोकम्मञ्चेति कम्मद्वारवसेन तिविधं होति। कथं? पाणातिपातो ..... कायकम्मं नाम। मुसावादो .... वचीद्वारे बाहुल्लवुत्तितो वचीकम्मं नाम। अभिज्झा .... मनस्मिं येव बाहुल्लवुत्तितो मनोकम्मं नाम। -पृ. 18

अमृतकणिका नामसंगीति-टीका :

१. सम्यक् समाधिवशात् सकलविकल्पक्लेशानरीन् हतवान् (इत्यर्हन्)। -पृ. 8

अभिसमयालंकारस्फुटार्था :

बुद्धाद्यालम्बना श्रद्धा वीर्यं दानादिगोचरम्।
स्मृतिराशयसम्पत्तिः समाधिरविकल्पना।।
धर्मेषु सर्वैराकारैर्ज्ञानं प्रज्ञेति पञ्चधा।
तीक्ष्णैः सुबोधा सम्बोधिर्दुर्बोधा मृदुभिर्मता।।

इति। अनिन्द्रियस्वभावाः श्रद्धावीर्यस्मृतिसमादिविशिष्टप्रज्ञाः .... मध्यैः प्रत्येकबुद्धबोधिर्मृदुभिः श्रावकबोधिश्चाधिगम्यत इति। -पृ. 70

अर्थविनिश्चयसूत्र एवं निबन्धनम् :

१. इह भिक्षव आर्यश्रावको .... पुरुषदम्यसारथिः शास्ता देवानां च मनुष्याणां च बुद्धो भगवानिति। -पृ. 6

२. इत्यपि स भगवानित्यादि विस्तरः। एभिश्च ..... तत्र भगवानित्यनेन विबन्धभङ्गं दर्शयति, ... शास्तृत्वसम्पदो लाभात्। -पृ. 7

३. तथागतोऽर्हन् सम्यक्सम्बुद्ध...... प्रहाणसम्पदा भगवानर्हन्नित्युच्यते, अरीन् हतवानिति .... सम्यक्सम्बुद्ध इत्युच्यते, सम्यगविपरीतं समन्ताद् धर्मान्...... भगवत्येवोपलभ्यते। अतो .... प्राप्त इति निर्दिश्यते। -पृ. 8-9

४. विद्याचरणसम्पन्न इत्यनेन .... तिस्रो वा शिक्षा विद्याचरणम्। अधिप्रज्ञशिक्षा विद्या..... विद्यायास्तु पूर्वग्रहणं .. तथा हि प्रज्ञया चक्षुषेव ... विद्याचरणशब्देन तिस्रः शिक्षा निर्दिश्यन्ते। -पृ. 9

५. सुगत इत्यनेन.... सुष्ठु गतः सुगतोऽपुनरावृत्त्यर्थेन, ... निःशेषं वा गतः सुगतः ... एतच्चार्थद्वयं ... बाह्या हि न ... श्रावकादयो यद्यपि ... निःशेषं गताः, सर्वज्ञेयेषु ज्ञानविबन्धत्वात्। -पृ. 9-10

६. लोकविदित्यनेन .. लोकं वेत्तीति लोकवित्। भव्याभव्यलोकपरिज्ञानादसौ ... तथा हि भगवांस्त्रि... को हीयते, को वर्धते, ... कस्यानवरोपितानि कुशलमूलान्यवरोपयेयम्, ... परिपक्वानि परिमोचयेयमिति। -पृ. 11

७. अनुत्तरः पुरुषदम्यसारथिरित्यनेन............. व्यावर्त्य प्रणीते प्रतिष्ठापयति। -पृ. 11

८. शास्ता देवानां च मनुष्याणां.... यद्यपि भगवान् विशेषेण .... यथार्थानुशासनमत्र शास्तृकर्माभिप्रेतम्। तस्य च देवमनुष्या भाजनम्। अतो देवमनुष्याणामित्युच्यते। -पृ. 12

९. बुद्धो भगवानिति पुनरेतत्पदद्वयं किमर्थम्? .... पदानां पुनः पिण्डार्थः ---
भङ्क्त्वा विबन्धं शास्तृत्वसम्पदं यो हि येन सः।
तथागतः शास्तृकर्म यच्च यैश्च परिग्रहः।। -पृ. 12

१०. धर्मेऽवेत्य प्रसादेन ... स्वाख्यातो भगवता धर्मः सांदृष्टिको निर्ज्वर .... पिपासाप्रतिविनयः, आलयसमुद्घातः, धर्मोपच्छेदः, शून्यतोपलम्भः, तृष्णाक्षयः, विरागः, निरोधः, निर्वाणम्। -पृ. 13

११. स्वाख्यातो भगवता... यथासूत्रं स्वाख्यात इत्युद्देशः.......... सांदृष्टिक इत्येवमन्यत्रापि योज्यम्। -पृ. 13

१२. सङ्घेऽवेत्यप्रसादेन .... चत्वारि पुरुषयुगानि, अष्टौ पुरुषपुद्गला... श्रद्धासम्पन्नः, श्रुतसम्पन्नः, ... आहवनीयः, प्राहवनीयः, अञ्जलिकरणीयः, सामीचीकरणीयः, अनुत्तरं पुण्यक्षेत्रं दक्षिणीयो लोकस्य। -पृ. 14

१३. आर्यकान्तैः शीलैः .... अखण्डानि, अच्छिद्राणि, अशबलानि, ... सुमाप्तानि, सुसमारब्धानि, विज्ञप्रशस्तानि, अगर्हितानि च विज्ञैरिति। -पृ. 15

१४. कायवाङ्मनसां दशकुशलेषु कर्मपथेषु .... प्राणातिपातादत्तादानकाममिथ्याचारादविरतिः ... अनृतपैशुन्यपारुष्यसम्भिन्नप्रलापाद् विरतिः .... अभिध्याव्यापादमिथ्यादृष्टिभ्यो विरतिः। -पृ. 17

१५. तत्र प्राणातिपातः कतमः? प्राणी च भवति प्राणिसंज्ञा च भवति, बधकचित्तं चोत्पादयति। उपक्रमं च करोति। जीविताद् व्यपरोपयति। अयमुच्यते भिक्षवः प्राणातिपातः। अन्यत्र प्रमादाददृष्टाद्वा अप्राणिवधः। -पृ. 19

१६. तत्रादत्तादानं कतमत्? स्तेयचित्तस्य परद्रव्यस्वीकरणमदत्तादानम्। अन्यत्र मातृपितृभ्रातृस्वजनमित्रद्रव्यस्य स्वल्पस्यानुपरोधिनो ग्रहणं नादत्तादानम्। -पृ. 19

१७. तत्र काममिथ्याचारः कतमः? परस्त्रीणामुपभोगः भर्तृराजमातृपितृरक्षितानामथवा अस्थानगम्यादेशकालेषु विप्रतिपत्तिः। अयमुच्यते काममिथ्याचारः। कायिकमेतत् त्रिविधम्। -पृ. 20

१८. अनृतं कतमत्? साक्षिप्रश्ने यथाभूताद् वितथवचनमनृतम्। ..... इदमुच्यते अनृतम्। -पृ. 20

१९. पैशुन्यं कतमत्? अभूतेन सत्येन वा भेदकरं वचनं पैशुन्यं तत्। इदमुच्यते पैशुन्यम्। -पृ. 21

२०. तत्र पारुष्यं कतमत्? परदुःखचिकीर्षोरनिष्टवचनश्रावणं पारुष्यम्। दुःखमस्य भवत्वित्यनया बुद्ध्या यदनिष्टवचनश्रावणं क्रियते तत्पारुष्यम्। इमदुच्यते पारुष्यम्। -पृ. 21

२१. सम्भिन्नप्रलापः कतमः? तद्यथा-- राजकथा, चोरकथा, युद्धकथा, मद्यकथा, द्यूतकथा, स्त्रीकथा, आख्यायिककथा कथनं वा। अयमुच्यते सम्भिन्नप्रलापः। वाचिकमेतच्चतुर्विधम्। -पृ. 22

२२. तत्राभिध्या कतमा? परद्रव्यस्वीकरणेच्छा अभिध्या। .... इदमुच्यतेऽभिध्या। -पृ. 22

२३. तत्र व्यापादः कतमः? परजीवितव्यपरोपणावच्छेदनपीडादिचिन्तनम्। अयमुच्यते व्यापादः। -पृ. 23

२४. तत्र मिथ्यादृष्टिः कतमा? नास्त्ययं लोकः, नास्ति परलोक इति पूर्ववत्। एतन्मानसं त्रिविधम्। -पृ. 23

२५. तत्र व्यापादबहुलानां तत्प्रहाणाय मैत्री प्रतिपक्षः। .... 'मोदन्तां वत सत्त्वाः' इति मनसिकुर्वन् मुदिताम्। 'सत्त्वाः' इत्येव तु मनसिकुर्वन्नुपेक्षां सम्पद्यते। -पृ. 63

२६. तत्र भिक्षवः कतमानि चत्वारि ध्यानानि? १. इह भिक्षवो भिक्षुः विविक्तं कामैः विविक्तं पापकैरकुशलैर्धर्मैः सवितर्कं सविचारं विवेकजं प्रीतिसुखं प्रथमं ध्यानमुपसंपद्य विहरति। .... ४. स सुखस्य च प्रहाणात् दुःखस्य च प्रहाणात् पूर्वमेव च सौमनस्यदौर्मनस्ययोरस्तङ्गमाददुःखासुखमुपेक्षास्मृतिपरिशुद्धं चतुर्थं ध्यानमुपसंपद्य विहरति। इमानि भिक्षवश्चत्वारि ध्यानानि। -पृ. 65

२७. तत्र भिक्षवः कतमानि पञ्च बलानि? यदुत-- श्रद्धाबलम्, वीर्यबलम्, स्मृतिबलम्, समाधिबलम्, प्रज्ञाबलम्। .... तानि नावमृद्यन्ते, तस्माद् बलान्युच्यन्ते। -पृ. 70

२८. इह भिक्षवो भिक्षुरिति। इहेति कामधातौ। अध्यात्मकाये प्रत्यात्मकाये कायानुदर्शीति। ...... संप्रजानन्निति। प्रज्ञासमन्वित इत्यर्थः। विनीय लोकेऽभिध्यादौर्मनस्ये इति। अपनीयेत्यर्थः। -पृ. 82

२९. तक्ष भिक्षवः कतमानि सप्त बोध्यङ्गानि? तद्यथा-- स्मृतिसंवोध्यङ्गम्, धर्मप्रविचयसंबोध्यङ्गम्, वीर्यसंवोध्यङ्गम्, प्रीतिसंबोध्यङ्गम्, प्रश्रब्धिसंबोध्यङ्गम्, समाधिसंबोध्यङ्गम्, ... ७. उपेक्षासंबोध्यङ्गं भावयति विवेकनिश्रितं, विरागनिश्रितं, निरोधनिश्रितं, व्यवसर्गपरिणतम्। इमानि भिक्षवः सप्त बोध्यङ्गानि। -पृ. 122-123

३०. धर्मप्रविचयो बोधिर्बोध्यङ्गं च। शिष्टानि बोध्यङ्गान्येव। .... प्रीतिस्तु सौमनस्यस्वभावत्वात्। एकस्मिंश्चित्तचैत्तकलापे च वेदनाद्रव्यद्वयस्यासम्भवात्। तस्मात्संस्कारोपेक्षैवोपेक्षाङ्गमिति। बोध्यासन्नत्वाद् भावनामार्गे बोध्यङ्गानीष्यन्ते। -पृ. 123

३१. तत्र कतमा अविद्या? यदुत-- पूर्वान्तेऽज्ञानम्, ... षट्सु वा स्पर्शायतनेषु यथाभूतमज्ञानमदर्शनमनभिस(म)यस्तमः संमोहोऽविद्यान्धकारम्। इयमुच्यतेऽविद्येति। -पृ. 131

३२. अत्र च प्रतीत्यसमुत्पादे त्रीण्यङ्गानि क्लेशस्वभावानि-- अविद्यातृष्णोपादानानि ; अङ्गद्वयं कर्मस्वभावं-- संस्कारा भवश्च ; .. विज्ञाननामरूपषडयतनस्पर्शवेदनाजातिजरामराख्यानि, क्लेशकर्महेतुत्वात्। -पृ. 136

३३. द्रष्टव्यम्-- तत्र भिक्षवः कतम आर्याष्टाङ्गो मार्गः? तद्यथा-- सम्यग्दृष्टिः, सम्यक्संकल्पः, सम्यग्वाक्, सम्यक्कर्मान्तः, सम्यगाजीवः, सम्यग्व्यायामः, सम्यक्स्मृतिः सम्यक्समाधिश्च। .... सम्यक्समाधिः कतमः? चत्वारि ध्यानानि। .... इमानि खलु भिक्षवश्चत्वारि ध्यानानि। अयमुच्यते सम्यक्समाधिः। अयं भिक्षव आर्याष्टाङ्गो मार्गः। -पृ. 139-140

३४. द्रष्टव्यम्-- तत्र भिक्षवः कतमानि चत्वारि स्मृत्युपस्थानानि? १. इह भिक्षवो भिक्षुरध्यात्मं काये कायानुदर्शी विहरति............ ४. अध्यात्मधर्मेषु, बहिर्धाधर्मेषु, अध्यात्मबहिर्धाधर्मेषु धर्मानुदर्शी विहरति आतापी संप्रजानन् स्मृतिमान् विनीय लोके अभिध्यादौर्मनस्ये। इमानि भिक्षवश्चत्वारि स्मृत्युपस्थानानि। -पृ. 141

३५. तत्र भिक्षवः कतमानि चत्वार्यार्यसत्यानि? तद्यथा-- दुःखमार्यसत्यम्, दुःखसमुदय आर्यसत्यम्, दुःखनिरोध आर्यसत्यम्, दुःखनिरोधगामिनीप्रतिपदार्यसत्यम्। -पृ. 141

३६. तद्यथा- जातिर्दुःखम्, जरादुःखम्, व्याधिर्दुःखम्, मरणं दुःखम्, प्रियवियोगो दुःखम्, अप्रियसंयोगो दुःखम्, यदपीच्छन् पर्येषमाणे न लभते तदपि दुःखम्, संक्षिप्तेन पञ्चोपादानस्कन्धा दुःखम्। -पृ. 142

३७. दुःखसमुदय आर्यसत्यं कतमत्? तद्यथा-- तृष्णा पौनर्भविकी, नन्दीरागसहगता, तत्रतत्राभिनन्दिनी। इदमुच्यते दुःखसमुदय आर्यसत्यम्। -पृ. 143

३८. द्रष्टव्यम्-- दुःखनिरोध आर्यसत्यं कतमत्? यदस्या एव तृष्णायाः पौनर्भविक्या नन्दीरागसहगतायास्तत्रतत्राभिनन्दिन्या अशेषतः प्रहाणं, ... विरागो, निरोधो, व्युपशमोऽस्तंगमः। इदमुच्यते दुःखनिरोध आर्यसत्यम्। -पृ. 143

३९. तत्र दुःखनिरोधगामिनीप्रतिपदार्यसत्यं कतमत्? अयमेव सम्यग्दृष्ट्यादिरार्याष्टाङ्गो मार्गः। तद्यथा-- सम्यग्दृष्टिः, सम्यक्संकल्पः, सम्यक्वाक्, सम्यक्कर्मान्तः, ...इदमुच्यते दुःखनिरोधगामिनीप्रतिपदार्यसत्यम्। -पृ. 144

अवदानशतकम् :

१. ब्रह्मा हि मातापितरौ पूर्वाचार्यौ तथैव च।
आह्वनीयौ पुत्रस्य अग्निः स्याद् देवतानि च।।
तस्मादेतौ नमस्येत सत्कुर्याच्चैव पण्डितः।
उद्वर्तनेन स्नानेन पादानां धावनेन च।
अथ वा अन्नपानेन वस्त्रशय्यासनेन च।।
तया स परिचर्यया मातापितृषु पण्डितः।
इह चानिन्दितो भवति प्रेत्य स्वर्गे च मोदते।। -- पृ. 32
२. न प्रणश्यन्ति कर्माणि कल्पकोटिशतैरपि।
सामग्रीं प्राप्यकालं न फलन्ति खलु देहिनाम्।। -पृ. 54
३. वान्ताशा उज्झिताशाश्च खेटमूत्रोपजीविनः।
पूयशोणितविष्ठाशा घोराः प्रकृतिदुखिताः ।। -पृ. 113

अष्टसाहस्रिकाप्रज्ञापारमितासूत्र एवं आलोक-टीका :

१. क. प्रमृष्टपापधर्मतया मृष्टगात्रता, ख. विशुद्धचित्तत्वात् विशुद्धगात्रता, ग. सुविशुद्धधर्म- देशनात् विशुद्धनेत्रता, घ. व्यपगतकालधर्मविनयत्वेन व्यपगततिलकालकगात्रता। -पृ. 5

२. अष्टसाहस्रिकाप्रज्ञापारमितायामुक्तम्- यदाहं देवपुत्रा ....दीपवत्यां .... तदाहं दीपंकरेण .... सम्यक्सम्बोधौ- 'भविष्यसि त्वं माणव, ... च मनुष्याणां च बुद्धो भगवानिति'। -पृ. 6

३. क्लेशकर्म तथा जन्म क्लेशज्ञेयावृती तथा।
येन वैपक्षिका भग्नास्तेनेह भगवान् स्मृतः।।
इत्यार्षोक्त्या नैरुक्तविधानेन क्लेशादिकं भग्नवानिति भगवान्। - पृ. 7

४. प्रज्ञापारमिता ज्ञानमद्वयं सा तथागतः। -पृ. 7

५. अचलिता हि तथता। .... या च तथता, स तथागतः, ...या च भूतकोटिः स तथागतः, ...या चा शून्यता, स तथागतः। ....यश्च आकाशधातुः, स तथागतः। -पृ. 7

६. पूजादक्षिणागुणप्रकर्षाद्यर्हतया अर्हन्तः ; ... हतारित्वात् अर्हन्तः। -पृ. 8

७. सर्वाकाराविपरीतधर्मदैशिकत्वेन परार्थसंपदा तथागताः। सवासनक्लेशज्ञेयावरणप्रहाणयोगात् स्वार्थसंपदा अर्हन्तः। सम्यक्संपद्वयावाहकमार्गाधिगमात् सम्यक्संबुद्धाः। -पृ. 8

८. तथागतोऽर्हन् सम्यक्संबुद्धः .... ज्ञानप्रहाणसंपद्भेदेन द्विविधा। तत्र अरीन् ...... परिपूर्णा च भगवतः कथिता। तथा हि- .... सर्वाकारशास्ता चेति प्रतिपादितम्। -पृ. 8

९. अनेन शास्तृत्वसंपदः प्राप्तिहेतुं .... विद्याचरणशब्देन तिस्रः शिक्षा निर्दिश्यन्ते। -पृ. 9

१०. तथा हि-- लोकत्तरेण मार्गेण शोभनं .... सुपरिपूर्णघटवत्। .... ज्ञानविबन्धात्र निःशेषं गताः। -पृ. 10

११. अस्याश्च शास्तृत्वसंपदो द्विविधं ... दर्शयति-- लोकविद् इति। भव्याभव्यलोकपरिज्ञानादसौ लोकविदुच्यते। तथा हि-- भगवान् त्रिःकृत्वो रात्रेस्त्रिःकृत्वो ... लोकं व्यवलोकयति। -पृ. 11

१२. भव्याभव्यांल्लोकान् व्यवलोक्य भगवान् ...... पुरुषदम्यानां तीव्ररागद्वेषमोहमानानामार्यसुन्दरानन्दाङ्गुलीमालोरुविल्वकाश्यपमहाराजकप्फिणप्रभृतीनां विनायक इति प्रदर्शनार्थम्। -पृ 11

१३. यद्यपि भगवान् न विशेषेण ...... तस्य च देवमनुष्या... मनुष्याणां चेत्युच्यते। -पृ. 12

१४. तत्र सकलपदार्थावबोधेन प्रकृष्टा .... अक्षयतासम्पत्त्या, अतुलतासम्पत्त्या .... भगवान्। -पृ. 12

१५. तत्र प्राणातिपातः परेषां जीवितक्षयः। .... अनङ्गादौ स्त्र्याद्यभिगमनं काममिथ्याचारः।
वल्कलैः सगुडैः काचित्क्रियते मधुनापरा।
पिष्टकिण्वजलैरन्या सुरा ज्ञेया त्रिधा बुधैः।।
मैरेयं गुडधात्र्यम्बुधातकीसंस्कृतं विदुः।
मदयेदशितं पीतं यत्तन्मद्यमिति स्मृतम्।।
तदेतत् त्रिविधं सर्वं शुक्लधर्मविपक्षतः।
प्रमादस्थानमित्याह प्रसङ्गादागतं पुनः।।
अभूताभिधानमनृतवचनम्। .... व्यापादः ..... नास्तीति दृष्टिर्मिथ्यादर्शनम्। -पृ. 17

१७. "षट्पारमितापूर्णाधिवचनमेतत् यदुत प्रज्ञापारमिता" .... ध्यानपारमिता। तस्यैव दानं ददतो मायाबुद्धिप्रत्युपस्थानेन कस्यचिदुपकारापकारादर्शनात् प्रज्ञापारमिता" इति। -पृ. 29

१८. तेषां तथा सुचिरं महानिरयान्महानिरयं संक्रामतां तेजःसंवर्तनी प्रादुर्भविष्यति। .... ते पुनरेव तानि महानिरयेषु महान्ति महानिरयदुःखानि प्रत्यनुभविष्यन्ति। तावत्प्रत्यनुभविष्यन्ति, यावत्पुनरेव तेजःसंवर्तनी प्रादुर्भविष्यति। एवं ते बहुदुःखवेदनीयं कर्म प्रत्यनुभविष्यन्ति। -पृ. 85

१९. तेजःसंवर्तनी इति नरकगतिमुपादाय यावद्ब्रह्मलोके कश्चित् सत्त्वो नावशिष्टो भवति, तदा शून्यभाजने सप्तसूर्याः प्रादुर्भूय ..... प्रथमं ध्यानं दहन्ति। अन्येषु लोकधातुषु इति त्रिसाहस्रमहासाहस्रेषु। -पृ. 85

२०. चित्तानवलीनत्वानुत्रासादिना उपाकौशल्येन यथाशयं "क्षितीशेष्टराज्ञीमरणनिवेदनन्यायेन" मात्सर्यादिधर्मवियुक्तः समस्तवस्तुनैरात्म्यादिदेशकः सुगतिफलादिप्रापकत्वेन कल्याणमित्रम्। --पृ. 91

२१. न विद्यन्ते उपधयः स्कन्धाः सर्वरागादिप्रहाणावशेषीभूतत्वेन शेषा यस्मिन्निर्वाणे तत्तथोक्तम्। निर्वान्त्यस्मिन् सर्वे विकल्पाः इति निर्वाणं तथता। --पृ. 121

२२. तत्र पूर्वजन्मनि क्लेशावस्था इह अविद्या, ... इत्याद्यन्तयोर्द्वे द्वे मध्यस्थौ इति त्रिकाण्डो द्वादशाङ्गः प्रतीत्यसमुत्पादोऽस्य क्षयाभावादक्षयत्वेनेति पूर्ववत्। --पृ. 135-136

चतुःशतक एवं वृत्तिः :

१. शीलादपि वरं भ्रंशो न तु दृष्टेः कदाचन।
शीलेन गम्यते स्वर्गो दृष्ट्या याति परं पदम्।। --पृ. 15

२. तुलनीयम्-- साम्प्रतं संसारदोषोपलम्भसंदर्शनेन तत्रोत्पाद्योद्वेगार्थं कर्मप्रहाणोपायकथनकाम आह-
अस्य दुःखसमुद्रस्य सर्वशान्तो न विद्यते।
निमग्नस्येह बालस्य भीतास्ते किं न विद्यते।। --पृ. 93

३. तत्रैव तज्यते कश्चित् कश्चित्तत्रैव दुष्यति।

कश्चिन्मुह्यति तत्रैव तस्मात् कामो निरर्थकः।।
रञ्जनीयवस्त्वायत्तोदयो हि रागः। ...... तस्माद् विषयकामः स्वरूपासिद्धत्वाच्छून्यः। न चैवं रञ्जनीयवस्तुशून्यताभावनातत्परस्य योगिनो रागप्रहाणं न सम्भाव्यत् इति। -पृ. 48

जातकमाला :

१. दानं नाम महानिधानमनुगं चौराद्यसाधारणं
दानं मत्सरलोभदोषरजसः प्रक्षालनं चेतसः।
संसाराध्वपरिश्रमापनयनं दानं सुखं वाहनं
दानं नैकसुखोपधानसुमुखं सन्मित्रमात्यन्तिकम्।। --पृ. 26

२. न सज्जनाद् दूरचरः क्वचिद् भवेद् भजेत साधून् विनयक्रमानुगः।
स्पृशन्त्ययत्नेन हि तत्समीपगं विसर्पिणस्तद्गुणपुष्परेणवः।। --पृ. 90

तत्त्वसंग्रहः :

चित्तमेव संसारो रागादिक्लेशवासितम्।
तदेव तैर्विनिर्मुक्तं निर्वाणमिति कथ्यते।। --पृ. 151

दशभूमिसूत्रम् :

१. इमे खलु पुनर्दशाकुशलाः कर्मपथा ..... प्राणातिपातो निरयमुपनयति, तिर्यग्योनिमुपनयति, यमलोकमुपनयति ... .व्यापादो .... मिथ्यादृष्टिः ...... कुदृष्टिपतितश्च भवति शठश्च संवर्तते। -पृ. 18

२. प्राणातिपातात्प्रतिविरतो ..... कः पुनर्वादः परसत्त्वेषु सत्त्वसंज्ञिनः संचिन्त्यौदारिककायविहेठनया। -पृ. 19

३. अदत्तादानात्प्रतिविरतः खलु पुनर्भवति ...... कः पुनर्वादोऽन्येभ्यो जीवितोपकरणेभ्यः। -पृ. 18

४. काममिथ्याचारात्प्रतिविरतः खलु पुनर्भवति .... कः पुनर्वादो द्वीन्द्रियसमापत्या वा अनङ्गविज्ञप्त्या वा। -पृ. 20

५. अनृतवचनात्प्रतिविरतः खलु पुनर्भवति सत्यवादी भूतवादी कालवादी, यथावादी तथावादी। .... क्षान्तिं रुचिं मतिं प्रेक्षां विसंवादनाभिप्रायो नानृतां वाचं निश्चारयति, कः पुनर्वादः समन्वाहृत्य। -पृ. 20

६. पिशुनवचनात्प्रतिविरतः .... स नेतः श्रुत्वा अमुत्राख्याता भवत्यमीषां भेदाय .... न भिन्नानामनुप्रदानं करोति। न व्यग्रारामो भवति न व्यग्ररतो न व्यग्रकरणीं वाचं भाषते सद्भूतामसद्भूतां वा। -पृ. 21

७. परुषवचनात्प्रतिविरतः .....। ....बहुजनेष्टा बहुजनकान्ता बहुजनप्रिया .... मनउत्प्लावनकरी मनःप्रह्लादनकरी स्वसंतानपरसंतानप्रसादनकरी ततारूपां वाचं निश्चारयति। -पृ. 21-22

८. संभिन्नप्रलापात्प्रतिविरतः खलु पुनर्भवति सुपरिहार्यवचनः कालवादी भूतवादी ......। स निदानवर्ती वाचं भाषते कालेन सावदानाम्। ...... परिहार्यं परिहरति, कः पुनर्वादो वाग्विक्षेपेण। -पृ. 22

९. अनभिध्यालुः खलु पुनर्भवति......। परपरिगृहीतेषु स्पृहामपि नोत्पादयति, किमिति यत्परेषां तन्नाम स्यादिति नाभिध्यामुत्पादयति, न प्रार्थयते न प्रणिदधाति, न लोभचित्तमुत्पादयति। -पृ. 23

१०. अव्यापन्नचित्तः खलुः पुनर्भवति। .... स यानीमानि क्रोधोपनाहखिलमलव्यापाद ..... सर्वसत्त्वहितसुखाय वितर्कितविचारितानि, तान्यनुवितर्कयिता भवति। -पृ. 23

११. सम्यग्दृष्टिः खलुः पुनर्भवति सम्यक्पथगतः कौतुकमङ्गलनानाप्रकारकुशीलदृष्टिविगतऋजुदृष्टिरशठोऽमायावी बुद्धधर्मसंघनियताशयः। --पृ. 23

धम्मपद :

१. सब्बदानं धम्मदानं जिनाति, सब्बरसं धम्मरसो जिनाति।
सब्बरतिं धम्मरति जिनाति, तण्हक्खयो सब्बदुक्खं जिनाति।। --पृ. 26

२. अप्पमादो अमतपदं, पमादो मच्चुनो पदं।
अप्पमत्ता न मियन्ते, ये पमत्ता यथा मता।। --पृ. 39

३. यो च पुब्बे पमज्जित्वा, पच्छा सो नप्पमज्जति।
सो इमं लोकं पभासेति, अब्भा मुत्तो व चन्दिमा।। --पृ. 39

४. मा पमादमनुयुञ्जेथ मा कामरतिसन्थवं।
अप्पमत्तो हि झायन्तो पप्पोति विपुलं सुखं।। --पृ. 39

५. खन्ती परमं तपो तितिक्खा, निब्बानं परमं वदन्ति बुद्धा।
न हि पब्बजितो परूपघाती, समणो होति परं विहेठयन्तो।। --पृ. 41

६. न हि वेरेन वेरानि सम्मन्तीध कुदाचनं।
अवेरेन च सम्मन्ति एस धम्मो सनन्तनो।। --पृ. 42

७. अक्कोच्छि मं अवधि मं, अजिनि मं अहासि मे।
ये च तं उपनय्हन्ति, वेरं तेसं न सम्मति ।। -पृ. 43

८. अक्कोच्छि मं अवधि मं, अजिनि मं अहासि मे।
ये च तं नूपनय्हन्ति, वेरं तेसूपसम्मति ।। --पृ. 43

९. फन्दनं चपलं चित्तं, दुरक्खं दुन्निवारयं।
उजुं करोति मेधावी, उसुकारो व तेजनं।। --पृ. 43

१०. चत्तारि ठानानि नरो पमत्तो, आपज्जति परदारसेवी।
अपुञ्ञलाभं न निकामसेय्यं, निन्दं ततीयं निरयं चतुत्थं।। -पृ. 46

११. चित्तस्स दमनं साधु चित्तं दन्तं सुखावहं। --पृ. 47

१२. पापो पि पस्सति भद्रं याव पापं न पच्चति।

यदा च पच्चति पापं अथ पापो पापानि पस्सति।। --पृ. 55
१३. आरोग्य परमा लाभा सन्तुट्ठिपरमं धनं।
विस्सासपरमा ञाति निर्वाणं परमं सुखम्।। --पृ. 58
१४. सब्बसंयोजनं छेत्वा यो वे न परितस्सति।
सङ्गातिगं विसंयुत्तं तमहं ब्रूमि ब्राह्मणं।। --पृ. 79
१५. अत्ता हि अत्तनो नाथो को हि नाथो परो सिया।
अत्तना हि सुदन्तेन नाथं लभति दुल्लभं।।
अत्ता हि अत्तनो नाथो अत्ता हि अत्तनो गति।
तस्मा संयमयत्तानं अस्सं भद्दं व वाणिजो।।
तुम्हेहि किच्चं आतप्पं अक्खातारो तथागता। --पृ. 79
१६. मित्ते भजस्सु कल्याणे सुद्धाजीवे अतन्दिते।। --पृ. 91
१७. साहु दस्सनमरियानं सन्निवासो सदा सुखो।
अदस्सनेन बालानं निच्चमेव सुखी सिया।।
धीरं च पञ्ञं च बहुस्सुतं च, धोरय्हसीलं वतवन्तमारियं।
तं तादिसं सप्पुरिसं सुमेधं, भजेथ नक्खत्तपथं व चान्दिमा।। --पृ. 91
१८. यो चेतं सहते जम्मिं तण्हं लोके दुरच्चयं ।
सोका तम्हा पपतन्ति उदबिन्दु व पोक्खरा।। --पृ. 109
१९. जिघच्छा परमा रोगा, सङ्खारा परमा दुखा ।
एतं ञत्वा यथाभूतं निब्बानं परमं सुखं ।।
२०. आरोग्यपरमा लाभा, सन्तुट्ठिपरमं धनं ।
विस्सासपरमा ञाति निब्बानं परमं सुखं ।। --पृ. 121
२१. नत्थि झानं अपञ्ञस्स, पञ्ञा नत्थि अझायतो।
यम्हि झानं च पञ्ञा च, स वे निब्बानसन्तिके ।। --पृ. 124
२२. सब्बपापस्स अकरणं कुलस्स उपसम्पदा।
सचित्तपरियोदपनं एतं बुद्धान सासनं ।। --पृ. 146
२३. फन्दनं चपलं चित्तं दूरक्खं दुन्निवारयं।
उजुं करोति मेधावी, उसुकारो व तेजनं।।
दुन्निग्गहस्स लहुनो, यत्थकामनिपातिनो।
चित्तस्स दमथो, साधु चित्तं दन्तं सुखावहं।। --पृ. 147

धम्मसंगिणी :

अनत्थं मे अचरीति आघातो जायति, अनत्थं ....अत्थं चरिस्सतीति आघातो जायति, अट्ठाने पन आघातो जायति। --पृ. 43

धर्मदर्शनधातुगीतिः :

१. सूक्ष्मोऽचिन्त्यतनूकरश्च निखिलज्ञाता च सर्वङ्करः
योगाभ्यासलभः सुधीश्च विषयो ध्यानस्य च ध्यायिनाम्।
चन्द्रार्कावनिवारिवह्निपवनाकाशकायस्तथा
शान्त्यानन्दसुखेप्सुभिस्तु सततं सम्भावितव्यो हरः।। --पृ. 76
२. आक्षेपकं तथाऽऽक्षिप्तम् अभिनिर्वृतनिर्वृती।
आदीनवः क्रमादङ्गम् त्रिचतुस्त्र्यैकमेककम्।। ८१।। --पृ. 134
३. दुःखं स्कन्धा उपादत्ताः कर्मक्लेशौ समुद्भवः।
द्वौ निरोधौ च निर्वाणं पक्ष्योऽध्वा सप्तत्रिंशकः।। --पृ. 146

पातिमोक्खसुत्त :

तुलनीयम्-- तत्रिमे चत्तारो पाराजिका धम्मा उद्देसं आगच्छन्ति- मैथुनपरिसेवने, अदिन्नादाने, जीविता वोरोपने, उत्तरिमनुस्सधम्मालापने ; इमे को पनायस्मन्तो तेरस सङ्घादिसेस धम्मा उद्देसं आगच्छन्ति .... इमे खो पनास्मन्ते सत्त अधिकरणसमथा धम्मा उद्देसं आगच्छन्ति- उप्पन्नुपपन्नानं अधिकरणानं समथाय वूपसमाय सम्मुखाविनयो दातब्बो, ... येभुय्यसिका, तस्सपापियसिका, तिणवत्थारको । --पृ. 80-81

प्रतिमोक्षसूत्रम् :

शीलेन युक्तो श्रमणो तिरेति, शीलेन युक्तो ब्राह्मणो तिरेति।
शीलेन युक्तो नरदेवपूज्यो शीलेन युक्तस्य हि प्रातिमोक्षम्। -पृ. 28

प्रतीत्यसमुत्पादहृदयकारिका :

त्रिभ्यो भवति द्वन्द्वं द्वन्द्वात्प्रभवन्ति सप्त सप्तभ्यः।
त्रय उद्भवन्ति भूयस्तदेव तु भ्रमति भवचक्रम्।। -पृ. 134

प्रमाणवार्तिकम् :

१. हेतोः प्रहाणं त्रिगुणं सुगतत्वमनिःश्रयात्।।
दुःखस्य शस्तं नैरात्म्यदृष्टेश्च युक्तितोऽपि वा।
पुनरावृत्तिरित्युक्तो जन्मदोषसमुद्भवौ ।।
सुगतत्वं व्याचिख्यासुराह- हेतोः समुदयस्य प्रहाणं निरोधः सुगतत्वम्......... अपुनरावृत्त्या गमनं सुगतत्वम् .... पुनरावर्तनात् पुनरावृत्तिरित्युक्तौ।। -पृ. 10

२. यः पश्यत्यात्मानं तस्यात्राहमिति शाश्वतस्नेहः।
स्नेहात्सुखेषु तृष्यति तृष्णा दोषांस्तिरस्कुरुते।।
गुणदर्शी परितृष्यन् ममेति तत्साधनान्युपादत्ते।
तेनात्माभिनिवेशो यावत्तावत्तु संसारः ।।
आत्मनि सति परसंज्ञा स्वपरविभागात्परिग्रहद्वेषौ।
अनयोः संप्रतिबद्धाः सर्वे दोषाः प्रजायन्ते ।। --पृ. 110

बुद्धस्तोत्रशतपञ्चशत्कः :

१. स्थायिनां त्वं परिक्षेप्ता विनियन्तापहरिणाम्।
समाधाता विजिह्मामानां प्रेरको मन्दगामिनाम्।। १०२।।
नियोक्ता धुरि दान्तानां खटुङ्कानामुपेक्षकः।
अतोऽसि नरदम्यानां सत्सारथिरनुत्तरः ।। १०३।। -पृ. 11

२. सोऽहं प्राप्य मनुष्यत्वं ससद्धर्ममहोत्सवम् ।
महार्णवयुगच्छिद्रकूर्मग्रीवार्पणोपमम् ।। ५।।
अनित्यताव्यनुसृतां कर्मच्छिद्रससंशयाम् ।
आत्तसारां करिष्यामि कथं नेमां सरस्वतीम्।। ६।। --पृ. 88

बोधिचर्यावतार एवं पञ्जिका :

१. इयं कौशिक प्रज्ञापारमिता बोधिसत्त्वानां .... ध्यापारमितामभिभवति। .... प्रज्ञापारमितया अपरिणायकाः, ... पञ्च पारमिताः सचक्षुष्का भवन्ति। प्रज्ञापारमितापरिगृहीताश्चैताः .... लभन्ते। .... उक्तं च---
सर्वपारमिताभिस्त्वं निर्मलाभिरनिन्दिते।
चन्द्रलेखेव ताराभिरनुयातासि सर्वदा।। इति।। (प्रज्ञापारमितास्तवः, ८का.) -पृ. 30

२. ये बुद्धं शरणं यान्ति न ते गच्छन्ति दुर्गतिम्।
प्रहाय मानुष्यान् कायान् दिव्यान् कायांल्लभन्ति ते ।। -पृ. 34
मानेन दुर्गतिं नीता मानुष्येऽपि हतोत्सवाः।
परपिण्डाशिनो दासा मूर्खा दुर्दर्शना कृशाः ।।
सर्वतः परिभूताश्च मास्तब्धास्तपस्विनः ।
तेऽपि चेन्मानिनां मध्ये दीनास्तु वद कीदृशाः।।
सप्तविधमानेषु अन्यतमेन मानेन दुर्गतिं .... दीनाः कृपणाः कृपापात्रमित्यर्थः। -पृ. 36

३. न द्वेषसमं पापं न क्षान्तिसमं तपः।
तस्मात्क्षान्तिं प्रयत्नेन भावयेद्विविधैर्नयैः।।
न च द्वेषेण समं ..... तुल्यं तपः। .... विविधैर्नानाप्रकारैरुपायैर्वक्ष्यमाणैः। --पृ. 41

पुनश्च उक्तम्--

पुण्यविघ्नः कृतोऽनेनेत्यत्र कोपो न युज्यते।
क्षान्त्या समं तपो नास्ति नन्वेतत्तदुपस्थितम् ।। --पृ. 41

४. मनः शमं न गृह्णाति न प्रीतिसुखमश्नुते।
न निद्रां न धृतिं याति द्वेषशल्ये हृदि स्थिते।।
पूजयत्यर्थमानैर्यान् येऽपि चैनं समाश्रिताः।
तेऽप्येनं हन्तुमिच्छन्ति स्वामिनं द्वेषदुर्भगम्।।
सुहृदोऽप्युद्विजन्तेऽस्माद् ददाति न च सेव्यते।
संक्षेपान्नास्ति तत्किंचित् क्रोधनो येन सुस्थितः।।
शमं प्रशमं न गृह्णाति नाश्रयते। .... तत्परित्यागाय यत्नवता भवितव्यमित्याह--
एवमादीनि दुःखानि करोतीत्यरिसंज्ञया ।
यः क्रोधं हन्ति निर्बन्धात् स सुखीह परत्र च।। -पृ. 42
नैकयान्यस्त्रिया कुर्याद्यानं शयनमासनम्।
एकया अद्वितीयया अन्यस्त्रिया।...... न कुर्याद्यानादि। --पृ. 46

५. व्याघ्राः सिंहा गजा ऋक्षाः सर्पाः सर्वे च शत्रवः।
सर्वे नरकपालाश्च डाकिन्यो राक्षसास्तथा।।
सर्वे बद्धा भवन्त्येते चित्तस्यैकस्य बन्धनात्।
चित्तस्यैकस्य दमनात् सर्वे दान्ता भवन्ति च।।
सुबोधम्। कुतः पुनरेवमित्याह--
यस्माद् भयानि सर्वाणि दुःखान्यप्रमितानि च।
चित्तादेव भवन्तीति कथितं तत्त्ववादिना।।
सर्वे ह्येते कर्माक्षेपवशादनिष्टदायका भवन्ति। .... चित्तान्नान्यत्। तदाह--
कर्मजं लोकवैचित्र्यं चेतना तत्कृतं च तत्।
चेतना मानसं कर्म तज्जे वाक्कायकर्मणी ।। इति।। (अभि.को., ४/१)
न च अनपकारचित्तस्य केचिदपकारिणो नाम। यस्मात्--
निवृत्तपापचित्तस्य नास्ति लोके भयं द्विषः।
सुखहानिर्न तस्यास्ति यस्य चित्तं वशे स्थितम्।। -पृ. 46-47

६. न शस्त्रं न विषं नाग्निर्न प्रपातो न वैरिणः।
कामानामुपमां यान्ति नरकादिव्यथास्मृतेः ।।
अमी शस्त्रादयो दुःखजनकत्वेन .... भजन्ते प्रति कामानाम् .... शस्त्रादयो हि नियतकालं मरणमात्रदुःखदायकाः, कामास्तु दीर्घकालिकतीव्रनरकादिदुःहेतव इति कीदृशी तैरुपमा भवेत्? --पृ. 47

७. कामा ह्यनर्थजनका इह लोके परत्र च।
इह वन्धबधच्छेदैर्नरकादौ परत्र च।। -पृ. 48

८. न स्वीकरोषि हे मूढ काष्ठपुत्तलकं शुचिम्।

अमेध्यघटितं यन्त्रं कस्माद्ररक्षसि पूतिकम्।।
हे मूढ, मोहविजृम्भितमेतद् भवतः।....... किमन्यस्मिन्नसन्नपि दोष उच्यते इत्यत्राह--
इमं चर्मपुटं तावत्स्वबुद्ध्यैव पृथक्कुरु।
अस्थिपञ्जरतो मांसं प्रज्ञाशस्त्रेण मोचय।।
अस्थीन्यपि पृथक्कृत्वा पश्य मज्जानमन्ततः।
किमत्रसारमस्तीति स्वयमेव विचारय ।।

चर्ममयं पुटम्। .... कायः चतुर्महाभूतिकः मातापित्रशुचिकललसंभूतः दुःखमयः कृतघ्नश्चेति विस्तरेण प्रतिपादयिष्यतीति किमत्र सारमस्ति विज्ञप्रशस्तं न्याय्यं वा, इत्यात्मनैव विचारय। --पृ. 50

९. तूलगर्भैर्मृदुस्पर्शै रमन्ते नोपधानकै :।
दुर्गन्धं न स्रवन्तीति कामिनोऽमेध्यमोहिताः।।
यत्र च्छन्नेऽप्ययं रागस्तदच्छन्नं किमप्रियम्।
न चेत्प्रियोजनं तेन कस्माच्छन्नं विमृद्यते।।
यदि ते नाशुचौ रागः कस्मादालिङ्गसेऽपरम्।
मांसकर्दमसंलिप्तं स्नायुबद्धास्थिपञ्जरम्।।

मांसमेव कर्दम इव लेपनसाधर्म्यात्, ... यदि तेन हेतुना चर्मादिना पिहितत्वादिति कृत्वा अशुचौ रागो भवति भवतः, तदा कस्मादालिङ्गसे परमन्यदीयं पञ्जरम्। -पृ. 50-51

१०. अनेनैवं कृतं कर्म, कोऽन्यः प्रत्यनुभविष्यति? न हि भिक्षवः कृतोपचितानि कर्माणि पृथिवीधातौ विपच्यन्ते नाब्धातौ न तेजोधातौ न वायुधातौ। उपात्तेष्वेव स्कन्धधात्वायतनेषु इति विस्तरः। --पृ. 54

११ अर्जनरक्षणनाशविषादैरर्थमनर्थमनन्तमवेहि।
व्यग्रतया धनसक्तमतीनां नावसरो भवदुःखविमुक्तेः।।

अर्जनमनुत्पन्नस्योत्पादनं दुःखम्। .... संसाराश्रितजात्यादिदुःखनिर्मोक्षाय सदा तद्गतमनसिकारैरेव आयुःराणां क्षपणात्। --पृ. 59

१२. विनिपातगतानाथव्रतस्थान् संविभज्य च।
भुञ्जीत मध्यमां मात्रां त्रिचीवरबहिस्त्यजेत्।।

भैषज्यवसनादिभिरात्मभावो हि परिपालनीयः परार्थोपयोगित्वात्। .... तेन तं पिण्डपातं परिभुज्य कुशलपक्षाभिमुखेन भवितव्यम्। इति आर्यरत्नमेघेऽभिहितम्। --पृ. 61

१३. नाथनिर्वाणशय्यावच्छयीतेप्सितया दिशा।
संप्रजानंल्लघूत्थानः प्रागवश्यं नियोगतः ।।

भगवतो महानिर्वाणशय्यामिव शय्यां परिकल्पयेत्। .... लघूत्थानः शीघ्रमेवोत्तिष्ठेत्। न तु जृम्भिकां गात्रमोटनं कुर्वन्नालस्योपहितश्चिरेण। --पृ. 62

१४. इदं न प्राप्तमारब्धमिदमर्द्धकृतं स्थितम्।
अकस्मान्मृत्युरायातो हा हतोऽस्मीति चिन्तयन्।।
शोकवेगसमुच्छूनसाश्रुरक्तेक्षणाननान्।
बन्धून्निराशान् संपश्यन् यमदूतमुखानि च।।

स्वपापस्मृतिसंतप्तः श्रृण्वन्नादांश्च नारकान्।
त्रासोच्चारविलिप्ताङ्गो विह्वलः किं करिष्यसि।।
इदं यदनागते कर्तव्यतया मनसिकृतं तत्र प्राप्तम्। .... स्वयंकृतपापकर्मस्मरणेन मरणसमये किमित्येवं मया कृतमिति पश्चात्तापेन तापितः। .... विह्वलः अनायत्तकायवाक्चित्तप्रचारः। किं करिष्यसि सर्वक्रियासु निवृत्तव्यापारः। -- पृ. 55

१५. एतदेव समासेन संप्रजन्यस्य लक्षणम्।
यत्कायचित्तावस्थायाः प्रत्यवेक्षा मुहुर्मुहुः।। --पृ. 82

१६. यथोक्तम्-- तत्र अल्पदुःखाभ्यासपूर्वकं कष्टकष्टतराभ्यासः सिध्यति। ...... एवं निष्पन्दफलं च सर्वधर्मसुखाक्रान्तं नाम समाधिं प्रतिलभते। --पृ. 83

१७. बद्धश्चेच्चित्तमातङ्गः स्मृतिरज्वा समन्ततः।
भयमस्तंगतं सर्वं कृत्स्नं कल्याणमागतम्।।
यदि बद्धः कथंचिद् भवेद्। स्मृतिर्वक्ष्यमाणलक्षणा। ..... सर्वं कल्याणमभ्युदयनिःश्रेयसलक्षणम्। आगतं संप्राप्तम्। देवश्चेद् वृष्टो निष्पन्नाः शालय इति यथा। --पृ. 83

१८. न खादितव्यमशुचि त्वया पेयं न शोणितम्।
नान्त्राणि चूषितव्यानि किं कायेन करिष्यसि।। -पृ. 84

१९. अत एवाह भगवान् मानुष्यमतिदुर्लभम्।
महार्णवयुगच्छिद्रकूर्मग्रीवार्पणोपमम् ।। --पृ. 88

२०. अद्य मे सफलं जन्म सुलब्धो मानुषो भवः।
अद्य बुद्धकुले जातो बुद्धपुत्रोऽस्मि सांप्रतम्।।
तथाधुना मया कार्यं स्वकुलोचितकारिणाम्।
निर्मलस्य कुलस्यास्य कलङ्को न भवेद्यथा।। --पृ. 89

२१. नातःपरा वञ्चनास्ति न च मोहोऽस्त्यतः परः।
यदीदृशं क्षणं प्राप्य नाभ्यस्तं कुशलं मया।। --पृ. 89

२२. सदा कल्याणमित्रं च जीवितार्थेऽपि न त्यजेत्।
बोधिसत्त्वव्रतधरं महायानार्थकोविदम्।। --पृ. 90

२३. नरकप्रेततिर्यञ्चो म्लेच्छा दीर्घायुषोऽमराः ।
मिथ्यादृग्बुद्धकान्तारो मूकताष्टाविहाक्षणाः ।। --पृ. 92

२४. पुनश्च-- अक्षणावस्थायां धर्मप्रविचयस्य ...... यथोक्तमार्यगण्डव्यूहसूत्रे आर्यजयोष्मायतनविमोक्षे-- दुर्लभा अष्टाक्षणविनिवृत्तिः। .... दुर्लभं सम्यग्जीवितं मनुष्यलोके इति। इदमेवाभिसंधायोक्तम्--
मानुष्यं दुर्लभं लोके बुद्धोत्पादोऽतिदुर्लभः ।
ततोऽपि श्रद्धाप्रव्रज्याप्रतिपत्तिः सुदुर्लभा ।।
बोधौ चित्तं दृढं सर्वसत्त्वानामनुकम्पया ।
सर्वदुःखप्रशान्त्यर्थं दुर्लभानां परम्परा ।। --पृ. 92-93

२५. पिता चेन्न विना पुत्रात्कुतः पुत्रस्य संभवः।
पुत्राभावे पिता नास्ति तथासत्त्वं तयोर्द्वयोः।। --पृ. 94

२६. ननु च सत्यदर्शनादविद्यादि प्रहीयते, तत्प्रहाणात् .... सद्भावेऽपि न किंचिद्विहन्यते इति। तदुक्तम्--

मिथ्याज्ञानतद्भूततर्षसंचेतनावशात्।
हीनस्थानगतिर्जन्म त्यक्त्वा चैतन्न जायते।।

अथवा। तृष्णैव केवला पुनर्भवकारणम्, समुदयाकारत्वात्। .... इति पराभिप्रायमुत्थापयन्नाह--

तृष्णा तावदुपादानं नास्ति चेत्संप्रधार्यते।

अविद्याप्रहाणात् तृष्णा पुनर्भवोपादानं .... तद्भावात् तृष्णाप्रहाणस्याप्यभावात्। ---पृ. 110

२७. शमथेन विपश्यनासुयुक्तः कुरुते क्लेशविनाशमित्येवत्य।
शमथः प्रथमं गवेषणीयः स च लोके निरपेक्षयाभिरत्या।।

शमथः चित्तेकाग्रतालक्षणः समाधिः। .... युगनद्धवाहिमार्गयोगेन कुरुते क्लेशानां विनाशं प्रहाणमित्येवमवेत्य ज्ञात्वा क्लेशविमुमुक्षुणा शमथः प्रथमादौ गवेषणीयः। --पृ. 125

२८. तत्र कतमत् समुदयार्यसत्यम्? येयं तृष्णा पौनर्भविकी नन्दीरागसहगता तत्र तत्राभिनन्दिनी, यदुत कामतृष्णा भवतृष्णा विभवतृष्णाश्चेति। --पृ. 143

२९. नैवावसादः कर्त्तव्यः कुतो मे बोधिरित्यतः।

कुतो मे बोधिरिति, कथमहं वराकः ..... यथोक्तम्-- अवसादोऽप्यनर्थ इति (शि.समु. ३४)। कस्मात्?

यस्मात्तथागतः सत्यं सत्यवादीदमुक्तवान्।।

यस्मात् तथागतः इदं वक्ष्यमाणं सत्यमवितथमुक्तवान् .... अतः सत्याभिधानहेतुपदमेतत्। किं तत्सत्यमुक्तवान्--

तेऽप्यासन् दंशमशका मक्षिकाः कृमयस्तथा।
यैरुत्साहवशात् प्राप्ता दुरापा बोधिरुत्तमा ।।

इत्याह। तेऽपि बुद्धा भगवन्तः पूर्वं शाक्यमुनिरत्नशिखिदीपंकरप्रभृतय .... भावः। इदं तत् सत्यम्।

किमुताहं नरो जात्या शक्तो ज्ञातुं हिताहितम्।
सर्वज्ञनीत्यनुत्सर्गाद्बोधिं किं नाप्नुयामहम् ।।

किं पुनरहं मनुष्यभूतो जन्मना। .... काक्का पठनाद् आप्नुयामेवेति। एतद्भगवता रत्नमेघे दर्शितम्-- इह बोधिसत्त्वो नैवं चित्तमुत्पादयति- .... अहमपि तथा तथा घटिष्ये, तथा तथा व्यायंस्ये सर्वसत्त्वसाधारणेन वीर्येण सर्वसत्त्वारम्बणेन वीर्येण यथाहमप्यनुत्तरां सम्यक्संबोधिमभिसंभोत्स्ये इति। --पृ. 145-146

३०. यदुक्तमार्यरत्नमेघे-- चित्तपूर्वंगमाः सर्वधर्माः। चित्ते परिज्ञाते सर्वधर्माः परिज्ञाता भवन्ति। अपि च--

चित्तेन नीयते लोकश्चित्तं चित्तं न पश्यति।
चित्तेन चीयते कर्म शुभं वा यदि वाशुभम्।।

चित्तं भ्रमते अलातवत्।...... चित्तेनास्य वशीभूतेन सर्वे धर्मा वशीभवन्तीति। --पृ. 146-147

३१. तस्मात्स्वधिष्ठितं चित्तं मया कार्यं सुरक्षितम्।
चित्तरक्षाव्रतं मुक्त्वा बहुभिः किं मम व्रतैः ।। १८।।

एवमुत्पादितबोधिचित्तेन शिक्षारक्षणे यत्नवता मनसिकर्तव्यम्-- स्वधिष्ठितं स्मृत्या सुरक्षितं संप्रजन्येन वक्ष्यमाणरीत्या मया स्वचित्तं कर्तव्यं तदेकाग्रमानसेन। .... तदुच्यते-- चित्ताधीनो धर्मः, धर्माधीना बोधिरिति। एवं चित्तायत्ततां सर्वत्र निश्चित्य चित्तदृढतायामुदाहरणमाह--

यथा चपलमध्यस्थो रक्षति व्रणमादरात्।
एवं दुर्जनमध्यस्थो रक्षेच्चित्तव्रणं सदा ।। १९।। --पृ. 147

३२. पारंपर्येण साक्षाद्वा सत्त्वार्थं नान्यदाचरेत्।
सत्त्वानामेव चार्थाय सर्वं बोधाय नामयेत्।।

अन्ततः स्वयमाहारादिक्रियया परप्रेरणया अपरापरदूतप्रेरणया वा, साक्षात् ...... किंचित् सत्त्वानामेव संसारदुःखपतितानां ततो निःसरणाय सर्वं कुशलमूलमनुत्तरायां सम्यक्संबोधौ परिणामयेत्। --पृ. 148

३३. बोधिचर्यावतारं मे यद्विचिन्तयतः शुभम्।
तेन सर्वे जनाः सन्तु बोधचर्याविभूषणाः।। --पृ. 148

३४. दशदिग्व्योमपर्यन्तसर्वसत्त्वार्थसाधने।
यथा चरति मञ्जुश्रीः सैव चर्या भवेन्मम।। --पृ. 149

३५. पारंपर्येण साक्षाद्वा सत्त्वार्थ नान्यदाचरेत्।
सत्त्वानामेव चार्थाय सर्वं बोधाय नामयेत्।। --पृ. 149

३६. अनाथानामहं नाथः सार्थवाहश्च यायिनाम्।
पारेप्सूनां च नौभूतः सेतुः संक्रम एव च।।
दीपार्थिनामहं दीपः शय्या शय्यार्थिनामहम्।
दासार्थिनामहं दासो भवेयं सर्वदेहिनाम्।।
चिन्तामणिर्भद्रघटः सिद्धविद्या महौषधिः।
भवेयं कल्पवृक्षश्च कामधेनुश्च देहिनाम् ।। --पृ. 149

३७. सर्वासु दिक्षु यावन्तः कायचित्तव्यथातुराः।
ते प्राप्नुवन्तु मत्पुण्यैः सुखप्रामोद्यसागरान्।।
आकाशस्य स्थितिर्यावद्यावच्च जगतः स्थितिः।
तावन्मम स्थितिर्भूयाज्जगद्दुःखानि निघ्नतः ।। --पृ. 149

बोधिसत्त्वमण्यावलिः :

१. सर्वामिषं परित्यज्य आर्यवित्तेन भूषयेत्।
श्रद्धाशीलधनञ्चापि त्वत्रपाहीधनं तथा।।
श्रुतत्यागधनं चापि प्रज्ञा सप्तधनानि हि।
धनान्येवंविधानीति सप्ताक्षयनिधिरिरयम् ।। --पृ. 56

२. दशाशुभान् परित्यज्य श्रद्धां च दृढयेत् सदा।
अल्पैषी चाथ सन्तृप्तः कृतवेदी कृतेष च ।। --पृ. 58

मञ्जुश्रीमूलकल्पतन्त्रम् :

नागाह्वयो नाम सौ भिक्षुः शासनेऽस्मिं हिते रतः।

मुदितां भूमिलब्धस्तु जीवेद् वर्षशतानि षट्।।
मायूरी नामतो विद्या सिद्धा तस्य महात्मनः।
नानाशास्त्रार्थधात्वर्थनिःस्वभावार्थतत्त्ववित्।।
सुखावत्यां चोपपद्येत यदासौ त्यक्तकलेवरः।
सोऽनुपूर्वेण नियतं संप्रपत्स्यते ।। --पृ. 3

मध्यमकावतारः :

१. स्कन्धेष्वात्मा विद्यते नैव चामी सन्ति स्कन्धा आत्मनीतीह यस्मात्।
सत्यन्यत्वे स्यादियं कल्पना वै तच्चान्यत्वं नास्त्यतः कल्पनैषा ।।
इष्टो नात्मा रूपवान्नास्ति यस्मादात्मा वत्त्वार्थोपयोगो हि नातः।
भेदे गोमान् रूपवानप्यभेदे तत्त्वान्यत्वेऽरूपतो नात्मनः स्तः ।। --पृ. 73
२. स्कन्धा आत्मा चेदतस्तद्बहुत्वात् आत्मानः स्युस्तेऽपि भूयांस एव।
द्रव्यं चात्मा प्राप्नुयात् तादृशश्च द्रव्ये वृत्तौ वैपरीत्यं च न स्यात् ।।
आत्मोपच्छेदो निर्वृतौ स्यादवश्यं नाशोत्पादौ निर्वृतेः प्राक् क्षणेषु ।
कर्तुर्नाशात् तत्फलाभाव एव भुञ्जीतान्येनार्जितं कर्म चान्यः ।। --पृ. 73
३. सत्कायदृष्टिप्रभवानशेषान् क्लेशांश्च दोषांश्च धिया विपश्यन्।
आत्मानमस्या विषयं च ज्ञात्वा योगी करोत्यात्मनिषेधमेव।। --पृ. 77

मध्यमकशास्त्रकारिका एवं वृत्तिः :

१. संकल्पप्रभवो रागो द्वेषो मोहश्च कथ्यते।
शुभाशुभविपर्यासान् सम्भवति प्रतीत्य हि।।
कामं जानामि ते मूलं संकल्पात् किल जायसे।
न त्वां संकल्पयिष्यामि ततो मे न भविष्यसि ।। --पृ. 48
२. अनित्ये नित्यमित्येवं यदि ग्राहो विपर्ययः।
नानित्यं विद्यते शून्ये कुतो ग्राहो विपर्ययः।।
इह चत्वारो विपर्यासा उच्यन्ते। ...... स विपर्यासः। तथा--
अनित्यस्य ध्रुवा पीडा पीडा यस्य न तत् सुखम्।
तस्मादनित्यं यत् सर्वं दुःखं तदिति जायते।।
इत्यमुना न्यायेन यदनित्यं तद् दुःखम्, ... यः सुखमिति विपरीतो ग्राहः सोऽपरो विपर्यासः। तथा--
शुक्रशोणितसम्पर्कबीजं विण्मूत्रवर्धितम्।
अमेध्यरूपमाजानन् रज्यसेऽत्र कयेच्छया।।
अमेध्यपुञ्जप्रच्छन्ने तत्क्लेदार्द्रेण चर्मणा ।
यः शयीत स नारीणां शयीत जघनादरे।। इत्यादि।

एवमिदं शरीरं .... इत्येते चत्वारो विपर्यासाः सम्मोहस्य हेतुभूताः। -पृ. 72-73

३. एवं तावत् स्कन्धा आत्मा न भवति। स्कन्धव्यतिरिक्तोऽपि न युज्यते। .... यश्चैवं भवति, सः अविद्यमानत्वादसंस्कृतत्वाद्वा खपुष्पवन्निर्वाणवद्वा नैव आत्मव्यपदेशं प्रतिलभते, नाप्यहंकारविषयत्वेन युज्यते, इति स्कन्धव्यतिरिक्तोऽप्यात्मा न युज्यते। --पृ. 74

४. रूपं नात्मा रूपवान्नापि चात्मा रूपे नात्मा नात्मनि रूपं ....। एवं यावत् विज्ञानं नात्मा, विज्ञानवान्नात्मा विज्ञाने नात्मा नात्मनि विज्ञानम् इति। तथा-- अनात्मानः सर्वधर्मा इति। --पृ. 75

५. तद्यथा-- संयोजनत्रयप्रहाणे सति षोडशे मार्गे अन्वयज्ञानक्षणे यत् क्लेशप्रहाणं तत् स्रोतआपत्तिफलम्। --पृ. 79

६. अपरप्रत्ययं शान्तं प्रपञ्चैरप्रपञ्चितम्।
निर्विकल्पमनानार्थमेतत् तत्त्वस्य लक्षणम्।।

तत्र नास्मिन् परप्रत्ययोऽस्तीति अपरप्रत्ययम्। .... अत एव तत् प्रपञ्चैरप्रपञ्चितम्। प्रपञ्चो हि वाक्, प्रपञ्चयति अर्थानिति कृत्वा। प्रपञ्चैरप्रपञ्चितं वाग्भिरव्याहृतमित्यर्थः। --पृ. 51-52

७. संसारमूलान् संस्कारानविद्वान् संस्करोत्यतः।
अविद्वान् कारकस्तस्मान्न विद्वांस्तत्त्वदर्शनात् ।।

तत्र संसारस्य विज्ञानादिप्रवृत्तिलक्षणस्य मूलं प्रधानं कारणं संस्काराः। .... तत्त्वदर्शने हि सर्वपदार्थानामेवानुपलम्भात् नास्ति किञ्चिद् यदालम्ब्य कर्म कुर्यादिति। --पृ. 93

८. इह हि भगवता उषितब्रह्मचर्याणां तथागतशासनप्रतिपन्नानां धर्मानुधर्मप्रतिपत्तियुक्तानां पुद्गलानां द्विविधं निर्वाणमुपवर्णितम् सोपधिशेषं निरुपधिशेषं च। .... यत्र तु निर्वाणे स्कन्धपञ्चकमपि नास्ति, तन्निरुपधिशेषं निर्वाणम्। निर्गतः उपधिशेषोऽस्मिन्निति कृत्वा। निहताशेषचौरगणस्य ग्राममात्रस्यापि विनाशसाधर्म्येण। .... तदेव च अधिकृत्य उच्यते--

अभेदि कायो निरोधि सञ्ञा वेदना पि ति दहंसु सब्बा।
वूपसमिंसु संखारा विञ्ञाणमत्थमगमा ।। (उदानम्- ८-९)
असंलीनेन कायेन वेदनामध्यवासयत्।
प्रद्योतस्येव निर्वाणं विमोक्षस्तस्य चेतसः।। (थेरगाथा-९०६) --पृ. 112

९. शाश्वताशाश्वताद्यत्र कुतः शान्ते चतुष्टयम्।
अन्तानन्तादि चाप्यत्र कुतः शान्ते चतुष्टयम्।।

इह चतुर्दश अव्याकृतवस्तूनि भगवता निर्दिष्टानि। तद्यथा- शाश्वतो लोकः, ... स जीवस्तच्छरीरम्, अन्यो जीवोऽन्यच्छरीरमिति। ...चतुर्दश वस्तूनि अव्याकृतत्वादव्याकृतवस्तूनि इत्युच्यन्ते। --पृ. 127

१०. तत्र अविद्या कतमा? .... पञ्चविज्ञानकायसंयुक्तमसातमनुभवनं दुःखम्। मनसा संयुक्तं मानसं दुःखं दौर्मनस्यम्। ये चाप्यन्ते एवमादाय उपक्लेशास्ते उपायासा इति। --पृ. 129

११. पुनर्भवाय संस्कारान् अविद्यानिवृतस्त्रिधा।
अभिसंस्कुरुते यांस्तैर्गतिं गच्छति कर्मभिः।।१
विज्ञानं सन्निविशते संस्कारप्रत्ययं गतौ ।
सन्निविष्टेऽथ विज्ञाने नामरूपं निषिच्यते ।।२
निषिक्ते नामरूपे तु षडायतनसम्भवः ।

षडायतनमागम्य संस्पर्शः सम्प्रवर्तते ।।३
चक्षुः प्रतीत्य रूपं च समन्वाहारमेव च ।
नामरूपं प्रतीत्यैवं विज्ञानं सम्प्रवर्तते ।।४
सन्निपातस्त्रयाणां यो रूपविज्ञानचक्षुषाम् ।
स्पर्शः सः तस्मात् स्पर्शाच्च वेदना सम्प्रवर्तते।।५
वेदनाप्रत्यया तृष्णा वेदनार्थं हि तृष्यते।
तृष्यमाण उपादनमुपादत्ते चतुर्विधम् ।।६
उपादाने सति भव उपादातुः प्रवर्तते ।
स्याद्धि यद्यनुपादानो मुच्येत न भवेद् भवः।।७
पञ्च स्कन्धाः स च भवः भवाज्जातिः प्रवर्तते।
जरामरणदुःखादि शोकाः सपरिवेदनाः ।।८
दौर्मनस्यमुपायासा जातेरेतत् प्रवर्तते ।
केवलस्यैवमेतस्य दुःखस्कन्धस्य सम्भवः।।९ --पृ. 130

१२. यतश्चैवमविद्यायामेव सत्यां संस्काराः प्रवर्तन्ते, असत्यां न प्रवर्तन्ते, अतः
अविद्यायां निरुद्धायां संस्काराणामसम्भवः।
हेतुवैयर्थ्यात्। तस्याः पुनरविद्यायाः कुतो निरोधः, इत्याह--
अविद्याया निरोधस्तु ज्ञानेनास्यैव भावनात्।। ११।।
अस्यैव प्रतीत्यसमुत्पादस्य यथावदविपरीतभावनातः अविद्या प्रहीयते। यो हि प्रतीत्यसमुत्पादं सम्यक् पश्यति, स सूक्ष्मस्यापि भावस्य न स्वरूपमुपलभते। .... तत्त्वदर्शिनो योगिनो नियतमेव अविद्या प्रहीयते। प्रहीणाविद्यस्य संस्कारा निरुध्यन्ते। यथा चैवमविद्यानिरोधात् संस्कारा निरुध्यन्ते, एवम्--
तस्य तस्य निरोधेन तत् तन्नाभिप्रवर्तते ।
दुःखस्कन्धः केवलोऽयमेव सम्यङ् निरुध्यते।। १२।।
पूर्वस्य पूर्वस्य अङ्गस्य निरोधेन उत्तरस्योत्तरस्य अङ्गस्य निरोधो भवतीति विज्ञेयम् ...... भावस्वभावशून्यं दुःखराशिं पुनरनुत्पत्त्या सम्यङ्निरोधयति। --पृ. 131

१३. अत्राह- यदि स्वतः परतः उभयतोऽहेतुतश्च नास्ति भावानामुत्पादः, ... इदंप्रत्ययतामात्राभ्युपगमे हि सति हेतुफलयोरन्योन्यापेक्षत्वान्नास्ति स्वाभाविकी सिद्धिरिति नास्ति सस्वभाववादः। अत एवोक्तम्--
"स्वयं कृतं परकृतं द्वाभ्यां कृतमहेतुकम् ।
तार्किकैरिष्यते दुःखं त्वया तूक्तं प्रतीत्यजम्।। (लोका. स्तवः ९का.), ...
प्रतीत्य कारकः कर्म तं प्रतीत्य च कारकम्।
कर्म प्रवर्तते नान्यत् पश्यामः सिद्धिकारणम् ।।(म.शा. ८.१२) --पृ. 137-138

१४. न स्वतो नापि परतो न द्वाभ्यां नाप्यहेतुतः।
उत्पन्ना जातु विद्यन्ते भावाः क्वचन केचन ।।
........स्वत उत्पादो न सम्भवति, सा--
तस्माद्धि तस्य भवने न गुणोऽस्ति कश्चिज्जातस्य जन्म पुनरेव च नैव युक्तम्। (म.अ. ६/८), इत्यादिना मध्यमकावतारादिद्वारेणावसेया। आचार्यबुद्धपालितस्त्वाह-- न स्वत उत्पद्यन्ते भावाः ....

एतच्च-- **न हि स्वभावो भावानां प्रत्ययादिषु विद्यते। (म.शा. १/५)**, ... ततश्च पराभावादेव नापि परत उत्पद्यन्ते। अपि च-- अन्यत् प्रतीत्य यदि नाम परोऽभविष्यज्जायेत तर्हि बहुलः शिखिनोऽन्धकारः। .... **गृह्यते नैव च जगद्यदि हेतुशून्यं स्याद्यद्वदेव गगनोत्पलवर्णगन्धौ।** (म.अ. ६/९९), इत्यादिदोषप्रसङ्गाच्च।। --पृ. 138

१५. अप्रहीणमसम्प्राप्तम् अनुच्छिन्नमशाश्वतम्।
अनिरुद्धमनुत्पन्नम् एतन्निर्वाणमुच्यते।।

यद्धि नैव प्रहीयते रागादिवत्, नापि प्राप्यते श्रामण्यफलवत्, ... तत्र येषां स्कन्धानां निरोधात् तद्भवेत्? यावद्धि एताः कल्पना प्रवर्तन्ते तावन्नास्ति निर्वाणाधिगमः, सर्वप्रपञ्चपरिक्षयादेव तदधिगमात्। .... यदा चैव बुद्धा भगवन्तः सर्वप्रपञ्चोपशान्तरूपे निर्वाणे शिवेऽस्थानयोगेन नभसीव हंसराजाः स्थिताः स्वपुण्यज्ञानसम्भारपक्षपातवाते वातगगने वा गगनस्याकिञ्चनत्वात्, ... 'अयं भगवानस्मभ्यमिमं धर्मं देशयति, वयं च तथागतस्य धर्मदेशनां श्रृणुमः'। तत्र तथागतो न कल्पयति न विकल्पयति। सर्वकल्पजालवासनाप्रपञ्चविगतो हि शान्तमते तथागतः'' इति विस्तरः। तथा--

अवाचऽनक्षराः सर्वशून्याः शान्तादिनिर्मलाः।
य एवं जानाति धर्मान् कुमारो बुद्ध सोच्यते।। ....
अनिर्वाणं हि निर्वाणं लोकनाथेन देशितम्।
आकाशेन कृतो ग्रन्थिराकाशेनैव मोचितः ।। --पृ. 151-152

मध्यान्तविभङ्गभाष्यम् :

आश्रयाङ्गं स्वभावाङ्गं निर्याणाङ्गं तृतीयकम्।
चतुर्थमनुशंसाङ्गं निःक्लेशाङ्गं त्रिधा मतम् ।।

दर्शनमार्गे बोधावङ्गानि बोध्यङ्गानि। तत्र बोधेराश्रयाङ्गं स्मृतिः। स्वभावाङ्गं धर्मप्रविचयः। निर्याणाङ्गं वीर्यम्। अनुशंसाङ्गं प्रीतिः। असंक्लेशाङ्गं त्रिधा प्रस्रब्धिसमाध्युपेक्षाः। --पृ. 132-124

महापरित्राणसूत्र :

इतिपि सो भगवा अरहं सम्मासम्बुद्दो विज्जाचरणसम्पन्नो सुगतो लोकविदू अनुत्तरो पुरिसदम्मसारथी सत्था देवमनुस्सानं बुद्धो भगवा' ति। --पृ. 7

महायानसूत्रालंकारः :

१. शिक्षात्रयमधिकृत्य च षट् पारमिता जिनैः समाख्याताः।
आद्या तिस्रो द्वेधा अन्त्यद्वयतस्तिसृष्वेका ।।

इति षष्ठः। तत्राद्या अधिशीलं .... सर्वासां वीर्यसहायत्वात्। लक्षणविभागे श्लोकाः षट्।

दानं विपक्षहीनं ज्ञानेन गतं च निर्विकल्पेन।
सर्वेच्छापरिपूरकमपि सत्त्वविपाचकं त्रेधा।।
बोधिसत्त्वानां दानं चतुर्विधलक्षणम्। .... चतुर्विधमेव शीलादीनां वोदितव्यम्। पुनश्चोक्तम्--
दानं निष्प्रतिकाङ्क्षस्य निःस्पृहस्य पुनर्भवे।
शीलं क्षान्तिश्च सर्वत्र वीर्यं सर्वशुभोदये।।
विनारूप्यं तथा ध्यानं प्रज्ञा चोपायसंहिता।
सम्यक्प्रयोगो धीराणां षट्सु पारमितासु हि।। -पृ. 28-29

२. सुलाभोऽथ स्वधिष्ठानः सुभूमिः सुसहायकः।
सुयोगो गुणवान् देशो यत्र धीमान् प्रपद्यते।।
चतुर्भिश्चक्रैरप्रमादक्रियां .... सुयोगो दिवाल्पाकीर्णाभिलापकत्वात् रात्रौ चाल्पशब्दादिकत्वात्।
बहुश्रुतो दृष्टसत्यो वाग्मी समनुकम्पकः।
अखिन्नो बोधिसत्त्वश्च ज्ञेयः सत्पुरुषो महान्।।
अनेन द्वितीयेन सत्पुरुषं दर्शयति। आगमाधिगमवाक्करणनिरामिषचित्ताकिलासित्वगुणयोगात्।
स्वालम्बना मुसंभारा(सुसंस्तब्धा) सुभावनैव(सुपायाचैव) देशिता।
सुनिर्याणप्रयोगा च आत्मसम्यक्प्रधानता ।।
अनेन तृतीयेन योनिशोमनस्कारसंगृहीतामात्मनः .... सातत्यसत्कृत्यप्रयोगतया च।
रतेः क्षणोपपत्तेश्च आरोग्यस्यापि कारणं।
समाधेर्विचयस्यापि पूर्वे हि कृतपुण्यता।।
अनेन चतुर्थेन पूर्वकृतपुण्यतां .... आत्मनः सम्यक्प्रणिधानं सम्पद्यते। --पृ. 90

३. मित्रं श्रयेद्दान्तशमोपशान्तं गुणाधिकं सोद्यममागमाढ्यं।
प्रबुद्धतत्त्वं वचसाभ्युपेतं कृपात्मकं खेदविवर्जतं च।। --पृ. 91

४. पुनश्च तुलनीयम्-- चक्रादिसप्तसाधर्म्यं बोध्यङ्गानां दर्शयति।

स्मृतिश्चरति सर्वत्र ज्ञेयाजितविनिर्जये। .... धर्मालोकविवृद्ध्या च प्रीत्या आपूर्यते ध्रुवम्।। आरब्धवीर्यस्य बोधिसत्त्वस्य धर्मालोका विवर्धन्ते। ...... यथा चक्रवर्तिनो गृहपतिरत्नात्।
उपेक्षया यथाकामं सर्वत्र विहरत्यसौ।
पृष्ठलब्धाविकल्पेन विकल्पेन सदोत्तमः।। ६१।।
उपेक्षोच्यते निर्विकल्पं ज्ञानं तया बोधिसत्त्वः सर्वत्र यथाकामं विरहति। .... यथा चक्रवर्तिनः परिणायकरत्नं चतुरङ्गबलकायमुपनेतव्यं चोपप्रणयति। .... चतुरङ्गो बलकायः परैति। --पृ. 96

५. निश्रयाङ्गं स्वभावाङ्गं निर्याणाङ्गं तृतीयकम्।
चतुर्थमनुशंसाङ्गमक्लेशाङ्गं त्रयात्मकम् ।। ६३।।
एतेन यद्बोध्यङ्गं यथाङ्गं तदभिद्योतितं। स्मृतिर्निश्रयाङ्गं सर्वेषां तन्निश्रयेण प्रवृत्तेः। ..... प्रीतिरनुशंसाङ्गं चित्तसुखत्वात्। .... येन यन्निश्रित्य योऽसंक्लेश इति त्रिविधमसंक्लेशाङ्गं वेदितव्यम्। --पृ. 123

६. चित्तस्य चित्ते स्थानाच्च धर्मप्रविचयादपि।
सम्यक्स्थितिमुपाश्रित्य शमथोऽथ विपश्यना।।

सम्यक्समाधिं निश्रित्य चित्ते चित्तस्यावस्थानात्। .... न तु विना सम्यक्समाधिनेत्येतच्छमथविपश्यनालक्षणम्।
सर्वत्रगा च सैकांशा नैकांशोपनिषन्मता।
सा च शमथविपश्यना सर्वत्रगा यं यं .... उपनिषत्संमता शमथविपश्यना बोधिसत्त्वानामधिमुक्तिचर्याभूमौ।
प्रतिवेधे च निर्याणे अनिमित्ते ह्यसंस्कृते।।
परिशुद्धौ विशुद्धौ च शमथोऽथ विपश्यना।
सर्वभूमिगता धीरे स योगः सर्वसाधकः।।
इत्युनिषन्मतेत्येवमादिना शमथविपश्यनायाः .... परिशुद्धिर्विशुद्धिश्च। --पृ. 125

महायानसूत्रसंग्रह :

१. क. मृष्टगात्रता, ख. विशुद्धगात्रता, ग. विशुद्धनेत्रता, घ. व्यपगततिलकगात्रता। --पृ. 5

२. प्राणातिपातस्याकुशलकर्मपथस्य .... तस्यैव कर्मणो विपाकेनानादेयवचना भवन्ति। अभिध्याया अकुशलस्य............ मिथ्यादृष्टेरकुशलस्य कर्मपथस्य विपाकेन नास्तिक्यवादी भवति, उच्छेददृष्टिः। -पृ. 17-18

३. श्रेष्ठा गतिर्भवति चापि महाशयानां देवेषु चैव मनुजेषु च मूर्ध्नप्राप्ताः।
संबोधिमार्ग सद सत्त्व समादयन्ति संयोजयन्ति कुशलेषु दशस्वथापि ।। -पृ. 18

४. रक्षन्ति शीलममलं मणिरत्नतुल्यं न च ते भोति अनुशील सुसंयतो वा।
तत्रैव शीलि सद सत्त्व नियोजयन्ति आकाङ्क्षमाणमिममनुत्तमबुद्धशीलम्।। --पृ. 28

५. जात्यन्धकोटिनियुतान्यविनायकानां मार्गे अकोविदु कुतो नगरप्रवेशे ।
विन प्रज्ञ पञ्च इमि पारमिता अचक्षुः अविनायका न प्रभवन्ति स्पृशेतु बोधिम्।। -- पृ. 30

६. दानेन प्रेतगति छिन्दति बोधिसत्त्वो दारिद्रकं च छिनती तथ सर्वक्लेशान्।
भोगांश्चनन्तविपुलां लभते चरन्तो दानेन सत्त्व परिपाचयि कृच्छ्रप्राप्तान् ।।
शीलेन तीर्यगति वर्जयि नेकरूपामष्टौ च अक्षण क्षणां लभते स नित्यम्।
क्षान्तीय रूप लभते परमं उदारं सुवर्णच्छवि प्रियु जगस्य उदीक्षणीयो ।।
वीर्येण शुक्लगुण हानि न अभ्युपैति ज्ञानं अनन्त लभते जिनकोशगञ्जम् ।
ध्यानेन कामगुण उत्सृजते जुगुप्स्यान् विद्या अभिज्ञ अभिनिर्हरते समादिम्।।
प्रज्ञाय धर्मप्रकृती परिजानयित्वा त्रैधातुकान्त समतिक्रमते अपायान् ।
वर्तित्व चक्ररतनं पुरुषर्षभाणां देसेति धर्म जगती दुखसंक्षयाये ।। --पृ. 30-31

७. मा कुमार भव सुप्रमत्तको मा प्रमादवशमभ्युपेष्यसे।
अप्रमाद सुगतेन वर्णितो निन्दिता हि सुगतैः प्रमत्तकाः।।
अप्रमत्त इह ये च सूरता दानसंयमरता अमत्सराः।
सर्वसत्त्वकृपमैत्रमानसा ते भवन्ति नचिरान्नरोत्तमाः।।
येऽप्रमेय सुगता अतीताः साम्प्रतं च हि येऽप्यनागताः।

सर्व एव कुशलैस्त उद्गता अप्रमादपथ एव सुस्थिताः।। --पृ. 38
८. बहुकल्पकोटीभि कदाचि बुद्धो उत्पद्यते लोकहितो महर्षिः।
लब्धोऽधुना स प्रवरः क्षणोऽद्य त्यज प्रमादं यदि मोक्षकामः।। --पृ. 38-39
९. यथा आर्यसुनन्दरनन्देन किल क्रकुच्छन्दे सम्यक्संबुद्धे भिक्षुसंघे जेन्ताकस्नानं कृतम् .... पश्चमभवे स एव व्याकरोति-

जेन्ताकस्य च स्नानेन हरितालस्य लेपनेन च।
एकच्छत्रप्रदानाञ्च प्राप्ता मे सुवर्णवर्णता।।

तथैवायं शोभितवान्। इदं कर्म प्रासादिकसंवर्तनीयम्। -- पृ. 40
१०. यथा राजा अजातशत्रुः। .... नरकेषूपपन्नमात्र एव च्यवति। -पृ. 40
११. एताः स्त्रियो हि छविमात्रकरूपरम्याः, स्नाय्वस्थियन्त्रमशुचीभि निरर्थकोऽहम्।
प्रस्राविणी रुधिरमूत्रशकृन्मलानां व्यक्तं श्मशानसदृशीषु कथं रमेयम् ।। -पृ. 61
१२. लाभ अथ अलाभे सौख्यदुःखे जिनस्य, अयशसि यश एवं निन्दशंसासु चैवम्।
जलरुहमिव तोयैः सर्वतो नोपलिप्तः एवमिह नृसिंहो नास्ति सत्त्वः समोऽस्य ।। --पृ. 53
१३. नेह मात्र न पिता न बान्धवा धारयन्ति यतमान दुर्गतिम्।
यत्कृतं हि मनुजैः शुभाशुभं तत्प्रयान्तमनुयाति पृष्ठतः ।। --पृ. 53
१४. यो आदिकर्म स्थितु भूमिय बोधसत्त्वो अध्याशयेन वर प्रस्थित बुद्धबोधिम्।
तेही सुशिष्यगुरुगौरवसंप्रयुक्तो कल्याणमित्र सद सेवितव्य विज्ञैः ।।
किं कारणं ततु गुणागमु पण्डितानां प्रज्ञाय पारमित ते अनुशासयन्ति ।
एवं जिनो भणति सर्वगुणाग्रधारी कल्याणमित्रमुपनिश्रित बुद्धधर्माः ।। -- पृ. 91
१५. भ्रमन्ति चक्रवन्मूढा लोकधर्मसमावृताः ।
परमार्थं न जानन्ति भवो यत्र निरुध्यते ।
वेष्टिता भवजालेन संसरन्ति पुनः पुनः ।। ५।।....
शक्रत्वं चक्रवर्तित्वं संप्राप्य चोत्तमं पदम्।
तिर्यग्योनौ पुनर्जन्म तत्सर्वं संवृतेः फलम् ।। १०।। -- पृ. 95
१६. चक्रवर्तिनां सप्तरत्नानि। तद्यथा- चक्ररत्नम्, अश्वरत्नम्, ... परिणायकरत्नं चेति। -- पृ. 95
१७. स्वर्गस्थाने तु ये देवा गन्धर्वाप्सरसादयः।
च्युतिरस्ति च सर्वेषां तत्सर्वं संवृतेः फलम्।। ८।।
सिद्धा विद्याधरा यक्षाः किन्नराश्च महोरगाः।
पुनस्ते नरकं यान्ति तत्सर्वं संवृतेः फलम्।। ९।। -पृ. 96-97
१८. यथा चन्द्रश्च सूर्यश्च प्रत्यागच्छति गच्छति।
भवं च्युतिं तथा लोके पुनरायान्ति यान्ति च।। --पृ. 101
१९. अहसंज्ञतस्तु ममता भवते च रागो, कुतु त्यागबुद्धि भविष्यति सा मुहानाम् ।
मात्सर्य प्रेत भवते उपपद्ययाती, अथवा मनुष्य तद भोति दरिद्ररूपो।। --पृ. 117
२०. मायोपमं जगदिदं भवता नटरङ्गस्वप्रसदृशं विदितम् ।
नात्मा न सत्त्व न च जीवगति धर्मा मरीचिदकचन्द्रसमाः।।

शून्याश्च शान्त अनुपादनय अविजानदेव जगदुद्भ्रमति।
तेषामुपायनययुक्तिशतैरवतारयस्यपि कृपालुतया।।
रागादिभिश्च बहुरोगशतैः सन्तापितं सततमीक्ष्य जगत्।
वैद्योत्तमो विचरसेऽप्रतिमः परिमोचय सुगत सत्त्वशतान्।।
रथचक्रवद् भ्रमति सर्वजगत् तिर्यक्षु प्रेतनिरये सुगतौ।
मूढा अदेशिक अनाथगताः तेषां प्रदर्शयसि मार्गवरम्।। --पृ. 120-121

२१. चतुर्दशाव्याकृवस्तूनि, तद्यथा- शाश्वतो लोकः, अशाश्वतो लोकः, शाश्वतश्चाशाश्वतश्च, ... भवति तथागतः परं मरणात्, न भवति तथागतः परं मरणात्, ... परं मरणात्, नैव भवति न न भवति तथागतः परं मरणात्, स जीवस्तच्छरीरम्, अन्यो जीवोऽन्यच्छरीरं चेति। --पृ. 127

२२. हे भिक्षवः ! यदुत अस्मिन् सति इदं भवति, अस्योत्पादादिदमुत्पद्यते। यदुत अविद्याप्रत्ययाः संस्काराः, ... एवमस्य केवलस्य महतो दुःखस्कन्धस्य समुदयो भवति। --पृ. 129-130

२३. तत्र अविद्यानिरोधात् संस्कारनिरोधः। संस्कारनिरोधाद्विज्ञाननिरोधः। .... जातिनिरोधाज्जरामरणशोकपरिदेवदुःखदौर्मनस्योपायासा निरुध्यन्ते। एवमस्य केवलस्य महतो दुःखस्कन्धस्य निरोधो भवति। अयमुच्यते प्रतीत्यसमुत्पादो भगवता। --पृ. 130-131

२४. यो भिक्षवः ! प्रतीत्यसमुत्पादं पश्यति, स धर्मं पश्यति। यो धर्मं पश्यति, स बुद्धं पश्यति ।
--पृ. 137

२५. मनःपूर्वंगमा धर्मा मनःश्रेष्ठा मनोजवाः।
मनसा चेत्प्रदुष्टेन भाषते वा करोति वा।
ततस्तं दुःखमन्वेति चक्रं वा वहतः पदम्।। १३।।
मनःपूर्वंगमा धर्मा मनःश्रेष्ठा मनोजवाः।
मनसा चेत्प्रसन्नेन भाषते वा करोति वा।
ततस्तं सुखमन्वेति छाया वा अनुयायिनी।। १४।। --पृ. 147-148

२६. इयं सानुत्तरा बोधिः सर्वबुद्धैः प्रकाशिता।
भावनां भावयित्वेह निर्वाणं लभते शिवम्।।
यावन्तः संवृतेर्दोषास्तावन्तो निर्वृतेर्गुणाः।
निर्वृतिः स्यादनुत्पत्तिः सर्वदोषैर्न लिप्यते ।। --पृ. 151

महायानोत्तरतन्त्रः :

१. यो नासन्न च सन्न चापि सदसन्नान्यः सतो नासतो-
ऽशक्यस्तर्कयितुं निरुक्त्यपगतः प्रत्यात्मवेद्यः शिवः।
तस्मै धर्मदिवाकराय विमलज्ञानावभासत्विषे
सर्वालम्बन-रागद्वेषतिमिर-व्याघातकर्त्रे नमः।। --पृ. 13

२. व्याधिर्ज्ञेयो व्याधिर्हेतुः प्रहेयः स्वास्थ्यं प्राप्यं भेषजं सेव्यमेवम्।
दुःखं हेतुस्तन्निरोधोऽथ मार्गो ज्ञेयं हेयः स्पर्शितव्यो निषेव्यः ।। --पृ. 144

३. देवेषु च्युतिदुःखमित्यवगमात् पर्येष्टिदुःखं नृपु प्राज्ञा नाभिलषन्ति देवमनुजेष्वैश्वर्यमप्युत्तमम्।

प्रज्ञायाश्च तथागतप्रवचनश्रद्धानुमान्यादिदं दुःखं हेतुरयं निरोध इति च ज्ञानेन संप्रेक्षणात् ।। --पृ. 145

महावग्ग :

इदं खो पन दुक्खसमुदयं अरियसच्चं -यायं तण्हा पोनोब्भविका नन्दिरागसहगता तत्र तत्राभिनन्दिनी। --पृ. 143

माध्यमिक भारत भूमि का इतिहास :

१. अयं सातवाहनवंशस्य महत्त्वपूर्णः .... सातवाहनगौतमीपुत्रः (१०६-१३० ई.सन्) चतुर्विंशतिवर्षाणिपर्यन्तं सफलं शासनं कृत्वा पश्चात् १३०तमे ईसवीये वर्षे स्वदेहं तत्याज। --पृ. 3-4

मुक्तालतावदानम् :

जन्मभूमौ जनेनाप्तं यद्यत्कर्म शुभाशुभम्।
तस्य तस्य स तद्रूपं भुङ्क्ते परिणतं फलम्।। -- पृ. 54

योगाचारभूमि :

१. प्राणातिपातः कतमः। .... तत्रैव काममित्याचारप्रयोगः काममिथ्याचारनिष्ठायां च यत्कायकर्म। ..... प्रलपितुकामस्य क्लिष्टचेतसोऽबद्धप्रलापप्रयोगेऽबद्धप्रलापनिष्ठायां च यद्वाक्कर्म ......। --पृ. 16-17

२. सः पुनः संवर्तस्त्रिविधो वेदितव्यः। तेजःसंवर्तन्यवीचिमुपादाय यावद्ब्रह्मलोकात्संवर्तते। .... त्रीणि संवर्तनीशीर्षाणि। द्वितीयं ध्यानं तृतीयं ध्यानं चतुर्थं ध्यानम्। --पृ. 85-86

३. तुलनीयम्-- यदा च पञ्चगतिके लोकसन्निवेश एकोऽपि सत्त्वो न प्रज्ञायते तदोपकरणसम्भवोऽपि न प्रज्ञायते। .... प्रज्ञायते तदा वृष्टिरपि न प्रज्ञायते .... सुमेरुर्महापृथिवी च ययोः षष्ठेनैव सप्तमेन च सूर्यमण्डलेन सारतविग्रहतया दाहः। तत एव चार्चिर्वायुना प्रेरिता यावद् ब्रह्मलोकं दहन्ती परैति। --पृ. 86-87

४. अप्संवर्तनी कतमा। यतश्च सप्त तेजःसंवर्तन्यः समतिक्रान्ता भवन्ति ततो द्वितीये ध्याने सहजोऽब्धातुः सम्भवति यस्तं भाजनलोकं लवणमिवाब्धातुर्विलोपयति। .... एकत्यस्य वायुधातौ प्रकुपिते
--पृ. 87
यावदस्थ्यपि कार्श्यमापद्यते। संवृत्तश्च तथैव विंशतिमन्त्रकल्पांस्तिष्ठति।
तथा परिभोगजरादुःखं व्याधिदुःखं
५. तत्र मनुष्येषूपपन्नाः सत्त्वा एवंरूपं विघातदुःखं प्रत्यनुभवन्ति। .... तथा परिभोगजरादुःखं व्याधिदुःखं
मरणदुःखं। तथा हि नरकेषु मरणमेव सुखं मन्यते। अतस्तत्र तन् न दुःखं व्यवस्थाप्यते। --पृ. 94

६. तत्र मनुष्येषु चक्रवर्तिसुखमग्र्यं श्रेष्ठं प्रणीतम्। .... तद्यथा चक्ररत्नं हस्तिरत्नमश्वरत्नं मणिरत्नं स्त्रीरत्नं गृहपतिरत्नं परिणायकरत्नमेव सप्तमम्। --पृ. 95

७. सामन्तनरकेषु पुनरेवं कारणादुःखं सत्त्वाः प्रत्यनुभवन्ति। .... तत्र च कुणपे गूथमृत्तिके कीटाः प्राणिनो ये तेषां सत्त्वानां त्वचमपि च्छिद्रयन्ति मांसमपि स्नाय्वस्थ्यपि भिन्दन्ति ततोऽस्थिमज्जानमासाद्य विलिखन्ति। .... तस्य खल्वयःशाल्मलीवनस्य समनन्तरं सन्निहितमेव वैतरणी नदी पूर्णा क्वथितस्य क्षारोदकस्य यत्र ते सत्त्वा लयनगवेषिणः प्रपतन्ति। .... ततोनिदानं च पुनर्दीर्घकालं दुःखं प्रत्यनुभवन्ति। यावत्तन्नरकवेदनीयं पापकमकुशलं कर्म सर्वेण सर्वं न परिक्षीणं भवति व्यन्तीकृतं। तत्र यश्च क्षुरधाराचितः पथो यश्चासिपत्रवनं यश्चायःशाल्मलीवनं या च वैतरणी नदी अयमेक उत्सद इति कृत्वा चत्वार उत्सदा भवन्ति ---पृ. 99-100

८. तत्र शीतनरकेषूपपन्नाः सत्त्वा एवंरूपं शीतदुःखं प्रत्यनुभवन्ति। .... तस्माच्च स नरकः पद्म इत्युच्यते। तत्र महापद्मोऽयं विशेषः। भृशतरं व्यालोहितायमाना शतधा वा भूयो वा त्वचां स्फोटमापद्यन्ते। तस्माच्च स महानरको महापद्म इत्युच्यते। --पृ. 102-103

९. तत्र सञ्जीवे महानरके एवंरूपं कारणादुःखं प्रत्यनुभवति बाहुल्येन। .... तस्माच्च पुनः स नरकः सञ्जीव इत्युच्यते। --पृ. 103

१०. तत्र कालसूत्रमहानरके एवंरूपं कारणादुःखमनुभवन्ति बाहुल्येन। तत्र ते सत्त्वास्तत्पर्यापन्नैर्यातनापुरुषैः कालकेन सूत्रेण माप्यन्ते। ...... तस्माच्च पुनः स नरकः कालसूत्र इत्युच्यते। --पृ. 103

११. तत्र सङ्घाते महानरक एवंरूपं कारणादुःखं प्रत्यनुभवन्ति बाहुल्येन। तत्र ते सत्त्वा यदान्योन्यमैकध्यमभिसंक्षिप्ताः सङ्घातमापन्ना भवन्ति तदा तत्पर्यापन्नैर्यातनापुरुषैर्द्वयोरजमुखयोरायसयोर्महापर्वतयोर्विवरमनुप्रवेश्यन्ते। .... ततो निदानं च दीर्घकालं दुःखं प्रत्यनुभवन्ति यावत्तत्पापकमकुशलं कर्म सर्वेण सर्वं न परिक्षीणं भवति व्यन्तीकृतं। तस्माच्च पुनः स नरकः सङ्घात इत्युच्यते। --पृ. 104

१२. तत्र रौरवे महानरक एवंरूपं कारणादुःखं प्रत्यनुभवन्ति बाहुल्येन। तत्र ते सत्त्वा लयनगवेषिण आयसमगारं .... न परिक्षीणं भवति व्यनतीकृतं। तस्माच्च पुनः स नरको रौरव इत्युच्यते। --पृ. 104

१३. तत्र महारौरवे महानरकेऽयं विशेषो यो रौरवेऽगारः स तत्रागार एव विज्ञातव्यः सगर्भस्तु। तस्माच्च पुनः स नरको महारौरव इत्युच्यते। --पृ. 105

१४. तत्र तपने महानरक एवंरूपं कारणादुःखं प्रत्यनुभवन्ति बाहुल्येन। .... ततो निदानं च दीर्घकालं दुःखं प्रत्यनुभवन्ति यावत्पापकमकुशलं कर्म सर्वेण सर्वं न परिक्षीणं भवति व्यन्तीकृतं। तस्माच्च पुनः स नरकस्तपन इत्युच्यते। --पृ. 105

१५. तत्र प्रतापने महानरकेऽयं विशेषः। त्रिशूलशल्यं पृष्ठतो निर्गमयन्ति। ...... ततः सञ्जातत्वङ्मांसशोणिताः पुनरपि प्रक्षिप्यन्ते। शेषं तपनवत्। ततो निदानं च पुनर्दीर्घकालं दुःखं प्रत्यनुभवन्ति। यावत्तत्पापकमकुशलं कर्म सर्वेण सर्वं न परिक्षीणं भवति व्यन्तीकृतं। तस्माच्च पुनः स नरकः प्रतापन इत्युच्यते। ---पृ. 106

१६. तत्रावीचौ माहनरक एवंरूपं कारणादुःखं प्रत्यनुभवन्ति। .... अयोगुडा मुखेषु क्षिप्यन्ते ये तेषां मुखमपि दहन्ति कण्ठमप्यन्त्रमपि दग्ध्वा च पुनरधोभागेन निर्गच्छन्ति .... तस्माच्च पुनः स नरकोऽवीचिरित्युच्यते यत्र यद्भूयसानन्तर्यकारिणः सत्त्वा उपपद्यन्ते। .... न च पुनरेषु महानरकेषु तदन्यानि विचित्राकाराणि बहूनि कारणानि नोपलभ्यन्ते। --पृ. 106-107

१७. तत्र तिर्यञ्चोऽन्योन्यं विप्रघातिकां कुर्वन्ति यथा दुर्वलघातिकां। ...... ततो निदानमपि विचित्राणि दुःखानि प्रतिसंवेदयन्ति। --पृ. 112

१८. प्रेताः पुन समासतस्त्रिविधा बहिर्भोजनपानकृतावरणा अध्यात्मं भोजनपानकृतावरणा भोजनपानकृतावरणाश्च। .... तच्च पानीयं पूयशोणितं पश्यन्ति। ..... इम एवंरूपाः प्रेता बहिर्धाभोजनपानकृतावरणाः। --पृ. 113

१९. अध्यात्मं भोजनपानकृतावरणाः कतमे। तद्यथा सूचीमुखा उल्कामुखा गलगण्डकाश्च महोदराः .... इम एवंरूपाः प्रेता अध्यात्मं भोजनपान-कृतावरणाः। --पृ. 114

२०. भोजनपानकृतावरणाः कतमे। सन्ति ज्वालामालिनो नाम प्रेता येषां भुक्तं भुक्तं पीतं पीतं सर्वमवदह्यते येनैषां क्षुत्पिपासादुःखं न कदाचिदपैति। --पृ. 114

२१. सन्ति च प्रेता अवस्करभक्षा नाम य एकत्येऽमेध्यं भक्षयन्ति प्रस्रावं पिबन्ति .... यत्तु भवति शुचि वा प्रणीतं वा तत्र शक्नुवन्ति भोक्तुं वा पातुं वा। इम एवंरूपाः प्रेता भोजनपानकृतावरणा इत्युच्यन्ते। --पृ. 115

२२. देवेषु च मर्मच्छेदो नास्ति। .... असंक्लिष्टानि वासांसि क्लिश्यन्ते। अम्लानपूर्वा माला म्लायन्ति। कक्षाभ्यां स्वेदो मुच्यते। दौर्गन्ध्यं काये च क्रामति। स्व आसने देवो वा देवपुत्रो वा न रमते। --पृ. 118

२३. तस्य तस्मिन्समये परिषण्डे परिगतस्य ता अप्सरसस्तदन्यैर्देवपुत्रैः सार्धं परिचरन्ति। स ता दृष्ट्वा ततो निदानं महद् दुःखदौर्मनस्यं प्रतिसंवेदयते। .... तस्माद्देवास्त्रिविधं दुःखं प्रत्यनुभवन्ति च्यवनपतनदुःखं मद्गुभावदुःखं छेदनभेदनवधप्रवासनदुःखं च।। --पृ. 119

२४. द्रष्टव्यम्-- गम्भीरः प्रतीत्यसमुत्पाद उक्तो भगवता। कथं गम्भीरो वेदितव्यः। दशभिराकारैः प्रतीत्यसमुत्पादस्य गम्भीरार्थो द्रष्टव्यः। .... अनादिप्रतिषिद्धलक्षणानि चाङ्गानि प्रतिक्षणं च नव-नव-लक्षणानि प्रवर्तन्ते। क्षणभङ्गुरश्च प्रतीत्यसमुत्पादः। अवस्थितप्रकारतया च ख्याति।
--पृ. 137

रत्नावलि :

१. कच्छ्वाकण्डूयेन सौख्यं कच्छ्वाऽभावस्ततः सुखम्।
रागिलोके सुखं तद्वत् रागाभावस्ततः सुखम्।। --पृ. 51

२. प्राग्धर्माभ्युदयो यत्र पश्चान्नैश्रेयसोदयः ।
संप्राप्याभ्युदयं यस्मादेति नैःश्रेयसं क्रमात्।।
सुखमभ्युदयस्तत्र मोक्षो नैःश्रेयसो मतः ।
अस्य साधनसंक्षेपः श्रद्धाप्रज्ञे समासतः ।। --पृ. 71

३. निवृत्तेस्तेन लोकस्य नोपैत्यूनत्वमर्थतः ।
अन्तवानिति लोकश्च पृष्टस्तूष्णीं जिनोऽभवत्।।
सर्वज्ञ इति सर्वज्ञो बुधैस्तेनैव गम्यते।
यैर्नैतद्धर्मगाम्भीर्यं नोवाचाभाजने जने।। --पृ. 128

लंकावतारसूत्रम् :

१. निवृते सुगते पश्चात्कालोऽतीतो भविष्यति।
महामते, निबोध त्वं यो नेत्रीं धारयिष्यति।।
दक्षिणापथवेदल्यां भिक्षुः श्रीमान् महायशाः।
नागाह्वयः स नाम्ना तु सदसत्पक्षदारकः।।
प्रकाश्य लोके मद्यानं महायानमनुत्तरम्।
आसाद्य भूमिं मुदितां यास्यतेऽसौ सुखावतीम्।। --पृ. 3

२. ध्यानध्येयसमाधिविमोक्षबलाभिज्ञानक्लेशदुःखविकल्पाभावादर्हन्नित्युच्यते। --पृ. 8

३. षट्पारमितां परिपूर्य बुद्धत्वमवाप्यत इति। तत्कतमास्ताः षट्पारमिताः? ...सा प्रज्ञापारमिता। --पृ. 28-29

४. तृष्णा हि माता इत्युक्ता अविद्या च पिता तथा।
विषयाववोधाद्विज्ञानं बुद्ध इत्युपदिश्यते ।। --पृ. 110

५. चित्तं प्रवर्तते चित्तं चित्तमेव विमुच्यते।
चित्तं हि जायते नान्यच्चित्तमेव निरुध्यते।। --पृ. 147

ललितविस्तरः :

न च संस्कृते सहाया न मित्रज्ञातीजनो च परिवाराः।
अन्यत्र कर्म सुकृतादनुबध्नाति पृष्ठतो याति ।। -- पृ. 101

वज्रच्छेदिकासूत्रस्य विस्तृता टीका :

१ क्लेश-स्कन्ध-मृत्यु-देवपुत्ररूपाणां चतुर्णां माराणां भञ्जकत्वान्निरुक्त्या भगवान् इति स्मर्यते। अथवा ऐश्वर्यादिमत्त्वात् भगवान् इत्युच्यते। यथोक्तम्-
ऐश्वर्यस्य समग्रस्य रूपस्य यशसः श्रियः।
ज्ञानस्याथ प्रयत्नस्य षण्णां भग इति श्रुतिः।। --पृ. 7

२. यथावद्वस्तुतत्त्वदेशनात् तथागतः।..... तथागतः। .... हन्तृत्वाद् अर्हन्। समस्तज्ञेयानां .... सम्यकसम्बुद्धः। एभिः पदैर्भगवतः ... स्व-परार्थसम्पदुपदर्शिता भवति। --पृ. 9

३. वस्तुतत्त्वं यथास्थितिः, ... सम्यगववुद्धत्वात् सम्यक्सम्बुद्धः इत्युच्यते। --पृ. 9

४. नैरात्म्यद्वयमार्गेण सम्यग् गत इति सुष्ठुरूपेण गतः सुगतः, सुरूपवदिति। अथवा निखिलसवासनाशेषक्लेशज्ञेयावरणानि प्रहाय गतः सुगतः, सुपूर्णघटवत्। अथवा अपुनरावृत्त्या गतः सुगतः, सुनष्टज्वरवत्। --पृ. 10

वज्रच्छेदिकासूत्रम् :

भूतवादी सुभूतेः तथागतः, सत्यवादी तथावादी अनन्यथावादी तथागतः, न वितथवादी तथागतः।
--पृ. 7

वर्णनार्हवर्णे बुद्धस्य स्तोत्रः :

आभवाग्रमपि स्पृष्ट्वा त्वद्धर्मविमुखे जनः।
प्रचिनोत्येव मोहान्धो व्यसनप्रभवान् भवान्।। २२।।
अनागम्यापि तु ध्यानं मौलं त्वच्छासनानुगाः।
विवर्तयन्त्येव भवान् (मारस्य) वशवर्तिनः।। २३।। --पृ. 126

विसुद्धिमग्ग :

१ बुद्धं आरब्भ उप्पन्ना ..... धम्मानुस्सति। .... अनुस्सति देवतानुस्सति। देवता सक्खिट्ठाने ठपेत्वा अत्तनो सद्धादिगुणारम्मणाय सतिया एतं अधिवचनं। --पृ. 6

२. यस्मा रागादिसङ्खाता सब्बे पि अरयो हता।
पञ्ञासत्थेन नाथे तस्मा पि अरहं मतो ति।। --पृ. 8

३. स्वाक्खातो भगवता धम्मो सन्दिट्ठिको अकालिको एहिपस्सिको ओपनेय्यिको पच्चतं वेदितब्बो विञ्ञूही' ति एवं परियत्तिधम्मस्स चेव नवविधस्स च लोकुत्तरधम्मस्स गुणा अनुस्सरितब्बा। --पृ. 13

४. सुप्पटिपन्नो भगवतो सावकसंघो........... सावकसंघो, सामीचिप्पटिपन्नो भग०.... अट्ठ पुरिसपुग्गला, एस भगवतो सावकसंघो आहुनेय्यो, पाहुनेय्यो, ... अनुत्तरं पुञ्ञक्खेत्तं .... अनुस्सरितब्बा। --पृ. 14

५. चागानुस्सतिं भावेतुकामेन .... योहं मच्छेरमलपरियुट्ठिताय पजाय विगतमलमच्छेरेन ... वोस्सग्गरतो याचयोगो दानसंविभागरतो'' ति एवं... अत्तनो चागो अनुस्सरितब्बो। --पृ. 14-15

६. सीलानुस्सतिं भावेतुकामेन पन ...... एवं अखण्डतादिगुणवसेन अत्तनो सीलानि अनुस्सरितब्बानि। तानि च गहट्ठेन गहट्ठसीलानि, पब्बजितेन पब्बजितसीलानि। --पृ..15

७. देवतानुस्सतिं भावेतुकामेन .... सक्खिट्ठाने ठपेत्वा अत्तनो सद्धादिगुणा अनुस्सरितब्बा। --पृ. 16

८. एतासु हि मेत्ताकरुणामुदिताउपेक्खासु .... मोदन्ति ताय तंसमङ्गिनो, सयं वा मोदति, मोदनमत्तमेव वा तं ति मुदिता। 'अवेरा होन्तू' ति आदिव्यापारपहानेन मज्झत्तभावूपगमनेन च उपेक्खती ति उपेक्खा। --पृ. 63

विज्ञप्तिमात्रतासिद्धि :

१. तत्र सत्कायदृष्टिर्यत्पञ्चसूपादानस्कन्धेष्वात्मात्मीय-दर्शनम्। ....शीलव्रतपरामर्शः पञ्चसूपादानस्कन्धेषु शुद्धितो मुक्तितो नैर्याणिकतश्च यद् दर्शनम्। --पृ. 24

२. मात्सर्यं दानविरोधी चेतस आग्रहः। ..... दानाभावात् तद्विरोधीत्युच्यते ...... आग्रहोऽपरित्यागेच्छा मात्सर्यम् .... संचयाद् वेदितव्यः। --पृ. 35

३. शाठ्यं स्वदोषप्रच्छादनोपायसंगृहीतं चेतसः कौटिल्यम्। ... परव्यामोहनम् .... रागमोहाभ्यां स्वदोषप्रच्छादनार्थं परव्यामोहनाय प्रवर्तते। .... सम्यगववादस्य यो लाभो योनिशोमनसिकारस्तस्यान्तरायं करोति। --पृ. 35-36

५. मायापरवञ्चना, या अभूतार्थसंदर्शनता। ..... प्रकाशना। इयं च सहिताभ्यां रागमोहा ..... न द्रव्यत इति मिथ्याजीवसंनिश्रयदानकर्मिका। --पृ. 36

४. कौसीद्यं कुशले चेतसोऽनभ्युत्साहो वीर्यपक्षः ष कुशले कायवाङ्मनःकर्मणि निद्रापार्श्वशयनसुखमागम्य यो मोहांशिकश्चेतसोऽनभ्युत्साहः। एतच्च कुशलपक्षप्रयोगपरिपन्थिकर्मकम्। --पृ. 36

५. मानो हि नाम सर्व एव सत्कायदृष्टिसमाश्रयेण प्रवर्तते .... 'अयमहम्, इदं मम' इत्यात्मानं तेन तेन विशेषेणोन्नमयति, अन्येभ्योऽधिकं मन्यते। .... चित्तोन्नतिनिमित्तभेदात् सप्तधा भिद्यते, मानोऽतिमान इत्येवमादि। --पृ. 37

६. तत्र रागो भवभोगयोरध्यवसानं प्रार्थना च। स पुनर्दुःखसंयोजनकर्मकः। दुःखमत्रोपादानस्कन्धास्तेषां कामरूपारूप्यतृष्णावशादभिनिर्वृत्तिः। अतो रागस्य दुःखसंयोजनं कर्म निर्दिश्यते। --पृ. 37

७. प्रतिघः सत्त्वेष्वाघातः सत्त्वेषु रूक्षचित्तता .... 'अस्पर्शविहारः' दुःखसहित इत्यर्थः। आघातचित्तस्यावश्यं दौर्मनस्यसमुदाचारात् चित्तं तप्यते ..... प्रतिघोऽस्पर्शविहारदुश्चरितसंनिश्रयदानकर्मक उक्तः। --पृ. 37

८. मदः स्वपम्पत्तौ रक्तस्योद्धर्षश्चेतसः पर्यादानम्। .... उद्धर्षो हर्षविशेषः ..... भवतीत्येतदुक्तं चेतसः पर्यादानमिति। अयं च सर्वक्लेशोपक्लेशसंनिश्रयदानकर्मकः। --पृ. 37

९. तत्राप्रमादः प्रमादप्रतिपक्षः। अलोभाद् यावद् वीर्यम् अप्रमादः। .... धर्मान् प्रजहाति, तत्प्रतिपक्षांश्च कुशलान् धर्मान् भावयति, तेऽलोभादयोऽप्रमादः। .... स पुनर्लौकिकलोकोत्तरसम्पत्तिपरिपूरणकर्मकः। --पृ. 38

१०. तत्र क्रोधो वर्तमानमपकारमागम्य यश्चतेस आघातः। ..... प्रतिघस्यावस्थाविशेषे प्रज्ञप्तत्वात् प्रतिघांशिकः। .... दण्डदानादिसंनिश्रयदानकर्मकश्च स क्रोध इति प्रज्ञप्यते। --पृ. 43

११. तत्र श्रद्धा कर्म-फल-सत्य-रत्नेष्वभिसम्प्रत्ययः प्रसादश्चेतसोऽभिलाषः। .... क्लेशोपक्लेशमलकालुष्यविगमात् चित्तं प्रसीदतीति चेतसः प्रसाद उच्यते। सा पुनश्छन्दसंनिश्रयदानकर्मिका। --पृ. 56

१२. ह्रीरात्मानं धर्मं वाधिपतिं कृत्वावद्येन लज्जा। .... तेनावद्येन कृतेनाकृतेन वा या चित्तस्यावलीनता लज्जा सा ह्रीः। इयं च दुश्चरितसंयमसंनिश्रयदानकर्मिका। --पृ. 57

१३. अपत्राप्यं लोकमधिपतिं कृत्वावद्येन लज्जा। 'लोके ह्येतद् गर्हितम्, मां चैवंकर्माणं विदित्वा गर्हिष्यति'--इत्यश्लोकादिभयाद् येन लज्जते। इदमपि दुश्चरितसंयमसंनिश्रयदानकर्मकम्। --पृ. 57

१४. धीः प्रज्ञा। .... प्रविचिनोतीति प्रविचयः, यः सम्यक् मिथ्या वा सङ्कीर्णस्वसामान्यलक्षणेष्विव धर्मेषु विवेकावबोधः। ...... तत्राप्तवचनप्रामाण्याद् .... समाधिजो भावनामयः। --पृ. 57

१५. औद्धत्यं चित्तस्याव्युपशमः। व्युपशमो हि शमथः, तद्विरुद्धोऽव्युपशमः। .... कुत्सितं कृतमिति कुकृतम्, तद्भावः कौकृत्यम्। ..... एतच्च चित्तस्थितिपरिपन्थकर्मकम्। --पृ. 68

१६. स्त्यानं चित्तस्याकर्मण्यता स्तैमित्यम् स्तिमितस्य भावः स्तैमित्यम्, ... मिद्धम् अस्वतन्त्रवृत्तिचेतसोऽभिसंक्षेपः। .... एतच्च मोहांशे प्रज्ञपनात् मोहांशिकम्, कृत्यातिपत्तिसंनिश्रयदानकर्मकं च। --पृ. 68

१७. विचिकित्सा कर्मफलसत्यरत्नेषु विमतिः। ...... प्रज्ञातश्चेयं जात्यन्तरमेवोक्ता। --पृ. 68

१८. उपेक्षा चित्तसमता चित्तप्रशठता चित्तानाभोगता। एभिस्त्रिभिः पदैरुपेक्षाया आदि-मध्यावसानावस्था द्योतिता। तत्र लय औद्धत्यं वा चेतसो वैषम्यम्, तस्याभावाद् आदौ चित्तसमता। .... इयं च सर्वक्लेशोपक्लेशानवकाससंनिश्रयदानकर्मिका। --पृ. 124

शिक्षासमुच्चयः :

१. एवं नारायणपरिपृच्छायामप्युक्तम्-- न तद्वस्तूपादातव्यं यस्मिन् वस्तुनि नास्य त्यागचित्तमुत्पद्यते। .... कः पुनर्वादो बाह्येषु वस्तुषु यदुत धनधान्य....। -पृ. 15

२. यच्चक्रवर्तित्वमवाप्नुवन्ति भवन्ति शक्रास्त्रिदशेश्वराश्च।
ब्रह्माण ईशा वशवर्तिनश्च तद् ब्रह्मचर्यं विपुलं चरित्वा।।
क्षितीश्वराश्चैव भवन्त्युदग्राः सुश्रेष्ठिनो वै गृहपत्यमात्याः।
सुखसौमनस्येन च यान्ति वृद्धिं ये ब्रह्मचर्यं विपुलं चरति।। --पृ. 34

३. न रूपवन्तो हि भवन्ति रागात् न रक्तचित्ताः सुगतिं व्रजन्ति।
न निर्वृतिं यान्ति च रक्तचित्ता रागो हि तस्मात्परिवर्जनीयः।। --पृ. 37

४. यावन्ति धर्माः कुशलाः प्रकीर्तिताः शील श्रुतं त्यागु क्षान्तिः।
सर्वेष मूलं ह्ययमप्रमादो निधानलम्भः सुगतेन देशितः ।।
उक्तं हि आर्यतथागतगुह्यसूत्रे-- तत्र कतमोऽप्रमादः? यदिन्द्रियसंवरः। .... अयमुच्यते अप्रमादः। ..... यावदयमुच्यतेऽप्रमादः। .....तथा अत्रैवाह--
सदाऽप्रमादो ह्यमृतस्य मूलं सत्त्वार्थयुक्तस्य च बोधिचित्तम्।
यद्योनिशश्चैव विवेकचित्तमपरिग्रहः सर्वसुखस्य मूलम् ।। --पृ. 39

५. तत्र क्षान्तिस्त्रिविधा ... दुःखाधिवासनक्षान्तिः, धर्मनिध्यानक्षान्तिः परापकारमर्षणक्षान्तिश्चेति। --पृ. 41

६. आर्यदशभूमकसूत्रेऽप्युक्तम्-- येयं वागमनोज्ञा .... परिहरतीति। आर्यगगनगञ्जसूत्रे तूक्तम्-- गुरुवचनानवमर्दनतया, परवचनानाच्छिन्दनतया चादेयग्राह्यवचनो भवतीति। धर्मसंगीतिसूत्रेऽप्युक्तम्-- गगनगञ्जो बोधिसत्त्व आह-- न बोधिसत्त्वेनैषा .... न कर्णसुखा, न सा वाग्भाषितव्येति। --पृ. 44

७. दृष्ट्वा च दारान् हि परस्य ये वै कुर्वन्ति माताभगिनीति संज्ञाम्।
प्रासादिकास्ते हि सुदर्शनीया भवन्ति नित्यं परमं मनोज्ञाः।। -पृ. 46

८. यतश्चैते कामा एवं ......। नैष मार्गः सत्पुरुषसंसेवितः। ....
कामस्य हेतोर्निरयं पतन्ति प्रेतास्तिरश्चोऽथ भवन्ति रागात्।
कुम्भाण्डयक्षा असुराः पिशाचा भवन्ति ये रागपरीत्तचित्ताः।।
काणाश्च खञ्जाश्च विजिह्वकाश्च विरूपकाश्चैव भवन्ति रागात्। -- पृ. 48
भवन्ति नानाविधदोषभाजश्चरन्ति ये कामचरीं जघन्याम् ।।

९. आर्यरत्नमेघेऽप्यनर्थवर्जनमुक्तम्-- तावत्पिण्डाय चरति ...... सर्वेण सर्वं वर्जयतीति।
--पृ. 48

१०. मारस्य गोचरो ह्येष प्रस्थिता येन दुर्गतिः।
आस्वादसंज्ञिनो गृद्धा मीढस्थाने यथा क्रिमिः।।
कीटकुम्भो यथा चित्रो यत्र यत्रैव दृश्यते।
पूर्णो मूत्रपुरूषेण दृतिर्वा वातपूरिता।।
सिङ्घाणककफा लालाः श्लेष्मणि क्लिन्नमस्तकाः।
दौर्गन्ध्यं स्रवते कायाद् बालानां तद्यथा मधु।।
अस्थिपूर्णं मुखद्वारं मांसचर्मादिभिश्चित्तम्।
गण्डभूतो ह्ययं कायः कुत्सितो ह्यामगन्धिकः।। -- पृ. 49-50

११. बोधिसत्त्वेन स्वभार्याया अन्तिके तिस्रः संज्ञा .... प्रज्ञान्तरायसंज्ञा। अपरास्तिस्रः-- चोरसंज्ञा वधकसंज्ञा नरकपालसंज्ञा इति। -- पृ. 60

१२. तथा बोधिसत्त्वप्रातिमोक्षेऽप्यप्रसादपरिहार उक्तः-- न पुरतो दन्तकाष्ठं खादितव्यं न पुरतः ...... तथा प्रातिमोक्षादपि लोकाप्रसादकरमन्वेष्य वर्जनीयम्। तत्र तावत्--
मुखपूरं न भुञ्जीत सशब्दं प्रसृताननः ।
प्रलम्बपादं नासीत न बाहुं मर्दयेत्समम्।। --पृ. 61

१३. अध्रुवं त्रिभवं शरदभ्रनिभं नटरङ्गसमा जगि जन्मच्युतिः।
गिरिनद्यसमं लघुशीघ्रजवं व्रजतायु जगे यथ विद्यु नभे ।। --पृ. 83

१४. कल्याणमित्रसंधारिताः कुलपुत्र बोधिसत्त्वा न पतन्ति दुर्गतिषु। ....अत एवं चतुर्धर्मकसूत्रेऽप्युक्तम्-- कल्याणमित्रं भिक्षवो बोधिसत्त्वेन यावज्जीवं न परित्यक्तव्यमपि जीवितहेतोरिति। तदेवम्- **कल्याणमित्रानुत्सर्गात्**, आत्मभावादीनां रक्षादिकं कार्यम्। --पृ. 91

१५. समाहितो यथाभूतं प्रजानातीत्यवदन्मुनिः।
शमाच्च न चलेच्चित्तं बाह्यचेष्टानिवर्तनात् ।।

यथोक्तं धर्मसंगीतौ- समाहितमनसो यथाभूतदर्शनं भवति। यथाभूतदर्शिनो बोधिसत्त्वस्य सत्त्वेषु महाकरुणा प्रवर्तते। .... तस्मान्मया शीलसुस्थितेनाप्रकम्प्येनाशिथिलेन भवितव्यमिति। --पृ. 126

समाधिराजसूत्र :

१. येहि पूजित जिनान कोटियो, दानशीलचरिता विचक्षणाः।
पापमित्र पुरि येहि वर्जिता, तेष पैतृकधनं निरुत्तरम्।।
कल्याणमित्रास्य न भोन्ति दुर्लभा, बुद्धांश्च यो पश्यति श्रावकांश्च।
दृष्ट्वा च तान् पूजयते प्रसन्नो, अमत्सरिस्या इमि आनुशंसाः ।।
नित्य सगौरव चाचरियेषु मातु पितुस्तथ सर्वजगस्मिन्।
मा पुन मानवशानुग भोथा लप्स्यथ लक्षण त्रिंश दुवे च।। -पृ. 32

२. ते भोजनं स्वादुरसं प्रणीतं लब्ध्वा च भुञ्जन्ति अयुक्तयोगाः ।

तेषां स आहारु वधाय भोति यथ हस्तिपोतान बिसा अधौतकाः।। -पृ. 61

३. सिंहनादं नदि बुद्धः सिंहविक्रान्तविक्रमः ।
जितास्ते तीर्थिकाः सर्वे सिंहेन क्रोष्टुका यथा।। - पृ. 49

सौन्दरनन्दकाव्यम् :

१ प्रश्वसित्ययमन्वक्षं यदुच्छ्रसिति मानवः ।
अवगच्छ तदाश्चर्यमविश्वास्यं हि जीवितं ।।
इदमाश्चर्यमपरं यत्सुप्तः प्रतिबुध्यते ।
स्वपित्युत्थाय वा भूयो बह्वमित्रा हि देहिनः।। --पृ. 84

हेवज्रपञ्जिका मुक्तावलिः :

देशितो वो मया मार्गस्तृष्णाशल्यस्य कर्त्तनः।
युष्माभिरेव कर्त्तव्यमाख्यातारस्तथागतः।। --पृ. 79

सर्वमङ्गलम्

*****

༄༅། །བཤེས་པའི་སྤྲིང་ཡིག་གི་ས་བཅད།

བཤེས་པའི་སྤྲིང་ཡིག་གི་དོན་འཆད་པ་ལ་གཉིས།

༡ མཉན་པར་གདམས་པ་དང་། 201

༢ གདམས་པ་དངོས་སོ། 204

གཉིས་པ་གདམས་པ་དངོས་ལ་གསུམ།

ཀ། སྤྱིར་དགེ་བ་གདམས་པ།

ཁ། འཁོར་བའི་ཉེས་པས་སྐྱོ་བར་བྱ་བ།

ག། མྱ་ངན་ལས་འདས་པའི་ཕན་ཡོན་བསམ་ནས་ལམ་སྒྲུབ་པར་གདམས་པའོ།

ཀ། དང་པོ་ལ་གསུམ།

༡ ཁྱིམ་པ་དང་རབ་བྱུང་ཐུན་མོང་ལ་གདམས་པ།

༢ ཁྱིམ་པ་ལ་གཙོ་ཆེར་གདམས་པ།

༣ རབ་བྱུང་དང་ཁྱིམ་པ་གཉིས་ཀར་མངོན་མཐོ་དང་ངེས་ལེགས་ཀྱི་ཆོས་སྒྲུབ་པར་གདམས་པའོ།

དང་པོ་ལའང་གསུམ། (ཁྱིམ་པ་དང་རབ་བྱུང་ཐུན་མོང་ལ་གདམས་པ་)

༡ རྗེས་དྲན་དྲུག་གིས་དྲན་པ་ལ་གནས་པར་བྱ་བ། 204

༢ སྤྱིར་དགེ་བའི་ལས་ལམ་ལ་གནས་པར་གདམས་པ། 211

༣ ཕ་རོལ་ཏུ་ཕྱིན་པ་དྲུག་ལ་གནས་པར་གདམས་པ། 217

གཉིས་པ་ལ་དགུ (ཁྲིམས་པ་ལ་གཙོ་ཆེར་གདམས་པ་)

༡ ཕ་མ་ལ་གུས་པར་བྱ་བ། 218

༢ སྙེན་གནས་ལ་གནས་པར་བྱ་བ། 219

༣ བསམ་པ་ཕྱིན་ཅི་ལོག་སྤང་བ། 221

༤ བག་ཡོད་པར་བྱ་བ། 222

༥ བཟོད་པ་ལ་གནས་པར་བྱ་བ། 225

༦ སྒོ་གསུམ་གྱི་སྤྱོད་པ་དམན་པ་སྤངས་པ། 227

༧ གང་དང་འགྲོགས་པའི་གྲོགས་ཀྱི་མཚན་ཉིད་ཤེས་པར་བྱ་བ། 229

༨ གཞན་གྱི་ཁྲིམས་ཐབ་ལ་ཆགས་པ་སྤང་བའོ། (དེ་ལ་གཉིས་ལས་)

ཀ། མགོ་གནོན་པའི་ཚུལ་ལ་གསུམ།

༡ འདུ་ཤེས་བསྒྱུར་ཅིང་མི་གཙང་བར་ལྟ་བ། 230

༢ སེམས་སྲུང་ཞིང་དབང་པོའི་སྒོ་བསྡམ་པ། 231

༣ ཆགས་ཡུལ་དང་ཆགས་ཅན་གྱི་ཉེས་པ་བསམ་པ། 233

ཁ། ས་བོན་དང་བཅས་པ་སྤོང་བའི་ཚུལ་ལ་དྲུག

༡ དངོས། 234

༢ ཞར་ལ་ཤེས་རབ་དང་ཚུལ་ཁྲིམས་ཀྱི་བསྔགས་པ། 235

༣ འཇིག་རྟེན་གྱི་ཆོས་ལས་ལྡོག་པར་བྱ་བ། 236

༤ འཕགས་པའི་ནོར་དང་ལྡན་པར་བྱ་བ། 238

༥ འཕགས་པའི་ནོར་དེའི་འགལ་རྐྱེན་སྤང་བ། 240

༧ མཐུན་རྐྱེན་ཆོག་ཤེས་པ་ལ་གནས་པར་གདམས་པ། 241
༨ རང་གི་ཁྱིམ་ཐབ་ཀྱི་སྐྱོན་ཡོན་ཤེས་ནས་བསྟེན་ཚུལ། 242

གསུམ་པ་ལ་གསུམ།

(རབ་བྱུང་དང་ཁྱིམ་པ་གཉིས་ཀར་མངོན་མཐོ་དང་ངེས་ལེགས་ཀྱི་ཆོས་སྒྲུབ་པར་གདམས་པ་)

༡ ཐུན་མོང་གི་ཆོས་སྒྲུབ་པ།
༢ ཁྱད་པར་དུ་ངེས་ལེགས་ཀྱི་ཆོས་སྒྲུབ་པ།
༣ དེའི་རྟེན་ཐོབ་པ་དོན་ཡོད་པར་བྱ་བ།

དང་པོ་ལ་དྲུག

༡ ཟས་ཀྱི་ཚོད་རིག་པ། 244
༢ ནམ་གྱི་ཆ་སྟོད་སྨད་ལ་མི་ཉལ་བར་སྦྱོར་བ། 245
༣ ཚད་མེད་བཞི་སྒོམ་པ། 247
༤ བསམ་གཏན་བཞི་བསྒོམ་པ། 250
༥ ལས་ལྕི་ཡང་གི་དབྱེ་བས་དགེ་སྡིག་བླང་དོར་ཇི་ལྟར་བྱ་བ། 251
༦ སྒྲིབ་པ་ལྔ་སྤང་བའོ། 252

གཉིས་པ་ལ་གསུམ། (ཁྱད་པར་དུ་ངེས་ལེགས་ཀྱི་ཆོས་སྒྲུབ་པ་)

༡ སྦྱོར་ལམ་དབང་པོ་ལྔ་དང་སྟོབས་ལྔ་བསྒོམ་པ། 253
༢ དེའི་འགལ་རྐྱེན་རྒྱགས་པ་སྤང་བ། 254

༣ ཡང་དག་པའི་ལྟ་བ་བསྒོམ་པའོ། (དེ་ལ་གཉིས་)

ཀ། མདོར་བསྟན་པ། 254
ཁ། རྒྱས་པར་བཤད་པ། (དེ་ལ་དབྱེ་བ་ལྔ་ཡོད་)
༡ དྲན་པ་ཉེར་གཞག་བཞི་བསྒོམ་པ། 255
༢ ཁྱད་པར་དུ་ཆོས་དྲན་པ་ཉེར་གཞག་བསྒོམ་པ། 256
༣ འགལ་རྐྱེན་ཀུན་སྦྱོར་གསུམ་སྤང་བ། 262
༤ མཐུན་རྐྱེན་བསླབ་པ་གསུམ་ལ་བསླབ་པ། 262
༥ དེའི་རྒྱུར་ལུས་སུ་གཏོགས་པའི་དྲན་པ་བསྲུང་བའོ། 263

གསུམ་པ་ལ་གསུམ། (དེའི་རྟེན་ཐོབ་པ་དོན་ཡོད་པར་བྱ་བ་)

༡ ལུས་མི་རྟག་ཅིང་སྙིང་པོ་མེད་པར་བསམ་ཏེ་
མ་ཆགས་པར་བྱ་བ། 264
༢ དལ་འབྱོར་རྙེད་པར་དཀའ་བ་བསམ་ནས་
དོན་ཡོད་པར་བྱ་བ། 269
༣ ཁྱད་པར་རྒྱལ་པོས་ཀྱང་རྟེན་ཁྱད་པར་ཅན་ཐོབ་པས་
འབད་པར་གདམས་པ། 271

ཁ། འཁོར་བའི་ཉེས་པས་སྐྱོ་བར་བྱ་བ་ལ་གསུམ།

༡ མདོར་བསྟན་པ། 274
༢ རྒྱས་པར་བཤད་པ།
༣ དོན་བསྡུ་བ། 298

གཉིས་པ་ལ་བདུན། (རྒྱས་པར་བཤད་པ་)

༡ ངེས་པ་མེད་པའི་ཉེས་པ། 275

༢ ངོམས་མི་ཤེས་པའི་ཉེས་པ། 275

༣ ལུས་ཡང་དང་ཡང་དུ་འདོར་བའི་ཉེས་པ། 275

༤ ཡང་དང་ཡང་དུ་ཉིང་མཚམས་སྦྱོར་བའི་ཉེས་པ། 275

༥ ཡང་དང་ཡང་དུ་མཐོ་དམན་དུ་འགྱུར་བའི་ཉེས་པ། 276

༦ གྲོགས་མེད་པའི་ཉེས་པ། 279

༧ འགྲོབ་ལྔའི་ངེས་པའི་སྡུག་བསྔལ་ཉམས་སུ་མྱོང་བའི་ཉེས་པ།

(དེ་ལའང་དབྱེ་བ་ལྔ་)

༡ དམྱལ་བའི་སྡུག་བསྔལ། 280

༢ དུད་འགྲོའི་སྡུག་བསྔལ། 285

༣ ཡི་དྭགས་ཀྱི་སྡུག་བསྔལ། 291

༤ ལྷའི་སྡུག་བསྔལ། 295

༥ ལྷ་མ་ཡིན་གྱི་སྡུག་བསྔལ། 296

ག། མྱ་ངན་ལས་འདས་པའི་ཕན་ཡོན་བསམ་ནས་ལམ་སྒྲུབ་པར་གདམས་པ་ལ་གཉིས།

༡ ཐེག་པ་ཐུན་མོང་གི་དབང་དུ་བྱས་པ་དང་།

༢ ཐེག་ཆེན་གྱི་ལམ་འབྲས་བུ་དང་བཅས་པ་སྒྲུབ་པར་གདམས་པ།

དང་པོ་ལ་གཉིས།

༡ ཕན་ཡོན་ཅན་གྱི་སྨྱུང་འདས་ཐོབ་བྱ་ཡིན་པར་བསྟན་པ། 300

༢ དེའི་རྒྱུ་ཚོགས་སྒྲུབ་པར་གདམས་པ། (དེ་ལ་དབྱེ་ན་བདུན་ཡོད་)

 ༡ བྱང་ཆུབ་ཀྱི་ཡན་ལག་བདུན། 301

 ༢ ཞི་གནས་དང་ལྷག་མཐོང་ཟུང་དུ་འབྲེལ་བས་སྨྱ་ངན་ལས་འདས་པ་ཐོབ་པ། 301

 ༣ བསམ་བྱ་མ་ཡིན་པའི་གནས་སྤངས་ཏེ་རྟེན་འབྲེལ་རྟོགས་པར་བྱ་བ། 311

 ༤ འཕགས་པའི་ལམ་ཡན་ལག་བརྒྱད་ཀྲ་སྒོམ་པ། 312

 ༥ ལམ་བདེན་གྱི་དམིགས་པ་འཕགས་པའི་བདེན་པ་བསྟན་པ། 315

 ༦ བདེན་པ་མཐོང་བ་སྐྱེས་བུའི་རྩོལ་བ་ལ་བརྟེན་པས་ཞུམ་པར་མི་བྱ་བ། 315

 ༧ མདོར་བསྡུས་ཏེ་གདམས་པ། 317

གཉིས་པ་ལ་གཉིས།

(ཐེག་ཆེན་གྱི་ལམ་འབྲས་བུ་དང་བཅས་པ་སྒྲུབ་པར་གདམས་པ་)

༡ ལམ་གྱི་བྱ་བ། 317

༢ འབྲས་བུའོ། 319

R

Acc. २८५८२
28962